२६

सा/५१

१६०४

अथनौकाटीकासहितारसतरंगिणीप्रारंभः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२=ग्रंथप्रसंगे च: प्रवणा नद्याः सादरा यस्यां यमुनायां तत्रास्तु प्रवणा गंभीरेत्यर्थः एवमग्रेपि २ नात्पर्यावधारकाध्ययनादेः प्रयोजकात् = ९

र·त· १=कर्णधारांतराद्व्यवच्छिन्नत्ति नौकासंबंध कर्णधारस्याहतेन बाललीलास्मरणद्वारा यमुनानौकाकर्णधारत्वं व्यक्तमप्याविष्कृतमत्रालंकार इति बोध्यं तदुक्तं शब्दार्थशक्त्याक्षिप्तोपीत्यादि

१ श्रीगणेशाय नमः॥ लीलागृहीतगात्रं नंद ~ रसपात्रं सुतं यशोदायाः॥ श्रीभानुतरंगिण्या नौकायाः कर्णधारमहमीडे॥१॥ गंगारामेण मयार्यं नौका

त्वात्कोपादिव बलरामेण॥ प्राक् प्रवणार्थवाक् प्रवणा सैषा क्रियते तरंगिणी भानोः॥२॥ प्रारिप्सितप्रतिबंधकदुरितविध्वंसपटीयसीमाशिषंशि

ष्यशिक्षायै निबध्नन् श्रीभानुदत्तमिश्रो निरूपणीयरसस्योत्तमनायकालंबनतया पुरुषोत्तमं परामृशति॥ पीतवासाः श्रीकृष्णः॥ अत्र पीतवा

सः पदमप्युपसर्गकर्मकमर्कांतेण धातुनिष्पन्नमपीतान्यपहृतानि वासांसि परिधानीयान्यर्थाद्गोपीनां येन स इत्यर्थमावेदयत् स्मिन्नेव माद्दिना

नाविधक्रीडाविदत्वमवगमयति सोयं शब्दशक्तिमूलध्वनेर्ध्वा॥ अनयैव दिशा व्युत्पत्तिभेदसहकारेण पीतवासः पदं सर्वरसानुगुणं मत्वात

॥ॐ॥ लक्ष्मीमालोकालुब्ध निगममुपहसन्मोचयन्यत्तजं तूनुस्तत्रं शोणासिपश्यन्तमितिदशमुखं वीक्ष्य रोमांचमंचन्॥ हत्वा

हैयंगवीनं चकितमपसरन्म्लेच्छर क्तैदिगंतान्मिंचन्दंतेन भूमिं तिलमिव तुलयन्पातु वः पीतवासाः॥१॥ देवोपनिबद्धग्रंथकृता॥ तथा

हि॥ शृंगारहास्ययोर्यथा प्रतिपत्तिस्तथाव्युत्पत्तिरावेदितैव॥ तथापीतायमृतगुरुपुत्रार्थं तमानेतुमिति यावद्यातिगच्छतीति पीतवाः॥ आगुरिणा

प्युपसर्गाकारलोपोक्तेरस्यते क्षिप्यत इत्यस्सुदर्शनचक्रं तेन सहितः सास्पीतवाश्चासौ साश्चेति पीतवासा इति व्युत्पत्त्या ऽद्भुतरौद्रयोः॥ त

थावातीति वा वाग्रुः पीतो वायेन स पीतवाव्यालरास्स इति यावत्तस्यति मारयतीति पीतवासाः॥ यद्यपि षोंतकर्मणीत्यस्याद्देवउपदेशोऽशि

६=पायरादीनपि रक्षयितुं समर्थ इत्यर्थध्वननात् अर्थांतरे तदानीमेव कंसं नो हतवान् पुनरर्थांतरे ब्रह्मसृष्ट्यन्यथाकारक इति कर्तुमकर्तुमन्यथाकर्तुं समर्थस्य स्वातंत्र्याद्स्मद्रक्षण

मिषत्करमिति चार्थव्यक्तेः ६ ४=प्रागप्युपसर्गकलोक्तेर्मूले गोपीतवासा इति संशयेन प्रातिपदिकनिर्देशोत्तरमल्लोपजिज्ञासेत्यभिप्रायेणात्रैनकारप्रदर्शनं ४

५ सांतोयं शब्द इति व्युत्पत्तयेतथानुकरणमेतत् ५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पीनो दोषदृष्टिस्तावत्पर्यंतं ५

नीत्यात्वेन रूपनिष्पत्तावसत्ते: प्रश्लेषो निरर्थकस्तथाप्यधिकार्थलाभार्थमेव तत्प्रश्लेष स्थीयते॥ आसमंतादस्यति समन्तयावर्तत इत्यास्पीत
वासाश्चासावाश्चेति पीतवासा इति व्युत्पत्त्या वीरशांतयोः॥ तथास्यते स्थीयते ऽनेनेत्यासो ऽकर्तरि च कारके संज्ञायामिति सूत्रेः॥ संज्ञाया
मित्यस्य प्रायिकत्वात्॥ कथमन्यथोपदेशे ऽजनुनासिक इदिति सूत्रं॥ नचोपदेशनमुपदेश इति भावप्रत्ययेनेष्टसिद्धिरिति वाच्यं॥ तथा
सत्यनन्वयप्रसंगात्॥ ननु करणाधिकरणयोश्चेत्यनेन बाधप्रसंग इति चेत्॥ अस्त्वेवमापाततः॥ पुंसि संज्ञायां घः प्रायेणेति तदपवादस्यापि
जागरूकत्वात्॥ प्रायेण घ इत्येवोपपत्तौ प्रायेण संज्ञायामिति व्याख्यानक्लेशासहिष्णुतायां तु कृत्यल्युटो बहुलमिति बाहुलकाल्ल्युडप्रव
तौ घञ्प्रसरात्॥ अतएवोपदिश्यते ऽनेनेत्युपदेशः शास्त्रमिति व्युत्पत्तिमत्रमेनिरे महाभाष्यकृतः॥ तत्र भगवान्सूत्रकारोपि समाहारः
स्वरित इत्यपि सूत्रमसूत्रयत्॥ अन्यथात्रापि घञो ल्युटा बाधप्रसंगात्॥ यद्वा सनमास इति भावे घञ्॥ अतएव देशनं देश उपदेशो यत्रेति
व्युत्पत्तेः कथंचित्संभवमभिप्रेत्य बाहुलकं लगतिकागतिरित्यभिहितवंतो र्वाञ्चो व्याकरणविद इत्यास्तां तावत्॥ वाति गच्छत्यासो ऽथे स्थिति
र्वाययोस्तौ वासौ वित्तयोर्हि पत्नौ देवकी वसुदेवौ तौ प्रत्यासत्त इति वासास्पीत इति कर्तरि क्तो ऽथो सरकीयदधिदुग्धादिकमतयोस्तिष्ठते पीतश्चासे
वासाश्चेति पीतवासा इति व्युत्पत्त्या भयानककरुणयोः॥ तथा वसेववासां ऽतैः तः हषोदरादित्वान्मांसप्रकृतिस्तत्रास्त इति वासासः रुधिरं पीतं वासा अ
र्थी स्तूतनायायेन स पीतवासा इति व्युत्पत्त्या बीभत्सस्य च निष्पत्तेरित्यलमनतिरमणीयेन प्रपंचेन॥ चोगुश्चान्यात्तु रसत्रित्यन्वयः॥ किंकुर्वन् लक्ष्मींहरि
प्रियामालोकयदृष्ट्वालुभ्यन्नरज्यन्नेव॥ एतेन नरसिंहावतारे संजातक्रोधशांत्युपायगवेषकै र्देवैर्लक्ष्म्याः पुरस्थापितायां तदासक्तोभूदिति पुराणप्रसि
द्धोर्थः सूचितः॥ पुनः किंकुर्वन्नेवमग्रेपि॥ निगमं वेदमुपहसन्प्रत्यक्षस्वरूपप्रमाणांतरविसंवादिनोपि प्रामाण्यमिति प्रसभं हसन्॥ अतएव यज्ञ

४=आदिवृद्ध्ये प्रभवन्नपि स्वार्थे णङ्ग्प्रसंजकत्वान्नयुज्यत इत्यंततनइनि४ २वैरिविजयकृतशोभातिशयाधायकक्रोधवाध्यत्वप्रतीतिहेतुनावधारणोपसंदानेनात्र कवितास्य यौने
गीकारे ग्रे दशग्रस्तादिविशेषसमर्थतापत्तेः २= ३=नन्विदं भागवतविरुद्धमतः पुराणेति॥ तथाच समबलविरोधो युगभेदात्परिहर्तव्य इति भावः = २

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. जंतून्यज्ञोपयुक्तान्पश्वादीन्शोचयन्नथैवेमेनिहताइतिप्रतिपादयन्॥एताभ्यांबौद्धावतारेवेदनिंदापशुघातनिंदाचकृतेतिसूचितं॥यदाहजयदे नौका।
२ वः॥निंदसियज्ञविधेरहहश्रुतिजातंसदयहृदयदर्शितपशुघातंकेशवधृतबुद्धशरीरेत्यादि॥क्षत्रंक्षत्रियजातीयंशोणाक्षिलोहितांसंयथाभव
तितथापश्यन्नवलोकयन्॥एतेनभार्गवावतारेक्रोधावेशेनसर्वक्षत्रियानिरीक्षिताइतिसूचितं॥समितिसंग्रामेदशमुखंरावणंवीक्ष्यावलोक्य
रोमांचंपुलकमंचन्नकटयन्॥एतेनरामावतारेरणेरावणंदृष्ट्वोत्साहवत्तासूचिता॥हैयंगवीनंह्योगोदोहोद्भवंसद्योघृतंहलागहीलाचकितं
व्याकुलांतःकरणंयथास्यात्तथाऽपसरन्धावन्॥एतेनकृष्णावतारेयशोदायाःसकाशाद्भीतिःसूचिता॥म्लेच्छरक्तैर्यवनासृग्भिर्दिगंतानाशाभा
गान्सिंचन्प्रोक्षन्॥एतेनकल्क्यवतारेकृतेनरुधिरसेकेनपरनिष्ठोबीभत्सःसूचितः॥दंतेनदंष्ट्रयाभूमिंपृथ्वींतिलमिवतिलमन्वानस्तुलयन्नुद्धर
न्॥एतेनयथाकश्चित्स्वाकृतोनायासेनतिलंवहत्येवंवराहावतारेसोपृथिवीमितिपरनिष्ठोविस्मयःसूचितः॥रसस्यस्वनिष्ठत्वंपरनिष्ठत्वंचेतिनक
श्चिद्विशेषः॥यद्यपिभवनंकामरिपोर्धनुरित्यादिवक्ष्यमाणरसशबलोदाहरणरीत्या॥शृंगारीगिरिजाननेसकरुणोरत्यांप्रवीरःस्मरेबीभत्सोऽस्थि
भिरुत्फणीचभयकृन्नेत्रत्रयेणाद्भुतः॥रौद्रोदक्षविमर्दनेनहसकृन्नग्नःप्रशांतश्चिरादित्थंसर्वरसाश्रयःपशुपतिर्भूयात्सतांभूतयइतिशृंगार
तिलकरीत्यावाएकत्रैवनानारसवत्ताप्रतिपादयितुंशक्यते॥तथाप्यनन्यरसप्राधान्यमाविष्कर्तुंतत्तदवतारेषुतेतेरसादर्शिताः॥तथाचवाक्यभेदे
नैकैकमात्रप्रतीतौविरोधस्यापिप्रसराभावात्॥अन्यथारसशबलास्थैर्यरसांतरमेवप्रतीयेतवक्ष्यमाणेएकःसिंधुभुवःकरेविलुलितइत्यादाविवनत्र
विवक्षितानन्तरसासुरत्यतयावभासेरन्॥इत्थंचैकस्यैवाप्रतिहतेच्छांविनानुपपद्यमानतत्तदवतारप्रतिपादनद्वाराशांतरसोपिप्रतिपादितः॥नन्वेक
स्यैवेतिकुतोवगतमितिचेत्॥समभिव्याहृतक्रियासमानकालिकत्तायामनुशिष्टेनशतृप्रत्ययेनलोभादिसमानकालिकत्वंपाधात्वर्थेन्वेतितच्चैक रामः
स्यनिखिलजगद्रक्षणरूपक्रियासांतत्यएवघटतेनान्यथेत्यवेहि॥एतेनशत्रादेशिलडर्थेवर्तमानत्वान्वयायध्यानइतिक्रियांतराध्याहारेणश्र २

३=अस्याःशास्यविनाभावादित्याशयः

४=अंगत्वमपिनोच्यतेतेननरसंकरगंधोपि=

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१=चैत्रो गच्छन्न्यपश्यतीत्यादौ तिङ्विषयतया गच्छतिपश्यतीति माभूदिति तद्विषये शतृशानचौ विहितौ तथा चात्र साधुत्वाय धातुसंबंधेत्यादि सूत्रेणानन्तकृतभौत्सर्गिके तौ तिं चै
द्वेयः वर्तमानलोभाद्यवच्छिन्नत्वं ध्यानकर्मत्वे विषयतात्मनि बोध्यत इति मुख्यान्तरे मानाभावाद्यथमासमानाधिकरणइत्यौत्सर्गिक निषेधप्रसं
गाच्च॥ परंतु रसस्याभिमुखतावद्वैमुख्यमपि भेदांतरमावेदयितुमसौ विमुख एवोपदर्शितस्तेन च विषयवैमुख्यपरिपोषात्मकतापि शांतरस
स्यकैर्थं चित्कारिताभवतीतिनन्यूनताशंकाप्यवतरति॥ यत्तत्रभूमिं तिलमिव तुलयन् पादेनाक्रामन्निति प्रागुक्तवाक्यैकदेशादस्मादिना
वामनाद्यवतारादीनामपि प्रतिपादनमामनंति ध्रुवं माति भूमिर्मंदरस्तं श्व नतिष्ठासयन्नित्यर्थकारस्यंतरेण कूर्मस्य निगममुपहरन्निति
पाठान्तरेण च मत्स्यस्य लक्ष्मीमित्यादि नैवाजिताद्यवतारान्तरस्य च प्रतिपादनस्य वक्तुं शक्यत्वात्तो यं क्लेशः किमर्थमिति न विद्मः॥ न हि भगवतो
दशैवावतारा इति वक्तुं युक्तं॥ न वा प्रसिद्धिविशेषेपि तावतां परामर्शः प्रस्तुतोस्ति॥ कतिपयैतस्य दर्शनं तु निरूपणीयरसभेदप्रदर्शनांगतये
2 वेति ध्येयं॥ प्रसिद्धावतारक्रममनादृत्य रसक्रममत्र सरता ग्रंथकृतैव स्पष्टीकृतोसावाशयः॥ यदपि भक्तप्रेमास्पदचरणसान्निध्यात्पीतवास
सः स्मृतिहारा निखिलनखशिखभूषणविशिष्टभगवत्तासर्वकतया पीतवासः पदं व्याचक्षते॥ तदप्येवंविधस्यापि तच्चरणस्येदं लेनावाक्यार्थे
स्थितेकथं स्मारकत्वमिति भक्तिभरप्रधानास्त एव दरमुकुलितलोचनं विदांकुर्वंतु॥ १॥ प्रकृतग्रंथस्य रसो वै स इति श्रुत्या नतत्त्वात्संसिद्धार्थप्रति
पादकत्वाविशेषेपि लौकिकाल्हादभूयिष्ठतया प्रतिपादनमतिसुकुमाराणां राजकुमाराणां शास्त्रव्याकुलितान्तःकरणानामप्यन्तःकरणविनो
दपुरःसरं निरूपणीयार्थप्रतिप्रत्त्यै इत्यादि विनवीनग्रंथारंभ इत्याह॥ भानुनारसतरंगिणी क्रियत इत्यन्वयः॥ रसस्य भूयस्त्व एव तरंगाकुलत्वमा
त्रैन्त्राह्मण इत्यादेः साधुत्वायेत्यवेहि=१ ९= असावेव तथा किमिति प्रदर्शित इति जिज्ञासया विनिगमकविधया विषयवैमुख्यस्थायिकत्वस्य स्मरणादित्यर्थः =९
४= पीतवासः पदं यदि चरणार्थकं तदा चरणं तत्सदस्मारयेद्धहीनसंकेतसंबंधात्॥ चरणोद्बोधकेन स्मारितमपि पदं भगवंतं स्मारयेन्न चरणमेवा संबंधात्कुतः संबंधिसं
बंधिनि मेखलादिः४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. रसतरंगिण्याः पदप्रतिपाद्यत्वं संभवतीत्यतस्तां विशिनष्टि ॥ भूरिरसेति ॥ रसस्य जलसाम्यमानंदांशावरणप्रच्छादकत्वाज्जलं यथास्वावरकं नौका
३ भूरेव वाद्यथोनयति तथायमपीति भावः ॥ पुनः कीदृशी सा शास्त्रेत्यादि शास्त्रमेव कांतारं दुर्गमं वनं तद्दुरूहत्वात्तस्मिन् श्रांता या विमनस्कता
प्रयोजकतया श्रमतुल्यदुरधिगम्यता शालिन्याः शांतिकारिणी सुखावगमहेतुः ॥ २ ॥ अत्र ग्रंथे सहृदयानामेव रसोद्बोधादधिकार इत्याह ॥
एषा बुद्धिस्था रसतरंगिणी समास्माभानोर्वाणीकमलिनी सरोवरभूमिर्भानुप्रयुक्तविकासवत्तया कमलत्वारोपविषयपदकदंबघटितत्वात् ॥
कृतधियः सहृदयास्तत्र भूमौ हंसा रसास्वादकत्वादित्यत्र विषये प्रयुक्तं प्रतीयतामित्यर्थः ॥ ३ ॥ बलात्प्रवृत्तैः कर्कशांतःकरणैः रसस्याविलत्वम

भारत्याः शास्त्रकांतारश्रांतायाः शांतिकारिणी ॥ क्रियते भानुना भूरिरसा रसतरंगिणी ॥ वाणीकमलिनी भानोरेषा रसतरंगि
णी ॥ हंसाः कृतधियस्तत्र युक्तमत्र प्रतीयताम् ॥ गिरां देवि तरंगिण्यां वारय क्रूरवारणान् ॥ यद्भविष्यति लोकानामाविलो विरलो र
सः ॥ हेतोः पूर्ववृत्तित्वनियमादतः पूर्वमेव तस्योपन्यासः समुचितो रसस्य हेतवो भावा दयस्तेन रसेभ्यः पूर्वं भावादय एव
निरूप्यंते ॥ त्यलं च माभूदिति वागधिष्ठात्रीं देवतां प्रार्थयते ॥ हे गिरां देवि सरस्वति तरंगिण्यां क्रूरवारणान् क्रूराः कर्कशांतःकरणास्त एव
वारणा अधिकारविचारशून्यत्वात्तान्वारय दुर्बोधत्वापादनेन प्रथममेव निवारय ॥ यद्यस्माल्लोकानामविवेकवतामपि प्रसभसमाहृतदूषणगणत
याविलः सहृदयताशून्यतया स्फुटमप्रतिपत्तेर्विरलश्च रसो भविष्यति ॥ गजो हि जानुमात्रजलसंतुष्टतया तत्रस्य भूरेरेवाकर्षणेनाविलमतल
स्पर्श्यजलासंस्पृष्टतया चाल्पं रसं स्वयमुपभुङ्क्ते ततस्तत्प्रतिबंधादन्येपि तावन्मात्रमेवोपभुंजत इति भावः ॥ ४ ॥ रसनिरूपणस्यैवोद्दिष्टतया भा रामः
वनिरूपणमप्राप्तकालमित्याशंकासामान्यमुखव्याप्तिप्रदर्शनपुरःसरं तन्नियामकमाह ॥ हेतोर्हेतुनिरूपणस्य पूर्ववृत्तित्वनियमात्संगतेरनंतरा ३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यंजनाकृतचमत्कारविशेषेपिस्वस्वरूपप्रापणेनचमत्कारातिशायकत्वात् ५

भिधानव्याप्यतयाकार्यत्वलक्षणसंगतिशालिकार्यनिरूपणपूर्वत्वनियमादित्यर्थः॥ यद्वानिरूप्यक्रमस्यनिरूपणक्रमनियामकतयायथाशु
तएवग्रंथःसाधुः॥ अतःकार्यनिरूपणात्॥ तस्यहेतोःसमुचितइत्यंतेनयोयद्धेतुःसतन्निरूपणात्पूर्वंनिरूप्यइतिसामान्यमुखीव्याप्तिरुक्ताभ
वतितेनसमुचितइत्यंतःपाठःकाल्पनिकइतिनभ्रमितव्यंभावादयोभावप्रधानाभावविभावानुभावाः॥ तेनरसहेतुत्वस्यभावाद्यन्यतमत्वव्याप्य
त्वेन॥ भावादयएवेति॥ यथाक्रममितिशेषः॥ नन्वेवंस्थायिभावविभावानुभावसात्विकभावव्यभिचारिभावनिरूपणानांक्रमोविरुद्धः॥ कार
णत्वेनसकलनिरूपणप्राप्तेर्व्यभिचार्यपेक्षयापिसुंदरस्यस्थायिनोभ्यर्हिततयाप्रथमंनिरूपणेपिविभावाद्यपेक्षयासुंदरत्वाद्व्यभिचारिनिरू
पणस्यतदनंतरंप्रसंगोचित्यादितिचेत्॥ सत्यं॥ तुल्ययुक्त्यास्थायिव्यभिचारिणोरपिकारणतयाविभावनिरूपणप्राप्तेर्वक्ष्यमाणरीत्या

रसानुकूलोविकारोभावोविकारोन्यथाभावः॥

स्थायिवित्तिवेद्यविभावपदप्रवृत्तिनिमित्तकस्यविभावस्यस्थायिनिरूपणंविनानिरूपयितुमशक्यत्वाद्विभावपूर्वंस्थायीनिरूपितोनुभा
वस्तुतदिदंद्वयमेवव्यभिचारिव्यंजनक्षममितिपरिशेषाव त्वाद्यविभावोत्तरंनिरूपितः॥ सात्विकभावस्यद्विरूपतासूचनायपरमनुभावव्य
भिचारिणोरंतरासौनिरूपितइतिसर्वंचतुरस्रं॥ भावंलक्षयति॥ अत्ररसानुकूलोरसानुकूलज्ञानविषयोतएवविकारोऽज्ञायमानस्यज्ञायमान
त्वंतत्वं॥ तथाचज्ञाननिष्ठरसानुकूलतायांविषयतयावच्छेदकत्वंभावसामान्यलक्षणंपर्यवसन्नं॥ नचैवंहावेष्वतिव्याप्तिरितिवाच्यं॥ तेषामपि
भावत्वेनलक्ष्यत्वात्॥ भावत्वेनलक्षितानामपिहावत्वेनपृथङ्निरूपणंतुनैवानौचित्यमावहति॥ एतेनविकारोन्यथाभावइत्ययुक्तं॥ नायिकापा
लंबनविभावेषुचंदनाद्युद्दीपनविभावेषुचाव्याप्तेरितिपरास्तं॥ यथोक्तविकारत्वस्यतेष्वपिसंभवात्॥ नचांतरभावेष्वव्याप्तिस्तेषांस्वरूपतएवानु
१=त्वसमानाधिकरणज्ञानिकरसानुकूलत्वात्तेनलक्ष्यनोक्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावतयापराभिमतमित्यर्थैस्तुये जमेवादिपदमतआह॥८ भवतीत्याशंकते॥२

र॰त॰ २॥एतस्यापितयोरंगीकारे॥२ ५॥स्वसाध्यभोगहेतुदृष्टवदात्मत्वं॥५ ६॥द्वंद्वः सहत्वनयनइतिवदिष्टापत्त्याह॥६ ३॥विकारत्वस्यैकस्याभावाद्वोभयलक्षणत्वसं नै॰ ता॰

४ कूलत्वादितिवाच्यं॥ज्ञायमानत्वमित्यत्र ज्ञानस्यसाक्षिवृत्तिसाधारणस्यविवक्षितत्वादितिकेचित्॥तन्न॥सर्वत्रभावपदव्यवहाराभावात्॥नच विभावोनुभावइतिभावपदव्यवहारस्तयोरपीतिवाच्यं॥तत्रभावपदप्रवृत्तिनिमित्तांतरस्यविशेषेणभावयंतितथानुभावयंतीतिव्युत्पत्त्यं गीकर्तृभिः सर्वैरेवांगीकृतत्वादन्यथाव्यभिचारिभावइतिवद्विभावभावइतितथानुभावभावइतिचकदाचित्प्रयुंजीरन्॥नचानन्वगमादयंस्था लिकभावेषुशारीरेष्वपितुल्योनुयोगइतिवाच्यं॥विकारपदेनप्राणिप्रयत्नानौपाधिकप्राणिसत्ताकत्वंगीयतेयदाहविकारोन्यथाभावइति॥अ न्यथेत्यस्यपत्वंविनेत्यर्थाद्भावइत्यस्यसत्ताश्रयइत्यर्थात्॥प्राणित्वंचशरीरावच्छिन्नात्मत्वंशरीरत्वंचचेष्टाश्रयत्वंचेष्टात्वंचजातिविशेषइतिनान्व गमइति॥तदेतद्ग्रंथकृदेवाग्रेस्फुटयिष्यति॥तत्त्वतेषामप्यविशिष्टमेवेत्याशयात्॥भावादयइत्यभ्यस्तपाठाद्भावास्तद्भिन्नाश्चरसहेतवोनिरू प्यंतइतिवदतोग्रंथकर्तुःसर्वसाधारणभावत्वस्यानभिप्रेतत्वाच्च॥किंचरतिर्देवादिविषयाव्यभिचारीतथांजितइतिसूत्रेरतिपदस्यस्थायिभाव मात्रोपलक्षकत्ववद्व्यभिचारिपदस्यानेकरसानुगुण्यसाधर्म्येणशारीरमात्रोपलक्षकत्वंलक्षणानुरोधाद्युक्तंनत्वन्येषामपिग्रंथकृदनभि प्रेतस्वकपोलकल्पितलक्षणाक्रांतानांसर्वेषां॥अञ्जितइतितुयोग्यतावशादांतरेसमन्वेतिनशारीरेपिपयसासिंचतीत्यादौसेकइवद्रवद्रव्ये नकरकायामिति॥तथाचांजितस्यैवांतरस्यभावपदव्यवहार्यत्वेपिबाह्यस्यातथाभूतस्यापितथात्वंतेनाभिमतमितिकिमतिदूरंगत्वा॥विकार

१॥नन्वंजितोव्यभिचारीत्यवांतरबोधोपपादनेपिसविशेषणस्येतरान्वयितावच्छेद ६ ३॥भावव्यवहारविवादविषयायेन्येतेषांसर्वेषामितियोजनीयम्॥३

कत्वंननिर्विशेषितमितिमहावाक्यार्थबोधानुपपत्तिर्दुर्वारैवेतिशंकामुपलक्षकतानवच्छेदकावच्छिन्नस्यनसविशेषणत्वंकिंतुसविशेषितस्यैवोपलक्षकत्वंयथाक्षित्यंकुरा रामः

दिकंसकर्तृकमित्यत्रक्षितिपदसमभिव्याहृतांकुरपदस्यजन्यमात्रोपलक्षकत्वमित्यभिप्रेत्याहनथापीतित्वस्यनावच्छेदकं चांजितांतरव्यभिचारिभिन्नत्वमेवानुगतंवाच्यमित्या ४

श्रयः॥१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

५=वस्तुतोवानेकरसानुकूलत्वंविव

३=नन्वेतावतानेकरसानुकूलत्वंविवक्षितंतथाचस्थायिन्यव्याप्तिरित्याशंक्याह=३ २=ज्ञानांतराद्वारकत्वेसत्यनुकूलत्वमात्रं=२ क्षितमितिवक्तुंभूमिकामाह=५

त्वंयत्नादावपीतिरसानुकूलत्वमुपात्तं॥यत्तुरसकाव्येतिप्रसंगवारणायज्ञानांतराद्वारकत्वंचर्वणागतानुकूलत्वेविशेषणमिति॥तन्न॥स्वरभंगा
न्यशब्दसामान्यस्यैवप्राणिप्रयत्नसाध्यत्वाह्निकारपदेनैवांगाकृष्ट्यादीनामिववारणात्॥नोवन्मात्रंचविभावादावपीतिविकारत्वंविवक्षि
तं॥मोट्टायितादावांतरहावानांतुशृंगारएवानुकूलत्वंनरसांतरइतिनतत्रातिव्याप्तिःस्थायिनामपिरसांतरेव्यभिचारितयानुकूलतास्त्येवेतिना
व्याप्यव्याप्तिरितिसर्वंसुस्थंएतेनरसानुकूलचर्वणाविषयविकारस्यभावत्वे॥कालागरुद्रवंसाहालाहलवह्निजानतीनितरांअपिनीलोत्पल
मालांबालाव्यालावलिकिलामन्तेयादौविप्रलंभानुभावभूतप्रकृतभ्रमेतिव्याप्तिरितिब्रुवंतोनव्याःसमाहिताः॥यत्तुरसद्वयानुकूलज्ञान

विकारस्त्वद्विविधआंतरश्शारीरश्चांतरोपिद्विविधःस्थायीभावोव्यभिचारीभावश्च॥शारीरास्तुसात्विकभावादयः॥

विषयेनुभावभूतज्ञानेतथाप्यतिव्याप्तिः॥यथामम॥शिबिरप्रविष्टमात्रंपरोक्षमपिचापरोक्षमिवहित्वा॥स्वीयाअपिपरकीयाःपश्यंतिवनेपि
पत्तनेप्यवलाद्यत्रविप्रलंभभयानकयोरनुकूलेराजाध्यासइति॥तन्न॥चर्वणायांव्याप्यवगाह्यांतरविषयकान्यत्वस्यविशेषणात्॥नच
ज्ञानंतथाभूतंयत्नादिवानांतरमितिनैकाप्यतिप्रसंगः॥नवाप्रतियोगिकोटौव्याप्यवगाहित्वविशेषणाच्चव्याप्यनवगाहिचर्वणाविषय
मत्यादावव्याप्तिः॥रसोवैसइतिश्रुत्याखंडानंदस्वरूपतयाप्रतिपिपादयिषितस्यापिरसस्यानुकूलतारसनिरूपणावसरेवस्यते॥आंतरभावा
दीनामन्यतमत्वस्यतावगतिप्रसक्तान्यजातीयातिप्रसंगशंकामपाचिकीर्षुर्लक्ष्यताप्रतिपत्त्युपयुक्तंविभागमाह॥सात्विकभावादयइत्यादिपदं
तुगणितानंतर्गतजंभाद्युपरिगणनाभिप्रायं॥आंतरशारीरनिष्ठैकधर्ममसंभावयतांमनोविकारमात्रस्यलक्ष्यत्वंवदतांकेषांचिल्लक्षणमाह॥
६=शृंगारवीरप्रकृतिकपुरुषभेदेनव्यवस्थितेरसद्वयेऽनुकूलत्वंचर्वणायांमव्यवस्थितायामेवस्थायिनइवबोध्यं=६ ४=तथाचानेकरसानुकूलत्वंनोपादेयमितिभावः ४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

६=खेतरत्वस्यारोपत्वागमकत्वात्=६ १=लक्षणत्वस्यतावच्छेदकयोरैक्येसतिविरहात्तस्यापिलक्ष्यतावच्छेदक

र.त. १=ओमाङोश्चेतिसूत्रेपररूपविधिविषयत्वंस्वरेस्त्विनवेतिसंदेहेनिषेधपरेनचस्वरोरूपमित्युक्तितेनचस्वरोरूपवान्निमहाभाष्योक्तेः=१ त्वंसंभवतीत्यतआह=१ नौका

५ तुल्यवदितिस्वार्थेमतुप्त्वाविधमहाभाष्यप्रयोगात्॥तदर्हमितित्वसौयुज्यतेवतिः॥तथाचानंतोभावपदवाच्यत्वस्यैवलक्ष्यतावच्छेदकस्यो

भयसाधारण्याल्लक्षणस्यविकारपदेनचित्तकायविकाराणामपिप्रागुक्तयुक्त्यानुगमोयुक्तइतिभावः॥सजातीयैरतिरस्कृतमूर्तिमान्॥

आत्मभावत्वंनयत्त्वन्यान्नस्थायीलवणाकरइतिप्राचीनवाक्यमेकैकभागमात्रस्यैवलक्षणत्वसंभवेतदितरभागवैयर्थ्यापत्त्यालक्षणद्वयतात्प

र्यकमितिवक्तुंतदनुवदति॥यथाश्रुतेतुयथोक्तकामिनीजिज्ञासाघटितसामग्रीसंपन्नग्रहविषयकामिन्याघतिव्याप्तिवारकतयासत्यंतस्य

व्यभिचारिवारकतयाकस्यचिदभिप्रेतस्यविशेष्यस्याप्यर्थवत्त्वमितिबोध्यं॥इतरेतिस्वरूपकीर्तनंभावस्येत्येवविवक्षितं॥आत्मभावलोपना

यविजातीय

यत्तुमनोविकारोभावस्ततश्चदेहविकारेस्वेदादौभावपदप्रयोगोगौणइति॥तन्न॥तुल्यवदुभयत्रापिभावपदप्रयोगेणविनिगंतु

मशक्यत्वात्॥लक्षणानुरोधेनतस्याव्यवस्थितेः॥इतरभावस्यात्मभावलोपनायकत्वेसतिसजातीयविजातीयभावानभिभाव्यः

ससहृदय५

प्रथमः॥ यकत्वेसतीति॥आत्मभावत्वस्यस्वस्वरूपत्वस्योपनायकः प्रापकोवभासकइतियावत्तत्वेसतीत्यर्थः॥सजातीयेत्यादि॥स

जातीयारसेरत्यादयोविजातीयारतेर्निर्वेदादयः॥तदनभिभाव्यत्वंचतदसाधारणरूपेणतद्ज्ञानप्रतिबंधकसामग्रीसंपन्नचर्वणाकत्वं॥अ

न्नरूपकमात्रेणानभिभाव्यत्वस्यावगतिर्विशेषोपादानेनत्वात्मभावलोपनायकत्वस्येतिद्योतयितुंचरमनिर्दिष्टस्यविशेषणत्वमेवेतिवास्यविशेष प्रथमः

णत्वेनोल्लेखः॥अत्रेदंबोध्यं॥समुचितललितसंनिवेशचारुणा यथामदीयेन॥दर्पितंहृदयेनसंस्मरंतीसमयेनाप्ततदूर्मिकांपिबंती॥सहृदर ५

न्हितदस्त्राण्यपाठीन्निशिवात्वातनुगौरवंवहंतीत्यादिनाकाव्येनसमर्थिताःपदार्थाःसहृदयहृदयंप्रविष्टाःसंतःसहृदयतांसहकृतेनतदीयभाव

१=मुद्रिकाक्षरवाचनंस्थायिनःकार्यंव्यभिचारिणविनाकथमित्युस्थिताकांक्षयानात्रसमाप्तपुनरात्तत्वं=१ २=क्रियाघटितवाक्यार्थत्वात्सर्ववाक्यक्रियायांसमाप्यतइत्युक्तत्वात्=२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नारूपव्यापारेण स्वस्वासाधारणरूपविनिर्मोकेण स्फुरंति तथा सत्येव ते शास्त्रीयविभावानुभावव्यभिचारिभावशब्देन व्यपदिश्यंते तैरेतैर्दुष्यं
तादिभिरालंबनकारणैः सादरतद्दर्शिकावलोकनादिभिरुद्दीपनकारणैरश्रुद्रिकाशस्वरवाचनादिभिः कार्यैस्तनुगौरवव्यक्तौत्सुक्यादिभिः सह
कारिभिश्च संभूय कश्चित्स्वमात्रगतः पुनरलौकिको व्यापारः समुत्पाद्यते तेन चाखंडानंदावरकमज्ञानमपसार्यते प्रसृते चात्मचैतन्यावरणे परि
मितप्रमातृत्वं यस्याः स्वस्मिन्समारोपितमासीत्तद्द्रागेवासत्कल्पं भवति॥ एवं स्थिते स्वप्रकाशेन निजस्वरूपानंदेन सह प्रमात्रा पुरुषेण र
त्यादिः स्थायी गोचरीक्रियते तथा च तादृशभग्नावरणचिद्विशिष्टो रत्यादी रस इत्युच्यते॥ न चात्मचैतन्यस्य स्वप्रकाशतया स्वविषयत्वेपि रत्या
दिविषयत्वे मानाभाव इति वाच्यं॥ अंतःकरणधर्माणां साक्षिभास्यत्वस्य सर्वैरेवाभ्युपगमात्॥ तथापि विभावादीनां भानं दुर्लभमेवेति चेत्॥ स्व

इतरानभिभाव्यो मनोविकारः॥

प्नतुरगादीनामिव तेषामपि साक्षिभास्यत्वमविरुद्धमेवेति सिद्धांतात्॥ तथा चाहुः॥ व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृत इति॥ व्य
क्तो व्यक्तिविषयीकृतः॥ व्यक्तिश्च भग्नावरणा चिदेव यथा हि शरावादिना पिहितो दीपस्तन्निवृत्तौ सत्यां संनिहितान्नृपादीन्पुरस्कृतान्पदार्था
न्प्रकाशयति स्वयं च प्रकाशते॥ तथैवात्मचैतन्यं विभावादिसंवलितान्रत्यादीन्प्रकाशयति स्वयं च प्रकाशते॥ तत्रायं विशेषः॥ यथा पानकपा
ने विभिन्नजातीया रसा न पृथक्पृथगवभासंते॥ एवं विभावादयो न रत्यादिव्यतिरेकेण किंतु रत्यादिरूपेणैवेति तदभिप्रायकस्त्वायमारंभः॥ तत्र प्र
कृतलक्षणवाक्यस्य लक्षणद्वयतात्पर्यकत्वेपि विशेष्यदले साक्षात्कारादिघटनायामर्थं तया तामपहाय तद्दलं प्रथमं परिष्करोति॥ वैश्वानरशुक्लासा
धारणशुक्लत्वादिना शुक्लरूपग्रहे प्रतिबंधिका सामग्री पृथिवी लौहित्यग्राहिका सामग्री तत्संपन्नग्रहविषये पृथिवीरूपेति प्रसंगवारणाय मनो
विशिष्टलक्षणनिर्भरभावादारंभ इत्युक्तं = २

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३=विभावनावच्छेदकादीनां क्वचिदप्रतिपादनात्तदभावः=३ १=एतेनकामिन्यतिव्याप्तिवारकंसत्यंतमितिव्याचक्षाणाःपरास्तावेदितव्या इतिसूचितं=१

र॰त॰ विकारइतिचर्वणाप्रापकं॥स्थायिभावेतरभावानभिभाव्यत्वमात्माश्रयप्रसंगस्तेतरानभिभाव्यत्वंचनानुगतमतःसत्यंतंपरिष्करोति॥सकलेषुमनोवि नौका

६ कारेषुप्रधानमित्यर्थः॥प्राधान्यंचस्वात्मकतयेतरेषांज्ञापनमेवतच्चांतरभावविशेष्यकारोपप्रकारत्वं॥मनोविकारेवेति॥तथाचांतरभावविशे

ष्यकारोपप्रकारत्वेसतिविभावानुभावव्यभिचारिभावान्यतमाभावसहितोक्तान्यतमसंपन्नचर्वणाकत्वंस्थायिभावसामान्यलक्षणंपर्यवसन्नं॥स्था

यीभावइति॥इदंचप्रथमदलस्यविवरणं॥अतएवलक्षणद्वयेप्याकांक्षावशाल्लक्ष्यस्यनिर्देश्यत्वेपिपरिष्कारयथाश्रुतयोर्विवरणविज्ञायमा

नभावंपरस्परंद्योतयितुंविज्ञायमाणविशिष्टलक्षणवाक्यघटकसकलस्यनिर्देशाविवरणतामाविष्कर्तुंदलद्वयविवरणविकल्पोत्तरमस्यसं

कल्पइत्युदारःकल्पः॥अन्यथाप्रथमपदान्तस्यैवसामंजस्यादस्योपादानमनुषंगश्चानभिज्ञकथैवस्यादिति॥तन्नसत्यंतप्रयोजनमाह॥तथा

सकलप्रधानोमनोविकारोवास्थायीभावः॥नचव्यभिचारिणिसात्विकभावेवाव्यभिचारः॥तस्येतरभावस्यात्मभावत्वोपनायक

त्वाभावात्॥ चव्यवहारोपयिकेत्रलक्षणेमनोविकारइत्यनेनयथोक्तचर्वणाऽविषयबाह्याभ्यंतरसामान्यवारणसमर्थतथाविधच

र्वणाकत्वमात्रोक्तौसात्विकभावेतिव्याप्तिः॥आंतरभावनिष्ठविषयतानिरूपितविषयताश्रयांतरभावत्वमात्रोक्तौतुव्यभिचारिभावेष्वति

व्याप्तिरितिविशिष्यविशेष्यताप्रकारताघटितंसत्यंतमुपात्तमितिभावः॥भावविशेष्यकारोपप्रकारेघटेतिव्याप्तिवारणायविशेष्यं॥तत्रापि

रसेष्वतिव्याप्तिवारणायसहितांतमन्यतमविशेषणं॥चर्वणायामन्यतमसंपन्नत्वानुपादानेपिघटेतिव्याप्तितादवस्थ्यमितितदुपादानं॥त

थानशेषवैयर्थ्याल्लक्षणद्वयमित्याशयः॥व्यंग्यांतरन्यायेनव्यभिचारिचर्वणायाअप्यभ्युपगतेः॥केचित्तुव्यभिचारिणामपिरसन्यायेनचर्व्यमा रामः

७=नचसात्विकभावोनमनोविकारःव्यवहारोपयिकेत्रलक्षणेतत्साधारणोक्तमनोविकारत्वस्यैवविवक्षितत्वात्परंतु ४=प्राधान्येविशिष्यविशेष्यतादिघटनाप्रयोजनंदर्शि

यथाश्रुतेनापिसात्विकभाववारणमित्यर्थध्वननायेवचरमंतस्यनिर्देशइत्याहनथाचेति=७ यतिआंतरेति=४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नानाविशेषणाकविभावव्यक्तेः=६ ६=तथाचतत्रव्यवहारप्रसंगान्नोक्तस्यतथात्वमिति=६ ५=व्यावर्तकस्यैवव्यवहारौपयिकत्वमस्त्वित्याशयः ५

णतयाविभावविशेष्यकारोपप्रकारत्वंव्यभिचारिविभावोपिकश्चनभावःसंभवत्येवयथामोहस्यभयमसूयायाःक्रोधः॥नन्वेवंरसभावका
व्यसंपन्नचर्वणयोःकोविशेषइतिचेन्नहितयोर्विभावादीनांतथात्वभासानवभासाभ्यामेवविशेषंब्रूमःकिंतुसंतन्यमानत्वविद्युदुद्योतप्र
यत्वाभ्यामितिगृहाणेतिवदंति॥तन्मतेव्यभिचारिभावेतिव्याप्तिवारणायसंतन्यमानत्वमारोपेदेयमित्याविष्कुर्वन्स्थायिपदप्रवृत्तिनिमि
त्तंदर्शयति॥आप्रबंधमितियावत्॥नचचित्तवृत्तिरूपाणाममीषामाशुविनाशित्वात्कथंस्थायित्वमितिवाच्यं॥मुहुरभिव्यक्तेरेवस्थायित्व
प्रतिपत्तेः॥तथाचतावतैवव्यभिचारिवारणाद्रुतरदलांतरारंभोऽनतिप्रयोजनइतिभावः॥रत्याद्यन्यतमत्वंस्थायित्वमितितुनयुक्तं॥रत्या
दीनांमध्येएकस्मिन्प्ररूढेन्यस्याप्ररूढस्यव्यभिचारित्वोपगमात्॥यथामम॥विच्छिन्नबाहुंपतितंपुरस्तात्समेत्यभूरिश्रवसंसमीक्ष्य॥प्रेम्णा

चरमसमयपर्यंतस्थायित्वादस्यस्थायित्वव्यपदेशः॥सचाष्टधा॥तत्रभरतः॥रतिर्हासश्चशोकश्चक्रोधोत्साहौभयंतथा॥जुगु
प्साविस्मयश्चेतिस्थायिभावाःप्रकीर्तिताः॥तत्रेष्टवस्तुसमीहाजनितामनोविकृतिरपरिपूर्णारतिः॥ समालिंगितबाहुखंडनिर्मुक्तकं

ठंविललापबालेत्यादौप्रेमशब्दमात्रागतारतिःकरुणव्यभिचारिणी॥यदाप्रधानपरिपोषार्थंसोपिप्ररूढःक्रियतेतदारसवदलंकारएव॥यथा॥
अयंसरशनोत्कर्षीपीनस्तनविमर्दनः॥नाभ्यूरुजघनस्पर्शीनीवीविस्रंसनःकरइत्यादौभुजखंडावलोकनोद्दीपितप्रत्यभिज्ञादिसंचारितगम्य
रोदनाद्यनुभावितरतिरूपःशृंगारःकरुणपोषार्थंप्ररूढःकृतोलंकारएवनतुभावइतिकृतंपरदूषणोद्भावनेन॥तंविभजते॥विभागविषयेभ
रतोप्याहेत्यर्थः॥एवमग्रेपि॥यद्यपिशांतरसस्यापिभावोनिर्वेदोप्यत्रैवगणयितुमुचितस्तथापिसतंत्रेच्छत्वाद्व्यभिचारिष्वगणितइत्याह॥प्रकी
र्तिताइति॥तथाचनिदर्शनस्यनिदर्शनांतरपूर्वकत्वप्रतिपादनेनयथास्थितमेवज्यायइतिसूचितंभक्त्यादयस्तुभावाएवनरसामुनिवचोगौरवादित्या

द्यग्रेव्यक्तीभविष्यति॥रतिंलक्षयति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. तत्रतेषुमध्ये॥इष्टसाधनवस्त्वालंबनायासमीहातज्जन्यामनोविकृतिर्मनोविवर्तइत्यर्थः॥सचापेक्षात्मकंज्ञानंतज्जन्यःसंस्कारोवेत्यन्यदेतत् नौका
७ ॥एवमग्रेपि॥यत्विष्टवस्तुसुखमित्याचक्षते॥तद्रूस्तुपदानर्थक्यादुपेक्षणीयं॥किंचसुखस्समीहाजनितमनोविकृतेःसुखाकारतयानस्त्या
त्मकत्वंतथासतिशृंगारेरतिस्थायित्वानापत्तेः॥सुखानवभासेपिविप्रलंभशृंगारेस्त्रीपुंसयोरेवसमीहाविषयत्वात्॥सांनिध्येसुखेकालवत
रतींनवारयामः॥प्रतियंतिचात्रभवरसिकाः॥सखिसंचरत्तुयथेच्छंमयिवामोवादक्षिणोवास्तु॥श्वासइवप्रेयान्मांगतागतैरेवजीवयति॥अत्र
तदीययथेच्छसंचाराशंसयासुखानुद्देश्यत्वमभिधायश्वासइवेत्यादिनापरमप्रेमास्पदताप्रेयस्यभिहिता॥फलेच्छाधीनोपायेच्छातिरिक्तमनो
विकृत्यनंगीकारेतुसमीहांतेनेवोक्तरीत्याविवक्षितार्थलाभेशेषवैयर्थ्यमित्यलमाग्रहेण॥अपरिपूर्णेति॥रसभावानापन्नेत्यर्थः॥तथाचस्त्री

साचक्वचिद्दर्शनेनक्वचिच्छ्रवणेनक्वचित्स्मरणेन॥यथा॥चक्षुर्यस्यकृषीवलोनिगदितंपीयूषपाथोधरोभूसंज्ञापरिचारि
कास्मजनिस्फीतंस्मितंदोहदं॥संतापंतरुणार्ककर्कशरुचिंनिश्वासवाताहतिंकस्मादेषसहिष्यतेसखिसचप्रेमद्रुमःकोमलः॥

पुंसयोरन्योन्यालंबनःप्रेमाख्यश्चित्तवृत्तिविशेषोरतिरितिफलितं॥अत्रसर्वेषुस्थायिभावलक्षणेष्वपुरुषत्वार्थविशेषणादृसेषुनातिव्याप्तिरिति
बोध्यं॥स्थायिस्वरूपनिष्पत्युपायदिशंदर्शयति॥नचस्त्रजनकानुभवेनस्मरणंगतार्थमितिवाच्यं॥तदानींवासनाविशेषाभावेनतदनिष्प
त्तेरित्यग्रेव्यक्तीभविष्यति॥हेसखिसएषोसंतापादेयत्वेनानुभूयमानोतएवकोमलःसंभाव्यमानबहुविघ्नःप्रेमद्रुमःप्रेमैवद्रुमःक्रमवर्द्धिष्णु
त्वात्तरुणार्ककर्कशरुचिंमध्यान्हजृंभमाणचंडांशुचंडंसंतापंपंचेषुज्वरंनिश्वासवाताहतिंचकस्मात्कस्यबलात्सहिष्यतेसोढुंशक्नुयात्स रामः
कोयस्यचक्षुःकृषीवलोमनोभूस्याकर्षकत्वान्निगदितंवाक्पीयूषपाथोधरःप्रेमवर्धकतयाऋजुतारूपामृतपरिपूर्णत्वाद्भूसंज्ञापरिचारिचारि ७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काद्भुतरसपरिच्छेद्यतयागोपकत्वादंतर्भावप्रकाशकतयास्फीतंरत्यातिकरंस्मितंदोहदमकालेपिस्वेच्छाविहाररूपफलसंपादकत्वादि
तिभावः॥ यत्तुपुनरागमनमंथरंप्रियंप्रतिसखींप्रेषयितुकामायानायिकायावचनमिदंनोदाहरणंसंगच्छतेयतःकस्मात्सदगम्यचिंता
दिभिःसंचारितोनिःश्वासाद्यनुभावितोनायिकागतोविप्रलंभशृंगारएवप्रतीतिपथमवतरतिनस्थायिभावमात्रं॥नचतथापिविभावानु
भावव्यभिचारिसंयोगाद्रसनिष्पत्तिरितिसूत्रेमिलितानांव्यंजकत्वोक्त्यानात्ररसप्रतीतिरालंबनस्यनायकस्यानुपादानादितिवाच्यं॥तस्या
क्षेपादेवलाभात्॥नचचिंताश्वासादेर्विप्रलंभकरुणभयानसाधारण्येनैकतरालंबनाक्षेपानियमइतिवाच्यं॥चक्षुर्यस्यकृषीवलइत्यादि
नानायिकाकृतसादरावलोकनाकृष्टमनःप्ररूढप्रेमद्रुमादिप्रतिपत्त्यासहकारिण्यानायकस्यैवाक्षेपादन्यत्रहास्याभिव्यंजकस्मितस्यात्यं
तंप्रतिकूलत्वात्॥आक्षेपादपिरसप्रतीतिरालंकारिकधुर्यैर्मम्मटभट्टैः॥वियद्दलिमलिनांबुगर्भमेघंमधुकरकोकिलकूजितैर्दि
शांश्रीः॥धरणिरभिनवांकुरांकुटंकाप्रणतिपरेदयितेप्रसीदमुग्धे इत्यादावालंबनोद्दीपनरूपविभावमात्रस्य॥तथा॥परिमृदितमृ
णालीम्लानमंगंप्रवृत्तिःकथमपिपरिवारप्रार्थनाभिःक्रियासु॥कलयतिचहिमांशोर्निष्कलंकस्यलक्ष्मीमभिनवकरिदंतच्छेदपांडुःक
पोलइत्यादावंगमालिन्याद्यनुभावमात्रस्य॥तथा॥दूरादुत्सुकमागतेविलुलितंसंभाषिणिस्फारितंसंश्लिष्यत्यरुणंगृहीतवसनेकिंचा
चितभ्रूलतं॥मानिन्याश्चरणानतिव्यतिकरेबाष्पांबुपूर्णेक्षणंचक्षुर्जातमहोप्रपंचचतुरंजातागसिप्रेयसीत्यादावौत्सुक्यादिविशेषणव्यं
ग्यानामौत्सुक्यलज्जाहर्षकोपासूयाप्रसादानांव्यभिचारिभावमात्राणामुपादानेप्यभ्यधायिकिंपुनर्द्वयोरुपादानेसतीति॥तन्न॥प्रकृ
तेकोमलपदेनानौचित्यप्रतिभानपुरःसरमुद्दिश्यतयानायकरतिमात्रतात्पर्यनिर्णायकेनाप्याक्षेपमूलसंतापासह्यत्वरूपविधेयता
सर्पोन्यथानुपपत्तिशैथिल्यप्रतिपादकेनझटित्याक्षेपासंभवात्तदेतदभिप्रेत्याह॥कोमलपदादिति॥अप्रकर्षद्योतकादित्यादिः ॥

CC-0: Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. नायिकानिष्ठप्रकृष्टरत्यादेर्व्यक्तिर्हिनिरुक्तसामग्रीसमाजाधीनाभवति॥असाधारण्यात्साधारणस्यसातुसाधारणेनैवसंभवंतीनतथेति नौका
८ भावः॥एवमग्रेपिनचकोमलपदाभावेपिप्रेम्णःस्वशब्दोपात्तत्वाद्भूमनाख्यदोषेणरसत्वाभावेस्याप्युदाहरणंसंगच्छतएवेतिवाच्यं॥स
न्नेत्रयाणामेवोपादानेनदोषस्यरसत्वविरोधेमानाभावादित्याशयात्॥तस्मादत्रासाधारणोक्तान्यतरानुपादानेप्येतादृशोक्तान्यतराक्षेप
बाधकमप्युपन्यस्तमस्तितदेवस्थायिभावोदाहरणमितिमंतव्यं॥हासंलक्षयति॥कुतूहलोद्देश्यकंयद्वचनादिवैसादृश्यमित्यर्थः॥कुतू
हलेतिविशेषणव्यावृत्तिंस्पष्टयति॥नचकुतूहलोद्देश्यकादपिवचनवैसादृश्यात्कदाचिद्भयक्रोधयोःसंभवात्तत्रातिव्याप्तिर्दुर्वारैव॥कुतूहल

कोमलपदादपूर्णता॥कुतूहलकृतवचनवेषवैसादृश्यकृतोमनोविकारःपरिमितोहासः॥वचनभेदवेषभेदकृतेभयक्रो
धवानातिव्याप्तिस्तत्रकुतूहलकृतत्वाभावात्॥यथातातचरणानां॥आगच्छन्नगरोपकंठमिलितैरावेष्टितोबालकैःशुद्धांते
परिचारिकाभिरचिरंसोल्लासमावेदितः॥साकूतंसकुतूहलंबलिवधूवृंदेपुरोदापयत्यन्नंकिंचिदुदंचितस्मितलवःपायात्सवोवा

फलोपहितत्वविवक्षयातिव्याप्त्युद्धारेपिकुतूहलपदार्थस्यहासस्यैवस्वलक्षणेनिवेशादात्माश्रयोदुर्वारएव॥मुखविकासाद्यनुभावजनकस्यवै
सादृश्यस्यान्यसाधारण्येऽतिप्रसंगोऽसाधारण्येऽप्रसंगोदलांतरवैयर्थ्यंच॥अन्यसामग्र्याअन्यानुपधायकतयाव्यक्त्यंतराप्रसंगवारकजातिवि
शेषपरिचयायैवदलांतरमित्यपिनयुक्तं ॥कार्यापरिच्छेदेसामग्रीपरिच्छेदासंभवादितिवाच्यं॥यतोविकासाख्यचित्तवृत्तिविशेषे
निरुक्तविशेषणतात्पर्येणवचनविकारदर्शनजन्माविकासोहासइतिफलितं॥इत्थंचहर्षातिव्याप्तिशंकावारणायैवदलांतरमित्येषादिगुत्तरत्रा राम:
प्यनुसंधेया॥अन्यदीयोदाहरणोपन्यासेऽस्मत्पद्येनेत्यादिग्रंथशेषाविरोधमुपपादयति॥नगरोपकंठमिलितैर्ग्रामसीमनिसमुदितैर्बालकैः ८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिशुभिःकौतुकदिदृक्षयावेष्टितोवलयितआगच्छन्नचिरंदर्शनसमकालमेवपरिचारिकाभिःकिंकरीभिःशुद्धांतेसरलांतःकरणांतःपुरस्थव
लिवधूवृंदविषयेसोल्लासंसहर्षमावेदितःकथितस्तथाबलिवधूवृंदेसाकूतंतदीयोदंतपरीक्षागर्भंसकुतूहलंतदाकृतिसमवलोकनजनि
तकौतुकपुरःसरंचयथाभवतितथापुरःप्रथममनल्पंदापयतिसतिकिंचिदुदंचितस्मितलवःस्वयंबलिप्रदेयत्रैलोक्याभिसागृहीतवेषायचेटी
हूराप्रत्तात्ममात्रेणसंभावनादीषदुल्लसितोहासात्रुभावभूतकिंचिदास्यस्पंदोयस्यताहृशःसवामनोवोयुष्मान्पायादित्यर्थः॥अत्रयद्यपि
वामनदर्शनजन्मान्नदानाद्यनुभाव्योहासःपरिपुष्टोदृश्यते॥किंचवामनमुखविकासेनाक्षिप्तविभावादिनाचवामनगतोपिहासःपरिपूर्णोव
क्तुं—शक्यस्तथापिलवपदप्रकाशितापरिपूर्णतैवप्रागुक्तयुक्त्यावामनगतहासेविश्राम्यतीतिभवत्युदाहरणसंगतिरित्याह॥एकस्यापू

लवपदाद्पूर्णता॥इष्टविश्लेषजनितोरत्यनालिंगितःपरिमितोमनोविकारःशोकः॥नचेष्टविश्लेषजनितविप्रलंभशृंगा
रस्यकरुणरसत्वापत्तिस्तस्यरत्यालिंगितत्वात्॥नचरतिःप्रीतिस्तयाविनाशोकोपिनोत्पद्यतेतथाचासंभवइतिवाच्यं॥

र्णत्वेतात्पर्यग्राहयतालवपदेनव्यंजकांतराक्षेपमूलशैथिल्यंकृतंन्यस्याप्यपरिपूर्णत्वेतात्पर्यग्रहपूर्वकंव्यंजकांतराक्षेपमूलशैथिल्यंतेनैवा
नुमन्यतेचेत्तर्हितत्रापिननोविद्वेषइतिध्वनयितुंसामान्यतएवापरिपूर्णताकथिता॥शोकंलक्षयति॥अत्रापीष्टोपलक्षणं॥तेननतदिष्टाभा
वप्रतिपादकतन्त्रतन्त्रेत्याद्यग्रिमग्रंथोपिसंगच्छतइतिबोध्यं॥मनोविकारोवैक्लव्याख्यः॥रत्यनालिंगितइत्यस्यप्रयोजनंशंकोत्तरभावेनस्पष्टय
ति॥नहीत्यर्थः॥अत्रेष्टाविशेषणं॥तेनननबाधसंशयस्येत्याद्यग्रिमग्रंथविरोधः॥प्रीत्यसमानविषयत्वस्यप्रीत्यप्रयोज्यत्वस्यवारत्यनालिंगितपदार्थत्वे
शोच्यमानस्यापिप्रीतिविषयत्वात्तद्गोचरमनोविकृतेस्तत्प्रयोज्यत्वाच्चासंभवइत्याशंकते॥इष्टसमीहाजनितमनोविकृतेरनंगत्वंरत्यनालिंगितत्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र-त मृतएवमृतेजीवनाशादशायांतथाविधरत्यांवैक्लव्यस्यगुणीभावेननिरुक्तरत्यनालिंगितत्वाभावाद्विप्रलंभशृंगारोजीवत्स्वपिमृतत्वनिश्चयद नौका
९ शायांनिरुक्तवैक्लव्यस्यतथाविधरत्यनालिंगितत्वात्करुणोपिनिर्वहतीत्याशयेनोत्तरयति॥अयंभावः॥तद्विषयेच्छांप्रतितद्विषयेभावीष्ट
साधनताबुद्धिःकारणं॥नचमृतेभावीष्टसाधनताबुद्धिःसंभवतीतिकुतस्तत्रसमीहाकुतस्तरांतज्जन्यामनोविकृतिःकुतस्तमांविश्लेष
जनितमनोविकृतेरुक्तरत्यालिंगितत्वमिति॥कादंबर्यांमहाश्वेतायाइतितुचंद्रमंडलाविर्भूतमहापुरुषकृतसमाश्वासनसंभावितपुंड
रीकपुनरुज्जीवनाशाविरहसमानकालिकसंजातमहाश्वेताचित्तवैक्लव्याभिप्रायेणातएवतादृशपुरुषकृतसमाश्वासनसमनंतरभाविनि
चंद्रापीडेनसाक्षात्सहमहाश्वेतायाःसंलापेविप्रलंभोनत्वेरुदाहृत इतिनान्यतराप्रामाण्यंशंक्यं॥निरुक्ताशयंप्रकटयति॥जीविताशाजी

इष्टसमीहाजनितमनोविकृतेरतेरुक्तत्वात्॥कुमारसंभवेरत्याःकादंबर्यांमहाश्वेतायारघुवंशेजस्यप्रलापेकरुणएवर
सः॥तत्रतत्रबाधनिश्चयेनेष्टवस्तुसमीहायाअभावात्॥यत्रचमृतएवजीविताशातत्रशृंगारएवरसः॥बाधसंदेहस्यग्रा
ह्यसंदेहपर्यवसिततयासमीहायाअप्रतिबंधकत्वात्॥

वनसंदेहः॥ननुजीवनसंदेहस्यमरणकोटितयामृतत्वेनावगतेभावीष्ट
साधनताग्रहाधीनसमीहाजन्यमनोविकृतिःकथंभवितुमर्हतीत्यतआह॥तथाचजीवनाशादशायांतत्रभावीष्टसाधनत्वाभावनिश्चयोनसं
भवत्येवेष्टसाधनत्वाभावसंदेहश्चेष्टसाधनत्वसंदेहात्मकएवेयांस्तुविशेषोयदेकत्रेष्टसाधनत्वेनापरत्रेष्टसाधनत्वाभावाभावत्वेनावगत
भवतीष्टसाधनतासंदेहेत्विच्छासंभवत्येवकथमन्यथायुद्धादौप्रमांसःप्रवर्ततेनिवर्ततेचयदावागेरित्यादि॥केचित्तुयथामृतत्वेननिश्चितेए रसः
वकरुणस्तथाजीवितत्वेननिश्चितेएवविप्रलंभः॥इतरथातुतथाविधसंदेहेकरुणावांतरभेदएवकिंनोरीकृतआयुष्मतातस्मादेकतरएवांतर ९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भेदत्वस्यविनिर्गंतुमशक्यत्वात्तत्रकरुणविप्रलंभाख्यंरसांतरमेवसमामनंति॥तन्न॥यतःशृंगारस्यायिभावभूतायारतेर्वियोगकालीनत्वाद्वि
प्रलंभशृंगारोदुर्वारः॥करुणस्यायिभावस्यरत्यनालिंगितशोकस्यासंभवाच्चकरुणोदुर्वचइतिपुनःसूक्ष्मदृशाविवेक्तव्यंसुधीभिरित्याह॥मृ
तेतत्वेननिश्चिते॥जीवतोस्तत्त्वेनज्ञातयोः॥उक्तार्थेप्राचीनसंमतिमाह॥अन्यथाजीवनाशाविरहपर्यंतप्रतिप्रस्तुपयुक्तोत्तरार्द्धेनुधावनस्या
नर्थक्यापत्तेः॥अयीतिहेजीवितनाथजीवस्यय्ययीतिदैन्यमभिव्यंजयच्छोकंप्रस्तौतीत्यभिधायोत्थितयातयारत्यापुनरपिक्षितौपृथिव्यांपु
रुषाकृतिहस्तपादविवेकपुरःसरंहरकोपानलभस्मकेवलंददृशेनतुजीवनाशापीतिभावः॥यश्चविप्रलंभशृंगारेकरुणात्मकत्वव्यपदेशः

9 तथाचयूनोरेकतरस्मिन्मृतेप्रलापःकरुणरसोजीवतोर्विश्लिष्टयोःप्रलापःशृंगाररसः॥अतएवरसरत्नदीपिकायांकरुण
रसोदाहरणमयिजीवितनाथजीवसीत्यभिधायोत्थितयातयापुनः॥ददृशेपुरुषाकृतिक्षितौहरकोपानलभस्मकेवलं॥ननु
विप्रलंभशृंगारस्यपूर्वानुरागमानप्रवासकरुणात्मकत्वाज्जीवतोरपिविप्रलंभस्यकरुणरसत्वमायातमितिचेत्सत्यं॥तत्रक
रुणरसस्यांगत्वेनभासमानत्वात्करुणात्मकत्वव्यपदेशः॥ सोप्यंगभूतचित्तवैक्लव्यकृतएव॥नचैवंतुल्ययुक्त्यासंदेहस्थलेरतिपुष्ट

वैक्लव्यस्यापिवक्तुंशक्यतयायत्रचजीविताशातत्रशृंगारएवेत्यवधारणासंगतिरितिवाच्यं॥रतिशोकयोरतेरेवप्राधान्यंवस्तुस्वभावादित्याशय
त॥यद्वितथागुणप्रधाननियमोनानुमन्यतेतर्हिवैक्लव्यपुष्टारतिर्विप्रलंभोरतिपुष्टवैक्लव्यंकरुणइतिव्यवस्थैवसत्स्थेतिवक्तुमुपक्रमेत
॥पूर्वानुरागेति॥संगमप्राग्भावहेतुकेत्यर्थः॥अयमेवाभिलाषहेतुकइत्युच्यते॥मानेति॥अत्रापिपूर्वेतिसंबध्यतेतथाचेर्ष्याप्रणयान्यतरहे
तुकेत्यर्थः॥अयमेवेर्ष्याहेतुकइत्युच्यते॥प्रवासेति॥प्रवासज्ञानहेतुकेत्यर्थः॥अयमेवप्रवासहेतुकइत्युच्यते॥करुणात्मकत्वादिति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथेर्ष्याप्रवासहेतुकौयौसंगमपूर्वकौविप्रलंभौतद्व्यतिरिक्तयत्किंचिद्गुर्वादिलज्जाप्रभवःसंगमपूर्वकोविप्रलंभोविरहहेतुकोगीयते
तथातथाविधविप्रलंभद्वयकारणातिरिक्तबलवत्तरकारणप्रभवःसंगमपूर्वकोविप्रलंभःकरुणशृंगारइत्युच्यतेइतिकरुणात्मकतया।
व्यवहारादित्यर्थः॥एतेषामुदाहरणानिग्रंथकृदेवाग्रेदर्शयिष्यति॥विरहज्वरमूर्छयावियोगसंभूतसंतापातिशयप्रयुक्तचित्तवैक्लव्ये
नपतंतींलुठंतींनयनेनकर्त्राअश्रुजलेनकरणेनसिच्यमानांरतिंविनिःश्वसंतींसमवेक्ष्यशंभोःकरुणाकुड्मलितासंजातकुड्मलाबभूवेत्य
र्थः॥अत्रयद्यपिविध्वस्तकामजन्यमश्रुपातगात्रविक्षेपाद्यनुभाव्यंरतिमनोवैक्लव्यंपरिपुष्टंतथापिविध्वस्तकामप्रियाविभावितंशिवचित्त

यथाविरहज्वरमूर्छयापतंतींनयनेनाश्रुजलेनसिच्यमानां॥समवेक्ष्यरतिंविनिश्वसंतींकरुणाकुड्मलिताबभूवशंभोः
कुड्मलितपदाद्पूर्णता॥अवज्ञादिकृतःप्रमोदप्रतिकूलःपरिमितोमनोविकारःक्रोधः॥प्रमोदप्रतिकूलइतिविशेष
णाद्दशमुखदुर्वचनावमानितस्यरामस्यवीररसेनातिव्याप्तिः॥यथापरशुरामवाक्यं॥नाद्यारभ्यकरोमिकार्मुकलताविन्य
स्तहस्तांबुजःकिंचित्पाटलभासिलोचनयुगेतावन्निमेषोदयान्॥यावत्सायककोटिपाटितरिपुस्कंधापालमौलिस्खलन्मज्जामा
ल्यपतत्परागपटलैर्नामोदिनीमेदिनी॥ वैक्लव्यमपरिपूर्णमेवतात्पर्यविषयइत्यवगमःकुड्मलितपदादेवेत्याह॥अपूर्णतोक्तयुक्त्यापू
र्णतैवसर्वत्रनतुकुत्राप्याक्षेपेणपूर्णतापीतिभावः॥क्रोधंलक्षयति॥मनोविकारइतिप्रज्वलनात्मइत्यर्थः॥प्रमोदप्रतिकूलइत्यस्यव्यावर्त्यंस्पष्ट
यति॥दशमुखदुर्वचनावमानितस्येत्येतेनावज्ञादिकृतत्वमात्रमुत्साहेपीतिसूचितं॥वीररसेनातिव्याप्तिरिति॥तथाचवीरव्यभिचारिभावस्यक्रो
धस्यविवेकरूपप्रमोदप्रातिकूल्येपिक्रोधव्यभिचारिभावकस्यवीररसस्थायिभावउत्साहेप्रमोदप्रातिकूल्याभावान्नतत्रातिव्याप्तिरितिभावः॥एतच्चयुद्धवीरे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समस्तसामानाधिकरण्यभ्रमः कर्तव्यः स्वातन्त्र्याभावादित्युक्तं भवत्येवमग्रेऽपि। अहमद्यसहस्रार्जुनापराधदिवसमारभ्यावधीकृत्य कार्मुकेत्यादि
कार्मुकमेव लतासु स्वाकर्षणत्वात्तत्र विन्यस्तो हस्तो भुजमिव संकोचविकासव्याप्तत्वाद्येन स तथा किंचित्स्फाटलभासी पल्लवो हि स्य किर्मीरि
तधवलद्युति निलोचनयुगे उभयोर्लोचनयोस्तावन्निमेषादयान्पक्ष्माकुंचनारंभान्न करोम्यन्त्रोदयपदेन हेतुवशसंपन्नकार्यस्यानिवार्यत्वे
पिकारणविघटनप्रयत्नेनोत्पत्तिरेव यथा न भवति तथा करोमीत्यर्थः करणान्युत्पत्तिसाचिव्यात्सूच्यते। चिरकालस्याप्युन्मेषनिमेषान्तराले
कृत्वाभिमानेन वर्तमानत्वविवक्षया लट् कियत्कालमित्यपेक्षायामाह यावदिति। मेदिनी पृथिवी सायककोटी त्यादि बाणाग्रविदारितशत्रु
भूतपृथ्वीपतिशिरोविकीर्णमालतीमालाच्युतपुष्परेणुसमूहेरामोदिनी गन्धवती अध्याहार्येन तु भविष्यतीति यावत्सुरनिपातयोर्ल

किंचित्स्फाटलपदाद्पूर्णता॥ शौर्यदानदयान्यतमकृतः परिमितो मनोविकार उत्साहः॥ वीरस्तु युद्धदानदयावीरभेदात्त्रिधा॥

डित्यनुशासनादन्यथाक्रियावश्यंभावप्रत्ययानापत्तेस्तावत्कालपर्यन्तमित्यर्थः॥ अत्रापि गुर्वपराधादिविभावितो विशिष्टप्रतिज्ञाद्यनुभावि
तः क्रोधः परिपूर्ण एव तथापि किंचित्सदंकेवल एव क्रोधे तात्पर्यं ग्राहयति न तु प्रतिनायकाद्यासेपेयापूर्णोपीत्याह॥ न च स्मापालत्वेन प्रतिनाय
को निर्दिष्ट एवेति वाच्यं॥ स्वासाधारणरूपेणानिर्दिष्टत्वात्तस्यैव रसानुगुणत्वाद्व्यभिचारिणोऽनुपादानाच्च न्यूनतायादुर्वारत्वाद्भुजनायाश्चतात्प
र्याधीनत्वादिति कृतं पल्लवितेन॥ उत्साहं लक्षयति॥ प्रतापसमुद्वाद्दैतान्यतमजनित इत्यर्थः॥ एकमात्रोपादानेऽन्यत्राव्याप्तिरिति त्रितयोपा
दाने संभवदुक्त्यन्यतमोपादानं॥ मनोविकार औद्धत्यात्मकः॥ कार्यवैचित्र्यादेव कारणवैचित्र्यं गम्यत इत्याह॥ जगद्विद्रावणो विश्वविद्रावको
रावणः पौलस्त्यो नेत्रस्य चक्षुषोऽभिमुखो गोचरो भविष्यतीत्यतः सेनां वाहिनीं संघटयन्परामृशन्द्युतिं कान्तिं द्विगुणयन्वधं यस्मात्पंधनुश्चमत्का

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. र्यन्नटणत्कारयन्देवो विजिगीषूरघूणांपतीरामउत्साहेसाद्युत्साहात्पूर्वं विचारे उत्साहपूर्वत्वप्रापणायेव भविष्यतीतिलद्युक्तायुक्त वि नौका
११ चारेमुग्धांतःकरणःसज्याविन्यासविधिंविनैवप्रत्यंचारोपणप्रकाररहितएवबाणासनेशरक्षेपकेधनुषिविशिखंपतत्रिणन्यस्तवान्यो
जितवानित्यर्थः॥ यद्यप्यत्रज्याविन्यासविधिंविनाबाणासनेविशिखविन्यासरूपंकार्यंक्रोधमूलकमोहस्यैव।तथापिरावणागमनश्रवणा
नंतरंसेनासंघटनादिरूपेणोत्साहमूलकविवेककार्येणोत्साहोगम्यमानोविचारपदादपरिपूर्णएवगम्यतइतिभवत्युदाहरणमित्याह
॥विचारपदेनानुष्ठेयविवेककालोयंनत्वनुष्ठानकालइत्यर्थनिवेदनात्तत्पदस्यापरिपूर्णत्वतात्पर्यग्राहकतामुख्यतया निर्दिष्टा॥ वस्तुत
स्तुतत्पदघटितसकलविशेषणस्यैवोत्साहावश्यपूर्वभाविक्रोधपर्यवसायिनोपरिपूर्णत्वप्रापकत्वमितिमंतव्यं॥ नन्वत्रश्रूयमाणरावण

युद्धवीरस्योत्साहोयथा॥ सेनांसंघटयन्स्तुतिं द्विगुणयँ श्चापंचमत्कारयन्नेत्रस्याभिमुखोभविष्यतिजगद्विद्रावणोरावणः
इत्युत्साहविचारमूढहृदयोदेवोरघूणांपतिर्ज्याविन्यासविधिंविनैवविशिखंबाणासनेन्यस्तवान्॥ विचारपदादपूर्णता॥

विभावितःसेनासंघटनाद्यनुभावितःक्रोधसंचारितउत्साहःपरिपूर्णएवगम्यतइतिकथंस्याप्युदाहरणतेतिचेत्॥ अत्रसांप्रदायिकाः॥
सूत्रेनिर्वेदादीनामेवव्यभिचारिशब्देनोपादानादत्रचतेषामन्यतमस्याप्यभावेनन्यूनताद्युपरिहरेवेति॥ यत्तुक्रोधोप्यत्रांगइति॥ तन्न
उक्तेनमोहासाधारणकार्येणतथाबाणविन्यासादिनागम्यमानस्यतदन्यतमस्यमोहस्यजागरूकत्वात्॥ वयंतुब्रूमः॥ अत्रश्लोकेपूर्वार्धो
पात्तानिशतंत्रंतविशेषणानिपूर्वार्द्धोपात्तरावणविशेषणान्येवान्यथाचापंचमत्कारयन्नित्यनेनविनैवत्संतस्यविरोधःस्यात्॥ नचोल्लासय रामः
न्नित्येवविवक्षितमितिवाच्यं॥ तथासतिखङ्गमिस्य वक्ष्यत॥ तस्मात्परोत्साहरणासाधारणकारणस्यानुरणनरूपटणत्कारस्यैवचापचमत्का ११

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्तरार्द्धोपात्तानिचोत्साहेत्यादिविशेषणान्युत्तरार्द्धोपात्तरामएवानुयंतीत्यर्थोपिमोहेनेवेतितद्द्वारामुख्यक्रियायांतथैवासत्तेस्तथाचात्रभा
वात्रपादानान्यूनतावसेया॥आक्षेपोपिचविचारपदेनैवप्रतिबद्धइतिविचारपदादिस्पष्टिकृज्ज्ञेवेतिकिमनुपपन्नं॥भृगुनंदनोभार्गवःश
शांकमंडलंशंसुखंश्यतितनूकरोतिसशशःपृषोदरादित्वात्॥कथमन्यथामुकुंमुक्तिंददातीतिमुकुंदइतिव्युत्पत्तिः॥वर्णसाम्यादितिचे
त्॥प्रकृतेपितुल्यं॥शोतिनामैकदेशाद्वा॥इत्थंचशरीरार्थकत्वस्यापितत्रवक्तुंशक्यत्वान्मुख्यक्रियाऽबाधोपि॥शःसुखेकथ्यतेबुधैरित्ये
कास्वरनिघंटोरितितुक्तज्ञःपंथाः॥सदाभूमौसिंहाङ्कितत्वात्सशशशांकोयस्यसशशांकस्तस्यमंडनंमंडोभूषणंचिन्हमितियावत्तस्मात्सत्र
चंद्रमतेदानार्थोपिलाधातुरुपेक्षायांपर्यवस्यतितेनभूमावाकृष्यमाणस्वपदिविनिष्ठासुशशंपरित्यजतितच्चंडलंनिष्कलंकंचंद्रबिंब

दानवीरस्योत्साहोयथा॥आदर्शायशशांकमंडलमिदंहर्म्यायहेमाचलंदीपायद्युमणिंमहीमिवकथंनोभिक्षवेदत्तवान्
दित्सापल्लवितप्रमोदसलिलव्याकीर्णनेत्रांबुजोजानीमोभृगुनंदनस्तदखिलंप्रायशोदृष्टवान्॥पल्लवितंनफलितमित्य
पूर्णता॥ मितिफलति॥केचित्तुभूमंडलेचंद्राकर्षणेभूच्छायापगमान्नैर्मल्यमित्यूचुस्तदुदक्षरत्वादनवगतंसूदनादेयमेवकाव्यवास
नावासितांतःकरणानां॥आदर्शायमुकुरार्थायस्वच्छत्वादनुसत्त्वाच्चहेमाचलंसुमेरुंहर्म्यायगृहार्थंसमृद्धत्वादुच्चत्वाच्च॥द्युमणिंसूर्यं
दीपायप्रकाशार्थंतमोनाशकत्वादक्षीणत्वाच्चभिक्षवेयाचकायमहीमिववसुंधरामिवकथंकिमभिप्रेत्यनोदत्तवान्प्रायकृत्॥तत्रोत्प्रेक्षते
प्रायशोबहुधादित्सेत्यादिदानेच्छयासंजातपल्लवंवर्धमानंयदानंदसंबंध्यश्रुतत्संकीर्णलोचनमेवांबुजंपयःपूरनिमग्नत्वाद्यस्यसतदखि
लंशशांकमंडलादिकंनदृष्टवानवलोकितवानित्यर्थः॥स्वजनकप्रमोदस्यविषयसंपत्तिरूपफलेननफलसंपन्नाभूदित्यर्थः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. तथाचसकलवस्तुविषयकदित्साया विषयसंपत्त्यपगमप्रतिपादकपल्लवितपदग्रहणमनुभावेनुभावकतावैगुण्यप्रतिपत्तिकारकं स नौका
१२ दपरिपूर्णतायामेव पर्यवस्यतीतिभावः॥ जनानां लोकानां दुस्तारेत्यादि तत्तुमशक्याः संसार एव पयोधिरपरिछेद्यत्वात्तस्य पारमिव पारं
परब्रह्मोन्मज्जकत्वात्तस्य प्रापणप्रकारमुपायमालोकयतो गवेषयतः कैटभारेर्नारायणस्य वक्षस्स्थले कौस्तुभकैतवेन महामणिव्या
जेन कृपांकुरो दयालेशः समुथ्थितः प्रादुर्बभूव कथमन्यथा परदुःखापहारकत्वकामप्रपूरकत्वादयो धर्माः कौस्तुभे समर्पितेइतिभावः॥ अ
त्रापि संसारालंबनः कौस्तुभात्मककृपांकुरोनुभावितः परिपूर्णउत्साहो नतात्पर्यविषयइत्यंकुरपदप्रतिपाद्यमेवेत्याह॥ इदं तु बोध्यं॥ राज्यमा
लभ्यतां कस्त्वविपदः संतु भूयशः॥ किं तु सत्यं परित्यक्तुं कंपते मानसं ममेत्यत्र कंपते न तु निवर्तत इत्यपरिपूर्णः सत्यवीरोत्साहोतिरिच्यते॥

दयावीरस्योत्साहो यथा॥ दुस्तारसंसारपयोधिपारप्रकारमालोकयतो जनानां॥ समुत्थितो वक्षसि कैटभारेः कृपांकुरः कौस्तु
भकैतवेन॥ अंकुरोपन्यासादपूर्णता॥ अपराधविकृतर॑ विकृतसत्वाद्विजनितोपरिपूर्णोमनोविकारोभयं॥ नचदानवीरांतर्गत

धर्मवीरोत्साहएवायमिति वक्तुं युक्तं॥ दयावीरोत्साहस्यापि तथात्वापत्तेः॥ एवं बृहस्पतिरसौ शुक्रोवा वावदेवतास्वयं॥ सभायामुपविष्टश्चेत्किं
चिद्वक्तुमुपक्रमेदित्यत्र पांडित्यवीरोत्साहोप्यपरिपूर्णः किंचित्पदादवगम्यते॥ युद्धवीरोत्साहेसौतभवतीति चेत्॥ निंदं तु केचिदपरे प्रजल्पं
तु दुरुत्तरं॥ अहं समांकुरासक्तः प्रतिकर्तुं न शक्नुयामित्यादौ प्रतीयमानेसमावीरोत्साहं क्रांतं भावयसि॥ दयावीरोत्साह इतिचेत्॥ बलवीरोत्सा
हे किं समादध्याः॥ सुरतं शेषागुहायां तु कमठः सेवतां जलं॥ सर्वं जगत्तस्य कोणे गरुत्मान्धर्तुमिच्छति॥ न तु धरतीत्यत्रापरिपूर्णबलवीरोत्साहप्र रामः
तिपत्तेः॥ तस्माच्छृंगारवत्नानारूपाणां वीराणामप्युत्साहा अपि नानाभवंत्येव॥ परंतु प्रकृतग्रंथादिग्रुपदर्शकइति न न्यूनतामावहति॥ भयं लक्ष १२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हासातिप्रसंगनिवृत्तयेसमासस्तुप्रपंचम्यर्थीपराधकृतत्वंफलतोरवसत्वैकस्येविशेषणामितितुनयुक्तं॥व्याघ्रादिदर्शनजन्यभयेव्याप्तेः
किंतुद्वंद्वएवादिपदांतानां॥विवेचयिष्यतेचेदमुपरिष्टात्॥नचविकृतरवकृतहासेतिव्याप्तिरितिवाच्यं॥परमानर्थविषयकत्वेनमनोवि
कारस्यविशेषणीयत्वात्॥तथाचापराधादिजनितोवैकल्याख्योमनोविकारोभयमितिफलितं॥ भीतभीतइवातिशयितभयाक्रांता
नुकालियःकालियनामकःसर्पस्तत्रश्रीकृष्णसमीपेमंदंमंदमतिसंथरमुपसर्तुमनुसर्तुमपसर्तुमितिपाठेपलायितुमुद्यतउद्युक्तः।किं
कृत्वातार्क्ष्यपक्षपवनोपसेवितंगरुत्पक्षतत्रनिर्मितवातवीजितं॥एतच्चश्रीकृष्णापसत्वात्तार्क्ष्यस्यमदपायेस्ववाप्रवर्तनेपिमदपराध

यथा॥तार्क्ष्यपक्षपवनोपसेवितंवीक्ष्यवीक्ष्ययदुनंदनंपुरः॥भीतभीतइवतत्रकालियोमंदमंदमुपसर्तुमुद्यतः॥इष्टोप
न्यासादपूर्णता॥अहृद्यदर्शनस्पर्शनस्मरणजनितामनोविकृतिरपरिपूर्णाजुगुप्सा॥यथा॥शार्दूलशावकचटच्चटपाट्य
मानसारंगशृंगवतिभूभृतिरामचंद्रः॥वासंचकारनवभारतथाजुगुप्सांदुःखेषुदुःखमतिरेवनदुःखितानां॥ प्रभवरोषस्यश्री
कृष्णस्यमदपायकारकोपायगवेषणविलंबोपिनास्तीतितन्मतिमावेदयद्भयंपुष्णातियदुनंदनंयादवंवीक्ष्यवीक्ष्यपरीक्षांकृत्वेत्यर्थः॥अ
त्रश्रीकृष्णापराधविभावितंमंदोपसरणाद्यनुभावितंकालियगतंभयंकेवलमेवतात्पर्यविषयइत्यत्रैवपदमेवप्रमाणमित्याह॥संथयित
लपूर्णचर्वणाविरुद्धमिवशब्देनगम्यतेतेनापरिपूर्णएवभयेतात्पर्यंगम्यतइतिभावः॥जुगुप्सांलक्षयति॥विस्मयनिवृत्तयेहृद्येति॥मनोवि
कृतिरिति॥विचिकित्साख्येत्यर्थः॥रामचंद्रःशार्दूलशावकैस्त्यादिव्याघ्रपोतैश्चटच्चटदितिशब्दानुकूलंयथाभवतितथोन्मूल्यमानमृगविषा
णभाजि॥यद्यपिनकर्मधारयान्मत्वर्थीयइतिनिषेधात्पाट्यमानसारंगशृंगवतीतिनसाधुतथापिबहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरइत्यनेनत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. स्यलाघवमूलकत्वप्रतिपादनाल्लाघवानादरस्य चासुवचत्व इति भाष्यप्रयोगसिद्धत्वात्साधुत्वं ॥ अतएव तज्जन्यजन्यस्य तज्जन्यत्वात् हि शि सौधा
१३ ष्टैर्विशिष्टबुद्धेर्गुरुत्वविशेष्येतद्धि शिष्टबुद्धित्वाच्चैकेनैव विवक्षितार्थप्रतिपत्तिसंभवरूपलाघवमूलकं वचनं ग्रंथरप्रवृत्तौ त्वभिसंधा
यतुल्यवन्मतुवंतान्मतुपं प्रयुंजतेभियुक्ताः ॥ भूरतिपर्वतेनासंस्थितिं चकार तथापि तथा जुगुप्सां न बभारोक्तमर्थमर्थांतरोपन्यासेन द्रढ
यति दुःखितानां संजातदुःखानां पुंसां दुःखेषु दुःखसाधनवस्तुषु दुःखमति दुःखसाधनत्वप्रकाराधीनैवेत्यर्थः ॥ अत्र पात्स्यमानस्यारंगस्य
गादिविभाविता जुगुप्सा परिपूर्णैव तात्पर्यविषय इति न तथा पदादवगम्यत इत्याह ॥ यदि पूर्णा जुगुप्सा तात्पर्यविषयः स्यात्तदा तदुक्तधर्नि

न तथेति पदादपूर्णता ॥ चमत्कारदर्शनस्पर्शनस्मरणजनितो परिपूर्णो मनोविकारो विस्मयः ॥ यथा ॥ युध्यंतमर्जुनं वीक्ष्य
के वा देवा न विस्मिताः ॥ न मेने बहु गोविंदो दृष्टकर्णपराक्रमः ॥ न मेने बह्विति पदादपूर्णता ॥ शृंगारादौ चमत्कारदर्शना
द्यत्र मनोविकृतिरंगतया भासते तत्र शृंगार एव रसः ॥ रोधितादृश्यपर्वतनिवासस्य निबंधो विरुद्धो न तु जुगुप्सास्वरूप एवं त

र्हि रोध इति विरोधसमाधानशिरस्केन न तथेत्यनेन जुगुप्सायामपरिपूर्णत्वे निवेदिते कृतो वशिष्टव्यंजकाक्षेप इति भावः ॥ विस्मयं
लक्षयति ॥ जुगुप्सावारणाय चमत्कारेति ॥ मनोविकार आश्चर्यरूप इति शेषः ॥ अर्जुनं युध्यंतं वीक्ष्य के वा देवा न विस्मिताः संजातविस्म
याः अभूवन् दृष्टकर्णपराक्रमो गोविंदस्तु न बहु मेन इति स्पष्ट एवार्थः ॥ अत्र तथाविधाद्भुतशौर्यवीक्षणविभावितो विस्मयः केवलं ता
त्पर्यविषय इति न बहु मेन इत्यस्यैव विषय इति प्रतिपादयति ॥ यदि पूर्णो विस्मयः कवितात्पर्यविषयः स्यात्तर्हि तदीयचर्वणे बाधकीभू रत्नः
तो निषेधो न निबद्धः स्यादिति कृतो वशिष्टव्यंजकाक्षेप इति भावः ॥ अत्रांगप्रधानभावेनोदाहरणभेदमुपलक्षणतया प्रतिपादयति ॥ शृंगार १३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आदिनाहास्यादिपरिग्रहः॥चमत्कारदर्शनादिस्वप्युपलक्षणमेवनायकादीनां॥अतोनिरंतरावलोकितनायिकायाःसकाशादधिकम
न्यद्विधेर्ब्रह्मणाशिल्पंक्रियानैपुण्यंकिंकीदृग्वर्ण्यतांस्तूयतांकिंवसावेवपरमावधिरितिपर्यवसितवाक्यार्थगतयाचमत्कारोगम्यतेत
स्यावर्णनीयनायिकायादृशोश्चक्षुषोःश्रुतिपंकजादवतंसीकृतकमलाद्वैषम्यंविषमभावमानंदनीरमानन्दाश्रुभावभूताश्रुप्रकटय
त्यनुमितिगोचरतांनयतितस्याअंगश्रियस्तप्तकांचनसंकाशशरीरद्युतेःस्वर्णालंकरणात्कांचनमयभूषणाद्वैधर्म्यविरुद्धधर्मंपुलको
रोमांचोव्यनक्त्यनुमापयतितस्याःपादारविंदश्रियःपादावेवारविंदेविरलांगुलिदलभाक्त्वादारक्तत्वाच्चतयोःश्रीस्तस्याःनूपुरपद्म
रागमहसःपादभूषणखचितपद्मरागकांतेःसकाशादुदग्रुत्कर्षंसिंजितमेवरणितमेववक्तिसूचयतिव्यतिरेकमुखेनेतिशेषः॥कु

यत्रप्राधान्येनभासतेतत्राद्भुतएवरसः॥अंगतयायथा॥वैषम्यंश्रुतिपंकजात्प्रकटयत्यानंदनीरंदृशोःस्वर्णालंकरणा
द्व्यनक्तिपुलकोवैधर्म्यमंगश्रियः॥तस्यानूपुरपद्मरागमहसःपादारविंदश्रियाभेदंसिंजितमेववक्तिकिमतःशिल्पंवि
धेर्वर्ण्यतां॥प्राधान्येनयथा॥ भोनपूर्णःप्रकरोतिशब्दमितिन्यायादितिभावः॥नतुसिंजितमेववक्तीत्यभिधानुःसिंजितादिवे
वहेतुवाक्यंविवक्षितंनतुसिंजिताभावादित्येवंरूपमितिचेदासतेर्नाशब्दमित्युत्तरमीमांसाधिकरणस्यकागतिरीक्षणस्यपक्षीभूत
प्रधानधर्मत्वाभावात्॥स्वप्रतियोगिकाभावद्वाराप्रधानधर्मतातस्मिन्नपीतिचेन्नासौप्रकृतेपाणिपिहिता॥पक्षधर्मतामत्वामनुमितिका
रणताविप्रतिप्रत्यासत्त्यैवतस्यसाधुत्वायालमितिचेत्केनासौविज्ञश्याहूयतेहठवृत्त्यावेतिनकिंचिदेतत्॥इत्थंचनूपुरपद्मरागमह
सस्तस्याःपादारविंदश्रियःसकाशादुदमपकर्षंसिंजितमेववक्तीतिव्याख्यानंप्रक्रमभंगादुपेक्षणीयं॥अधिधरणिपृथ्व्यांसायंविनासंध्याका

र·त· परिवृढोनायकश्चंद्रोयमदृष्टपूर्वः कोपूर्वएवसमुदयत्यभिनवतयालोचनगोचरतांप्रतिपद्यतइतिचमत्कृतेरेवात्रप्राधान्यंकीदृशः सौरभ्य नौका
१४ सुभगः पद्मगंधमनोहरः किंकुर्वन्नच्छांप्रसन्नांज्योत्स्नांप्रकाशमानतयातत्त्वेनाध्यवसितमोजःप्रागुण्यंकिरन्प्रकटयन्किंचस्मारंस्मरस्यध
नुःकौटिल्यात्तत्त्वेनाध्यवसितंभ्रुकुटियुगलंधत्तेतमसांनीलत्वाद्व्यामोहकत्वाच्चतत्त्वेनाध्यवसितानांकुंतलानांविहारंप्रसरणंजगदंधीक
रणरूपस्वच्छंदाचरणात्तत्त्वेनाध्यवसितानिकपोलनिपतनानिनतिरयतिनतिरस्कुरुतेसमप्राधान्यात्स्वयंयथाप्रकाशतेतथातान्यप्य
वभासंतइतिभावः॥एतेनचंद्राद्व्यतिरेकेणरूपकातिशयोक्तेःसंसृष्टिरुक्ताभवति॥निरातंकइति॥राहूपसर्गरहितइत्यर्थः॥एतेनयः
परंनतिरस्कुरुतेसपरस्मादपिनतिरोभवतीतिनिदर्शनाव्यज्यते॥व्यतिरेकांतरमाहपंकेरुहेति॥ष्टशुमध्यतयातत्त्वेनाध्यवसितंलोचन

विनासायंकोयंसमुदयतिसौरभ्यसुभगःकिरन्ज्योत्स्नामच्छामधिधरणितारापरिवृढः॥धनुर्धत्तेस्मारंतिरयतिविहारंनत
मसांनिरातंकःपंकेरुहयुगलमंकेनटयति॥इतिस्थायिभावनिरूपणंनामप्रथमस्तरंगः॥ युगलमंकेमध्येनटयतिचंचलय

तिसत्तुकलंकमितिभावः॥एतच्चशृंगारहास्ययोरप्यंगांगिभावस्योपलक्षणतयाग्रंथकृतोदाहृतं॥यदाहशृंगारादाविति॥अतएवप्रा
धान्येनेत्यत्रापिशृंगाराद्यपेक्षयेतिलभ्यते॥चमत्कारदर्शनादित्यादित्वाद्भुतएवेत्यपिचोपलक्षणमेव॥एवंस्थितेहास्यशृंगारयोरंगांगि
भावउदाह्रियते॥यथाममा॥कुंजेराधिकयाकृतेनमुरलीनादेनगत्वाद्भुतंकृष्णस्तामपिकेटभीकृतवपुःकृष्णसमाश्लिष्टवान्॥नष्टातःकं
गतोधुनेतिगदितेप्रेमातिपातादिवग्लानेस्मिन्स्फुरुषायितातत्तनुसमाविष्टातनूराधिका॥अत्रहास्यःशृंगारेगुणीभूतः॥एवंवैपरीत्यमुदा राम:
हार्यं॥अयमेवनायिकारब्धःशृंगारइतिकथ्यते॥एवंनायकारब्धमपिशृंगारंवृत्तिकृतउदाजह्रुः॥यथा॥त्वंमुग्धाक्षिविनैवकंचुलिकयाध १४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वेमनोहारिणींलक्ष्मीमित्यभिधायिनिप्रियतमेतद्दृष्टिकासंस्पृष्टि॥ तल्पोपांतनिविष्टस्मितसखीनेत्रोत्सवानंदितोनिर्यातः
शनकैरलीकवचनोपन्यासमालीजनइति॥ तेनासौद्विविधोबोध्यः॥ एतदभिप्रायेणैवास्योदाहरणद्वयंवक्ष्यति॥ अधिकमग्रेप्रपं
चयिष्यामइत्यलंप्रसक्तानुप्रसक्तचिंतया॥ इतिश्रीजडुपनामकगंगारामविरचितायांनौकाख्यायांरसतरंगिणीव्याख्यायांप्रथ
मस्तरंगः॥ १॥ अनंतराभिधाननियामिकांनिर्वाहकत्वाख्यांसंगतिंसूचयन्शिष्यावधानायविभावनिरूपणंप्रतिजानीते॥ ननुनि
र्वाहकत्वस्यसंगतित्वेकिंमानमितिचेत्॥ स्थायिभावनिरूपणानंतरंविभावनिरूपणोपयुक्तायाःकिमन्यद्रसचर्वणानिर्वाहकमितिजि
ज्ञासायाविषयत्वमवेहि॥ तदुक्तमभियुक्तैः॥ आनंतर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोह्यर्थःसंगतिरिति॥ विवेचिते

श्रीः॥ अथविभावानिरूप्यंते॥ विशेषेणभावयंत्युत्पादयंतितेविभावाः॥ तेचद्विविधाआलंबनविभावाउद्दीपनविभा
वाश्चेति॥ यमालंब्यरसःप्रवर्ततेसआलंबनविभावः॥

चेदंमणिमालायामस्माभिरितिनेहप्रस्तूयते॥ विभावपदप्रवृत्ति
निमित्तंसूचयंस्तल्लक्षयति॥ विषयताघटितप्रत्यासत्त्यालंबनविभावानामिवज्ञानद्वारकसमानाश्रयताप्रत्यासत्त्योद्दीपनविभावा
नामपिविभावत्वमविशिष्टमितितदन्यतरप्रत्यासत्त्यवच्छिन्नाज्ञानद्वारकप्रत्यासत्त्यवच्छिन्नैववायास्थायिभावनिष्ठाकार्यतातन्निरू
पितकारणत्वंविभावसामान्यलक्षणंमन्वानस्तंविभजते॥ पदप्रवृत्तिनिमित्तप्रदर्शनपुरःसरमालंबनविभावंलक्षयति॥ सर्वंवाक्यं
सावधारणमितिन्यायाद्यमालंब्यैवेत्यर्थः॥ तेनकदाचिद्रतिविषयत्वेप्युद्दीपनविभावेनातिव्याप्तिः॥ तथापिनायिकाभूषणादीनाम
पिकेषांचिन्नियमतोरतिविषयत्वात्तत्रातिव्याप्तिर्यदुक्तंगुणालंकारादिसंभिन्नेत्याद्यतोरसःप्रवर्ततइति॥ यद्विषयकत्वेनेवरसपद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. प्रवृत्तिनिमित्तवांश्चित्तवृत्तिविषयरूपोरत्यादिःस्थायीभवतिसआलंबनविभावः॥नहिकेवलभूषणादिविषयिणीरतीरसपदव्यवहा नौका॥
१५ री॥नायिकाविषयत्वेनतस्यास्तथात्वंतुसर्वसंमतमितिभावः॥अनेनतथैवोद्दीपनविभावोलक्षितः॥यद्यपिरसजनकनायिकाज्ञान
विषयत्वंनायिकायामतिप्रसक्तं॥तथापिप्रकृष्टरसजनकज्ञानविषयत्वमनेनोक्तमितिनकोपिदोषः॥विशेष्यतासंबंधेनयत्ररसस्त
त्रतादात्म्येनालंबनविभावः॥प्रकृष्टरसजनकज्ञानविषयत्वसंबंधेनयत्रप्रकृष्टरसस्तत्रतादात्म्येनोद्दीपनविभावइतिदिगुत्तरत्रापि
सर्वत्रसुधीभिरूह्या॥तत्कालप्रवृत्तचक्षूरागयोःकालमसहमानयोर्नायकयोर्यदनायेअगणितमहिमालंघितगुरुजनवचनस्तनं
धयविरोधी॥इष्टाकीर्तिस्तस्यास्त्वयिरागःप्राणनिरपेक्षइत्यादिभिर्वचनैर्नायिकायाःप्रेमदार्ढ्यमावेदयंतीसखीप्रतिनायकस्यैषा

योरसमुद्दीपयतिसउद्दीपनविभावः॥तत्रालंबनविभावोयथा॥प्राणस्यप्रतिमूर्त्तिःप्रत्यात्मा पुण्यलतिकायाः॥अधि
दैवतंनयनयोःसाममयाकापिसासैव॥ क्तिः॥प्राणस्यप्रतिमूर्त्तिःसदृङ्गिरतिशयप्रेमास्पदत्वात्॥पुण्यलतिकायाःपुण्यमेवल

तानुकंपाविषयत्वात्तस्याःप्रत्यात्मा प्रतिकृतिःस्वर्गाधिकसुखजनकत्वात्॥नयनयोरधिदैवतंसौंदर्यसागरताप्रयुक्तदिदृक्षाविषय
त्वादधिकृतमुद्दिष्टदर्शनवितरणशीलत्वाच्चदैवतंचयाकापिप्राणप्रतिमूर्तिनयावापुण्य प्रत्यात्मत्वेनवानयनाधिदैवतत्वेनवाव्यव
हार्यामममसासैवमदीयतत्तदात्मिकैवसोद्दिष्टनायिकानतुयत्किंचिदुक्तान्यतमात्मिकापिनिरुक्तसकलप्रत्येकासाधारणधर्माणां
सर्वेषामेवतस्यांसमावेशादित्यर्थः॥एतेनसेतिपदत्रयेणव्यामुग्धांतःकरणाःसाममसैवसासैवकैवयोक्तान्यतमेतिदिशान्वयाय रामः
क्लिश्यंतःसमाहिताः॥प्रत्येकंसकलतादात्म्यप्रत्यायकवीप्सायामेवसामंजस्यात्॥विधेयकोटावधिकार्थावगाहिबोधस्याभ्युपगमेतुल्य १५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

युक्तोद्देश्यकोटावधिकार्थावगाहिबोधस्याप्यादरणीयत्वापत्तेश्च॥ दंडे रक्ताभेदस्योद्देश्यपदादवगमेपि विधेयीभूतदंडाभेदस्य रक्तेन
वगमात्समानसंवित्संवेद्यत्वेमानाभावादित्यलं पल्लवितेन॥ शृंगारस्योद्दीपनविभावान्प्रमाणपुरःसरमाह॥ प्रियजन आलंबनसंबंधि
सख्यादिः वस्तुतस्तु प्रियजनोनायकाद्यालंबनमेव भरतसूत्रस्य हि विधविभावसाधारण्यात्तयंत्वस्यैव विवेचनावसरेणालंबनविभा
वस्यप्रदर्शनादुद्दीपनेत्युक्तमिति विभावनीयं॥ सुधादीधितिश्च्रंद्र एव सूत्रधारः प्रख्यापनद्वारानंदोद्दिष्टार्थप्रकर्षकत्वात्सुष्यकेतोनेत्य
तयाध्यवसिततत्तद्विषयालंबना———नालंबनादिशीलतयानटस्यमदनस्य नृत्यारंभविषयांतरानालंबनपुरःसरं नायि

शृंगारस्योद्दीपनविभावाः॥ तत्रभरतः॥ ऋतुमाल्यालंकारैः प्रियजनगांधर्वकाव्यसेवाभिः॥ उपवनगमनविहारैः
शृंगाररसः समुद्भवति॥ चंद्रचंदनादयऊहनीयाः॥ यथा॥ संध्याशोणांबरजवनिकाकामिनोःप्रेमनाट्यनांदीभ्राम्य
द्भृंगविरुतंमारिषःकोपिकालः॥ ताराप्रष्यांजलिमिवकिरन्सूचयन्पुष्पकेतोर्नृत्यारंभंप्रविशतिसुधादीधितिःसूत्र
धारः॥ हास्यस्यविभावाः॥ तत्रभरतः॥ काद्यालंबनालंबनंसूचयन्ननुभावयन्प्रविशतिरंगभूमिगोचरोभवतिकिंकुर्वन्निवता
रापुष्यांजलिंनक्षत्राण्येवपुष्पाणिस्वकृत्वात्परिच्छिन्नपरिमाणवत्तयाप्रकाशमानत्वाच्चतेषामंजलिंविरलंजवनिकापातप्रपातेन
किरन्निवेत्युत्प्रेक्षा॥ संध्येति॥ संध्याकालताम्राभ्रमेवजवनिकाच्छादनपटःपात्रप्रादुर्भावकत्वात्॥ यद्वासंध्यैवशोणांबरस्यजवनिका
नेनैकप्रसरताभंगोपि॥ एतद्व्याख्यानेकोपीत्यस्यवसंतादिरित्यर्थः॥ कामिनोःप्रेमनाट्यनटप्रकटनीयवस्तुनदायत्तत्वात्॥ भ्राम्यद्भृ
ङ्गविरुतंतत्कालमिलन्नलिननिर्गतमधुकररणितंनांदीप्रारंभनियतपूर्ववृत्तिलाकोपिचंद्रोदयोपलक्षितःकालःसमयोमारिषःसूत्रधा

र.त. विपरीतालंकारैर्बाह्वादिभूषणानां पादादावलंकरणैः॥ विकृताचारो ग्रीष्मे वह्निसेवनादिः॥ विकृताभिधानं किंनरेति वक्तव्ये किंनलेय नौका
१६ भिधानं॥ विकृतवेषः परिधानीयप्रावरणं तैः विकृतैरर्थविशेषैः कुब्जवामनपादाद्यैः॥ हसतीति॥ अनेनेति शेषः॥ पद्मातभावितप्य
र्थमिदं हासयतीत्यर्थः॥ एतेन विकृतैरर्थविशेषैरित्यस्योदाहरणमपश्यंतु एतैरिति पदपूरणेनोक्तार्थतात्पर्यकतयातत्पदं व्याचक्षाणाः
परास्ताः॥ अंगवैकृत्यं स्वजलादिकं॥ नटो मायाशिशुकायां बालमुकुंदमूर्तिं नटयत्यवस्कंदति॥ किं कुर्वन्॥ केयूरं बाहुभूषणं घर्घरयन्
क्वणतः क्वणनव्यापारं कुर्वन्॥ अनेन विपरीताचार आवेदितः॥ पद्मा घर्घरः पादभूषणं तत्करोतीति घर्घरयन्॥ तेन विपरीतालंकरणम्

विपरीतालंकारैर्विकृताचाराभिधानवेषैश्च॥ विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः॥ अंगवैकृत्यादय ऊहनीयाः॥ य
था॥ केयूरं घर्घरयन्भ्रमयन्मौलिं विवर्तयन्बाहू॥ नेत्रांचलं चपलयन्नटयति मायाशिशुकायां॥ करुणस्य विभावाः॥ तत्र
भरतः॥ इष्टजनस्य विनाशाच्छापात्क्लेशाच्च वधनाद्व्यसनात्॥ अस्मादर्थविशेषात्करुणरसाख्यः समुद्भवति॥ वधदादिश्चा
दय ऊहनीयाः॥ यथा॥ त्वां पश्यतो भुजगपाशनिबद्धदेहमद्यापि मे यदसवो न बहिः प्रयांति॥ नेत्रे निमालयसि पश्यसि नैव
तावदास्यं मदीयमिति लक्ष्मणयुक्तमेव॥ क्तं भवति॥ मौलिं मस्तकं भ्रमयन्घूर्णयन्बाहू विवर्तयन्नितस्ततः क्षिपन्नेत्रांचलं चक्षु
रावरणपक्ष्म चपलयन्विवलयन्नित्यर्थः॥ अत्र क्वचित्पुस्तके मायाशिशुरिति प्रथमांतपाठो दृश्यते स केयूरं घर्घरयन्निति विशेषणासाम
ञ्जस्यादुपेक्षणीयः॥ इष्टजनस्येति सर्वत्र पंचम्यं तेनेति॥ क्लेशो ज्वरादिः॥ व्यसनं राजोपद्रवादि॥ अत्र करुणरसाख्योऽस्मादर्थविशेषात्समुद्भवती राम:
ति सामान्यवाक्यार्थबोधोत्तरं विशेषाकांक्षायां विशेषवाक्यार्थबोध एवमग्रेऽपि बोध्यं॥ हे लक्ष्मण भुजगपाशनिबद्धदेहं त्वां पश्यतो मे असवो यद्बहि १६

नेप्रयांतितस्माद्धेतोस्त्वंनेत्रेनिमीलयसिपिथत्सेममास्यंनेवपश्यसितद्युक्तमेवेतिरामस्योक्तिः॥नचखड्गोपादानमित्यर्थः॥आयुधाना
मुत्कर्षापकर्षकृताभिभवादीर्ष्यायाइवरौद्रानुसत्तेः॥नचैवमायुधपदोपादानमित्यर्थः॥प्रमादपतितखड्गाभिभवात्तदनुत्पत्तेः॥अभिभ
वश्चपराभवमात्रंतेनवक्ष्यमाणविदारणेननपौनरुक्त्यं॥वैकृतभेदोनादरचेष्टा॥विदारणंनिकृंतनं॥संग्रामसंभवार्थआक्रमणादिः॥
भार्गवंप्रतिकस्यचिदुक्तिः॥हेभार्गवेषातावकीलदीयानिस्त्रिंशधारानिशाखड्गधाराल्लक्षणारात्रिर्विजयतेसर्वोत्कर्षेणवर्त्तते॥धारा

रौद्रस्यविभावाः॥तत्रभरतः॥आयुधखड्गाभिभवाद्वैकृतभेदाद्विदारणाच्चैव॥संग्रामसंभवार्थादेभ्यः संजायतेरौद्रः
॥वैरिदर्शननिर्भर्त्सनादयऊहनीयाः॥यथा॥तन्वतीतिमिरद्युतिकृतवतीप्रत्यर्थिचक्रमथामेषाभार्गवतावकीवि
जयतेनिस्त्रिंशधारानिशा॥युद्धकुड्डविपक्षपक्षविदलत्कुंभीन्द्रकुंभस्थलीभ्रश्यन्मौक्तिककैतवेनपरितस्तारावलिंव
र्षति॥वीरस्यविभावाः॥तत्रभरतः॥उत्साहाध्यवसायादविषादित्वादविस्मयान्मोहात्॥विविधादर्थविशेषाद्वीररसोना
मसंभवति॥विजयबलादयऊहनीयाः॥ यानिशासाम्यप्रतिपादकसाधारणधर्मप्रतिपादनायतांविशिनष्टि॥तिमिरद्युतिंत
न्वतीति॥द्योतमानंतिमिरमंधकारःकार्यकारिनेत्रपटलंतन्वतीपरेषांविस्तारयंतीपुनःकीदृशीप्रत्यर्थीत्यादिप्रतिकूलमर्थयंतितेप्र
त्यर्थिनस्तेषांचक्राण्येवचक्रवाकास्तेषांमथयाकुलयंतीप्राणप्रियवियोगसंपादकत्वात्॥केषस्याकासायायुद्धेत्यादि॥यासंग्रामेसुभ्याना
शत्रूणांसैन्येविदीर्णोयोगजमुख्यगंडस्थलीभ्योनिःपततांमौक्तिकानांव्याजेनपरितःसमंततस्तारावलिंमौक्तिकपंक्तिंवर्षतिविकि
रतीत्यर्थः॥उत्साहयुक्ततामतेविषादाभावाद्विस्मयाभावान्मोहकारणक्रोधाच्चेत्यर्थः॥विविधादुत्साहजनकत्वेनलोकशास्त्रावगतविवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. एषरामोजंभारिदंभापहबाहुवीर्यैर्दृगर्वापहारकबाहुबलोलंकाधिपोरावणःसंयतिसंग्रामेशंकनीयोबलवदनर्थहेतुतयासंभाव नौका
१२ नीयइत्यमुनाप्रकारेणालपंतंहनुमंतंस्मितेरुत्साहसंभवैरुत्तरयांचकारेत्यर्थः॥केचिद्व्यवहारमात्रदसावपुषाकायेनविनयंप्रपो
पसर्पणंवहंतिप्राप्नुवंतिकेपिकेचिच्छास्त्रनिष्णातबुद्ध्यावचसास्तोत्रेणचारुचर्यांशिष्टाचारंचरंतिसंपादयंतिकेपिसंतोमहामहि
मपुण्यशीलाअतिथौयाचकेसमुपागतेप्राप्तेसतिपुलकैःरोमांचैःसपर्यांपूजांपल्लवयंत्यारभंते॥मुरारिःश्रीकृष्णःसमुदंचंतीप्रका
शमानादीपरेखाभिरामादीपकलिकासदृशीद्युतिर्यस्यतंकौस्तुभंयत्नंबभारतद्विरलजाग्रद्भक्तिभाजोनिरंतरोद्बुद्धजनप्रियाःप्रा

युद्धवीरविभावोयथा॥लंकाधिपःसंयतिशंकनीयोजंभारिदंभापहबाहुवीर्यः॥इत्यालपंतंहनुमंतमेषरामःस्मितैरुत्त
रयांचकार॥दानवीरविभावोयथा॥वपुषाविनयंवहंतिकेचिद्वचसाकेपिचरंतिचारुचर्यां॥अतिथौसमुपागतेसपर्यांपु
लकैःपल्लवयंतिकेपिसंतः॥दयावीरविभावोयथा॥कथमविरलजाग्रद्भक्तिभाजोनिशायांतमसिदुरवगाहेप्राणिनोवीक्ष
णीयाः॥इतिकिमुसमुदंचद्दीपरेखाभिरामद्युतिमुरसिमुरारिःकौस्तुभंसंबभार॥ननुस्वनिष्ठउत्साहःकथमुद्दीपनविभा
वइतिचेत्॥

णिनोलोकानिशायांरात्रौदुरवगाहेतमसिसतिकथंवीक्षणीयाद्रष्टव्याइतिमत्वाकिंस्वितिसिद्धविषयाहेतूत्प्रेक्षानि
रूपाधिपरदुःखप्रहारणेच्छारूपांदयांप्रख्याति॥ननूत्साहाध्यवसायादित्यनेनोत्साहस्योद्दीपनविभावत्वमभिमतमाहोस्विदुत्साह
युक्ततामतेरध्यवसायपदार्थस्य॥नाद्यः॥स्वस्यस्वानुद्दीपकत्वात्॥नान्त्यः॥उत्साहयुक्ततामतेरुत्साहसमानाधिकरणत्वात्सवृत्तित्व रामः
नियमेनस्वजन्यत्वेनचानुमापकताध्रौव्येनुभावतायारवौचित्यादित्यभिप्रायेणशंकते॥स्वनिष्ठइत्यनेनानुभावकतायोग्यत्वमादर्शितं॥ १२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्साहइत्युपलक्षणं॥ तन्मुक्ततामतिरित्यपि बोध्यं॥ कथमिति॥ स्वस्यकार्यात्मकानुभावभूतोत्साहयुक्ततामतेश्चस्वकारणत्वासंभवादि
त्याशयः॥ नह्युत्साहयुक्ततामतेः सर्वस्याएवोत्साहजन्यत्वनियमः किंतूत्साहांशे लौकिक्याएवभाव्युत्साहकर्तव्यतामतिरुत्साहांशे
त्वलौकिकी तेन विनैव जायमानोत्साहमुद्दीपयितुं प्रभवत्येवेति तथाभूतमतिविषय उत्साह उद्दीपनविभावो युक्तएव॥ अतएवस्वस्य
स्वजनकत्ववैमत्यपरिहारायैवाध्यवसायपर्यंतं सूत्रितवंतो भरताचार्या इत्यभिप्रायेणोत्तरयति॥ ज्ञायमानएवेत्येवकारेण ज्ञाने स्वज
न्यत्वस्यव्याप्तिपक्षधर्मत्वावगाहित्वस्य चानुमापकतापयिकस्य व्यवच्छेदः॥ इति न विशेषणस्तत्कृतो न विशेषः॥ तथाच पक्षावृत्तेरिव प
क्षवृत्तेरप्युद्दीपनविभावत्वमविशिष्टमेवेति भावः॥ तस्य च नानुभावकता संभवति स्वजन्यत्वस्य स्वस्मिन्नसंभवात्॥ अतएवोत्सा

सत्यं॥ उद्दीपनविभावो ज्ञायमानएवगमकः सचस्वनिष्ठः परनिष्ठोवेति न विशेषः॥ अत्रभावस्तु स्वनिष्ठएवगमक
स्तस्यानुमापकत्वेन पक्षवृत्तित्वनियमादिति॥ होपनीतभानात्मकोत्साहयुक्ततामतेरपि न तथात्वं स्वोपनीतभानस्य स्वाजन्य
त्वात्स्वजन्याया उत्साहलौकिकज्ञानात्मिकाया उत्साहयुक्ततामतेश्च तथात्वमसंभवि व्याप्तिविशिष्टे पक्षधर्मताज्ञानाभावात्तदेतदभि
व प्रेत्याह॥ स्वनिष्ठएवेति पक्षधर्मताज्ञानकारणत्वे विप्रतिपन्नस्य मतं व्यवच्छेत्तुमेवकारः॥ ननूत्साहव्याप्योत्साहयुक्ततामतिमानहमि
ति व्याप्तिविशिष्टवैशिष्ट्यज्ञानं संभवत्येवेत्यत आह॥ तस्येति॥ अनुमापकत्वेनानुमितिजनकज्ञानविषयत्वेन॥ पक्षवृत्तित्वेति॥ पक्ष
वृत्तितया ज्ञायमानत्वावश्यंभावादित्यर्थः॥ अयंभावः॥ भवति ह्युत्साहव्याप्योत्साहयुक्ततामतिमानहमिति तूत्साहांशे लौकिकज्ञानं स
स्मिन्नुत्साहवत्त्वावगाहि तत्कुतः सिद्धौ सत्यां पक्षत्वं न च पक्षत्वं विना पक्षत्वविशिष्टधर्मतया ज्ञानं संभवतीति॥ परवृद्धेरप्रत्यक्षत्वादुत्साह

र.त. तुल्यसामग्रीकत्वात्तद्धेतोरेवास्तु किं तेनेति न्यायात्पुरुषांतरीयानुमापकज्ञानविषयतयापि नोत्साहयुक्ततामतिरजुभाव इत्यास्तां तावत् नौका

१८ ॥ननु निरुपाधिपरदुःखप्रहाणेच्छा दया सा च दुःखद्विष्टसाधनताग्रहे सत्येव तत्प्रहाणेच्छात्मिका संजायते तथा च तत्कृतोत्साहकालेव

श्यं द्विष्टसाधनताज्ञानजन्यद्वेषविषयीभूतं किंचिदिष्टजनसंबंधितया ज्ञातमस्त्येवेति तज्जन्यचित्तवैक्लव्यस्याप्यवश्यंभावे किं दया

याः पार्थक्येनेति शंकते॥करुण एव दयावीरे किं नांतर्भवतीति वेमत्यं परिहरति॥सा चेति॥परकीयदुःखद्विष्टसाधनताग्रहाधीने

च्छारूपा दया चेत्यर्थः॥तथा च केवलकरुणाया अतिरिक्तत्वावश्यंभावे विनाभूतदयायाः करुणेंतर्भावो युक्त इत्याशयः॥ उत्तरयति॥

ननु दयावीरः करुण एव कथं नांतर्भवति निरुपाधिपरदुःखप्रहाणेच्छा दया सा च करुणया विना न संभवतीति चेत्॥

करुणस्य स्थायिभावः शोको दयावीरस्य स्थायिभाव उत्साह इति स्थायिभावभेदेन भेदात्॥ननु दयावीरे करुणरस

प्रतीतेः का गतिरिति चेत्सत्यं॥करुणया विना दयावीरस्यानजुभावात्तत्र करुणाया अजुभावकत्वाभ्युपगमादिति॥भया

नकस्य विभावाः॥ स्थायिभावभेदेन भेदे सति विविक्तदयावीररसप्रतीतिः किं नेत्याशंकते॥इच्छासामग्र्या बलवत्त्वेन प्रथमं दयावीरोत्प

त्तौ सत्यामेव तदनंतरभाविद्वेषविषयीभूतकिंचित्संबंधित्वप्रकारकज्ञानोत्पत्त्या वैक्लव्योत्पत्तेरित्यर्थः॥तथा च लिंगोपहितलैंगिकभान

वादेन सकरुणदयावीररसप्रतीतिनियमोप्युपपन्न इति भावः॥यत्र च वैक्लव्यानंतरभाविनापरदुःखप्रहाणविषयककृतिसाध्यताज्ञानेन दया जनि

ता तत्राप्यसौ न वैक्लव्यकार्यमन्यथासिद्धत्वात्॥दयासामग्रीकाले वैक्लव्यसामग्र्या अनपायेनावश्यंभाविनि वैक्लव्ये तु दयानन्यथासिद्धत्वमेवाध्यवसीय राम:

त इति निगर्वस्तदेतदभिप्रेत्याक्तं करुणया विनेत्यादि॥आस्तां वान्यथासिद्धिर्नैतावतापचीयते किंचिद्यास्माविति वस्तुतस्त्वनुभावकत्वाभ्युपगमाद्धंज १८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दर्शनं ज्ञानमात्रं॥कृतकइतिस्वार्थेकः॥लोकैर्माया हरिर्नृसिंहोव्यालोकिदृष्टः कीदृशउदयदित्यादि॥उद्यत्कांतयः प्रकाशमानाः कठोरा
स्तीक्ष्णायेकेसराः सटास्तेदलंतः स्फुटितायेपाथोधरामेघास्तेभ्यः प्रस्खलंत्यः प्रादुर्भवंत्योयाविद्युतस्तासांदीधितिभिः कांतिभिरकांचनाः
कांचनाः संपद्यंतेतेन श्याकृताजगत्संबंधिनोनत्वेकदिग्वर्तिनोनिःशेषाः सर्वेमहीधरायेनसइत्यर्थः॥तेषामेवात्युच्चतयाप्रथमप्रकाशेनप्र
धानतयानिर्देश्यत्वमभिमतं॥जगच्चनिःशेषभूमीधराश्चेतिगोबलीवर्दन्यायेनभूमीधरग्रहणसमर्थनंतुनिःशेषविशेषणाप्रवृत्यर्थत्वा
पत्यालादरणीयं॥पुनः कीदृशः स्फूर्जदित्यादि॥स्फूर्जन्प्रवृद्धोयः कंठनिनदोगर्जनंतेनभिन्नाविदीर्णायावसुधातस्यास्तेनैवविवरेणप्रवि

तत्रभरतः॥विकृतरवसत्वदर्शनसंग्रामारण्यशून्यगृहगमनात्॥गुरुनृपयोरपराधात्कृतकः सभयानकोज्ञेयः॥बंधुवं
धनश्रवणश्मशानदर्शनादयऊहनीयाः॥यथा॥उद्यत्कांतिकठोरकेसरदलत्पाथोधरप्रस्खलद्विद्युद्दीधितिकांचनीकृ
तजगन्निःशेषभूमीधरः॥स्फूर्जत्कंठनिनादभिन्नवसुधामार्गप्रविष्टद्विजप्रौढाशीर्वचनप्रहर्षितबलिर्व्यालोकिमायाहरिः
॥बीभत्सस्यविभावाः॥तत्रभरतः॥अनभिमतदर्शनेनचगंधरसस्पर्शशब्ददोषैश्च॥उद्वेजनैश्चबहुभिर्बीभत्सरसः समुद्भवति
॥अहृद्यवस्तूनांश्रवणस्मरणादयऊहनीयाः॥ ष्टाः पतितायेद्विजाब्राह्मणास्तेषांप्रौढान्योजस्वीनियान्याशीर्वचनान्यभयतात्पर्येणोच्च
रितानितैः प्रहर्षितोहृष्टजनसंपर्कितोबलिर्नामग्रहणेनामैकदेशग्रहणाद्बलिसद्मयेनसइत्यर्थः॥एतेननृसिंहावतारेबलेरसत्वमुद्रा
वधंतः समाहिताः॥केचित्तुकल्पांतरीयबलेश्चिरंजीविनः सत्तामादायसमादधति॥परेतुलोकोत्तरसंस्थानशब्दतात्पर्यकमसंबंधसं
बंधातिशयोक्तिरूपंप्रकृतविशेषणद्वयंनेपथ्यात्मनिमायाहरौप्रकृतवाक्यार्थकर्मीभूतेयोजयंति॥अत्रपुरुषविशेषेतत्तद्बाहेंद्रिय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. नसर्वस्यसर्वमितिविशेषप्रतिपादनायपृथगुक्तिः॥इदमुपलक्षणमित्याहोद्धेजनैरिति॥न्यूनतांपरिहरति॥श्रवणेत्यादि॥करिणांर नौका
१९ क्तैरेवसिक्तान्यालिंगान्यतएवकुत्सितान्यंगान्येषांगकानियेषांतैः प्रेतानांबटुभिःपुरभिदः शिवस्यपुरोग्रेनृत्यंननर्तेनंसमारभ्यतेक्रिय
तेकिंकृत्वायोधानांभटानामधरैरेवाशोककुसुमैरक्तत्वान्नेत्रैरेवसितैरंबुजैः पुंडरीकैर्नीरक्तत्वाद्दंतैरेवकुंददलैःकुंदकुसुमपत्रैः स्व
कुसमानाकृतित्वात्करैरेवसरसिजैःसंकुचितांगुलिदलभाक्त्वात्पुष्पांजलिंसंपाद्यदत्वापुनःकिंकृत्वाझिल्लीवर्षासुरटंतदिटोरीतिप्रा
च्यभाषयाप्रसिद्धंप्राणिनमेवकर्णयुगमुभयपार्श्वस्थितंवाद्यविशेषद्वयंविधाय॥यद्वाकरिणांकर्णयुगंझिल्लीवाद्यविशेषंविधायेत्यर्थः

यथा॥योधानामधरैरशोककुसुमैर्नेत्रैःसितैरंबुजैर्दंतैःकुंददलैःकरैःसरसिजैःसंपाद्यपुष्पांजलिं॥झिल्लींकर्णयुगंविधा
यकरिणांरक्तावसिक्तांगकैः प्रेतानांबटुभिःपुरःपुरभिदोनृत्यंसमारभ्यते॥अद्भुतस्यविभावाः॥तत्रभरतः॥यत्त्वतिशया
र्थयुक्तंवाक्यंशिल्पंचकर्मरूपंच॥तत्सर्वमद्भुतरसेद्भुतानामसंभवति॥मायेंद्रजालादयऊहनीयाः॥यथा॥उद्दामोद्दाम
माद्यत्प्रतिभटदलनोदग्रजाग्रत्स्वभावःसोयंदेवोमुदेवोभवतुनरहरिस्तारिताशेषविश्वः॥ ॥यत्त्वित्यादितःकार्यगतविशेष
स्यैवोक्त्याकारणगतविशेषासंग्रहः॥एवंतत्सर्वमद्भुतरसैरित्यनेनवास्तविकपदार्थविवक्षयाभासहेतुतयासर्वसंमतेंद्रजालादेरसंग्र
हश्चेतिप्राप्तेपूरयति॥मायातपःसाध्यप्रभावातिशयः॥सयथा॥क्षेमंकेनचिदिंदुपांडुतरुणामांगल्यमाविष्कृतंनिष्ठ्यूतश्चरणोपभोग
सुलभोलाक्षारसःकेनचित्॥अन्येभ्योवनदेवताकरतलैरापर्वभागोत्थितैर्दत्तान्याभरणानितत्किसलयोद्भेदप्रतिद्वंद्विभिरित्याद्यभिज्ञान राम:
शाकुंतलीये॥तारिताशेषविश्वःसकलपरमानर्थविनाशकत्वात्॥उद्दामेत्यादि॥परमोद्भटानामतिशयेहिरुक्तिर्माद्यतांप्रतिभटानांदलने १९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नोदग्रंसातिशयंजाग्रदनुभूयमानःप्रभावःप्रतापोयस्यसतथासोयंनरहरिर्देवोवोयुष्माकंसंतोषायभवतुसकोयस्यप्रौढैःप्रतापैरेवोजोभिरे
वोद्भटाभिर्दुर्निरीक्ष्याभिर्विकटाभिःकरालाभिःसटाकोटिभिःकेसराग्रैःपाटितानांविदारितानामंभोधराणांमेघानामंत्राणीवविद्युतां
कैतवेनमिषेणबहिर्निरगुर्निःसृतानीत्यर्थः॥इंद्रजालंमंत्रशक्तिः॥पंचाशुगोऽरविंदमशोकंचचूतंचनवमल्लिका॥नीलोत्पलंचपंचैते
पंचबाणस्यसायकाः॥इत्युक्तबाणपंचकस्येशःकामःसएवमायिकोमायाप्रधानोमंत्रप्रयोक्तेतियावत्॥व्योम्निगगनस्वप्रांगणसीम्निचत्व
रेसांध्यकिरणंसंध्याकालीनंकिंचिल्लोहितंकिरणंविरलतयाक्वचिद्दृश्यंतदेववेलांचलमाच्छादकंकंथारूपंविस्तार्यप्रसार्य

यस्यप्रौढप्रतापोद्भटविकटसटाकोटिभिःपाटितानामंत्राण्यंभोधराणांबहिरिवनिरगुर्विद्युतांकैतवेन॥इंद्रजालंय
या॥व्योम्निप्रांगणसीम्निसांध्यकिरणंविस्तार्यवेलांचलंध्वांतैःकार्मणपांशुभिस्त्रिजगतीनेत्राणिसंमोहयन्॥तारा
शौक्तिकमौक्तिकानिविहगश्रेणीरवव्याजनाज्झिंझीकृत्यबहिःकरोतिवदनात्स्वंचाशुगोमायिकः॥ ॥इतिविभावनिरूप
णंनामद्वितीयस्तरंगः॥अथात्रभावानिरूप्यंते॥ ध्वांतैस्तमोभिरेवकार्मणपांशुभिर्दृष्टिबंधार्थंविकीर्णधूलिभिःकृत्वात्रिजगती

नेत्राणित्रिलोकीवासिनयनानिसंमोहयन्तत्त्वावगमापटूनिकुर्वन्विहगानांविहायसागच्छतांपक्षिणांसमुदायस्यसंघस्यशब्दव्याजेनझिं
झीकृत्यझिंझीतिमायिकशब्दानुकरणंमायिकशब्दमुच्चार्येत्यर्थः॥ताराशौक्तिकमौक्तिकानिताराएवस्वच्छत्वाच्छौक्तिकमौक्तिकानिशुक्ति
संभूतमौक्तिकानिनतुगजमौक्तिकानितेषांपाटलत्वाद्वदनान्मुखाद्बहिःकरोतिमंत्रशक्तिप्रभावतयालोकान्प्रदर्शयतीत्यर्थः॥ ॥इतिश्रीजडु
पनामकगंगारामविरचितायांनौकाख्यायांरससतरंगिणीव्याख्यायांद्वितीयस्तरंगः॥ ॥तथैवानुभावनिरूपणंप्रतिजानीते॥नन्वविभावेनापिसाध्य
ज्ञानद्वारास्यापिभावानुमितिजननात्तत्रातिव्याप्तिः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानद्वारास्थायिभावजनकत्वस्यापितन्नसर्वसंमतत्वात्स्थायिभावानुमितिजनकज्ञानविषयत्वस्याप्युक्तरीत्यातत्रसंभवादत आह॥अनुभा
वकत्वानुभवजनकत्वा॥प्रकृतेविवक्षितेतिशेषः॥व्यापारत्वकारणत्वंकरणत्वंतच्चज्ञानद्वारकेतन्नास्त्येवेत्यत आह॥ननुफलेनकदाचिदयोगो
नुभावेप्यस्तिनह्यनुभावज्ञानमात्रंचरमकारणंसर्वदाफलायोगस्तुविभावेपिनास्तीत्यतिव्याप्तिस्तदवस्थैव।मैवं॥व्याप्तिपक्षधर्मत्वावगाहिय
द्विषयकयथार्थज्ञानसामान्यमव्यवहितपूर्वत्वसंबंधेनरसानुगुणानुमित्युपहितंतत्वमेवानेनविवक्षितं॥तादात्म्येनव्याप्यनंगीकाराच्चना
लंबनविभावेतिव्याप्तिः॥यथार्थपदेनचोद्दीपविभाववारणं॥प्रतिबंधकासमानकालिकत्वस्यज्ञानसामान्यविशेषणत्वाच्चानुभावेनाव्याप्तिः
विभावानुभावविषयसमूहालंबनस्याप्यनुभावेव्याप्तिपक्षधर्मत्वांशेयथार्थत्वाद्विभावेतिव्याप्तिवारणायसामान्यपदं॥किंचिद्विवज्ञानसामा

येरसाननुभावयंत्यनुभवगोचरतांनयंतितेनुभावाःकटाक्षादयः॥करणत्वेनचानुभावकत्वा॥करणत्वंचफलायोगव्य
वच्छिन्नकारणत्वं॥

न्यमनुभावसमूहालंबनात्मकमेवेतितुनास्तियेनतादृशविभावेतिव्याप्तिःस्यात्॥एवमपितद्व्यक्तित्वादावालंब
नगतेतिव्याप्त्यारसानुगुणोरस्यनुमितिविशेषणमित्यास्तांतावत्॥इदंचदोषविशेषमहिम्नास्वात्मनिशकुंतलाविषयकरतिमद्दुष्यंताभेदाव
गाहिकाव्यार्थभावनाजन्याविलक्षणविषयताशालीबोधोरसइतिवक्ष्यमाणमताभिप्रायेणानुभावलक्षणंपरिष्कृतं॥नदेतदप्यभिप्र
ऐवैतासंकथंज्ञानमिति॥यथाचैतन्मतेनुभावलिंगकस्याप्यनुमितेरसपूर्वसत्तायाआवश्यकत्वंतथातत्रैवप्रपंचयिष्यतइतिबोध्यं॥वस्तु
तस्त्वनुपश्चाद्भवंतीतिव्युत्पत्त्यावच्छेदकतासमवायान्यतरसंबंधावच्छिन्नस्थायिभावनिष्ठकारणतानिरूपितसमवायसंबंधावच्छिन्नकार्यत्व
मनुभावसामान्यलक्षणंबोध्यं॥नव्यास्तुतावदन्यान्यत्वमनुभावव्यवहारविषयत्वंसंकेतसंबंधेनानुभावपदवत्वंवातल्लक्षणमेषारीतिरेवान्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भाव्यमानविभावस्यैवरसत्वेनतस्यचप्रत्यक्षसिद्धत्वादित्याशयः॥ विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरितिसूत्रेमिलितानांत्र
याणामुपादानान्नप्रत्येकंतेषांमध्येकस्यापिरसत्वमितिसिद्धांताभिप्रायेणसमाधत्ते॥कथंत्वानमिति॥बालस्यरसाभिव्यक्तेरभावेनलिं
गजलैंगिकबुद्धेर्वासनाद्यारसाभिव्यक्तावुपयोगित्वादितिवक्ष्यते॥चंद्रादिवत्कटाक्षादीनामपिमनोविकृत्युत्कर्षकत्वस्यादोरक्ताभ
वेन्नारोपुमान्यश्चात्तदिंगितैरित्यादिनाशृंगारतिलकादावभिधानादनुभवसिद्धत्वाच्चविभावत्वमेवयुक्तमित्याशंकते॥त्वानुभवंप्राची

२०

ननुरसेकथमनुभावकापेक्षेतिचेत्॥यतःस्थायिभावःपरिपूर्णोरसस्तस्यचांतरत्वाज्ज्ञापकेनविनाकथंत्वानमित्यनुभा
वकस्यापेक्षणीयत्वात्॥ननुकटाक्षादयःकथमुद्दीपनविभावानभवंतिदृष्टकटाक्षादेःकामिनोमनोविकारःपरिपूर्णोभ
वत्यनुभवसिद्धत्वेनापन्होतुमशक्यत्वात्॥किंचप्राचीनसंमतिरपि॥ईषद्वक्रितपक्ष्मपंक्तिभिरनाकूतसितैर्वीक्षितैरेतैरे
वतवाद्यसुंदरिकरक्रोडेजगद्वर्तते॥अंतःपांशुलहेमकेतकदलद्रोणीदुरापश्रियोदोर्मूलस्यविभावनादिहपुनःक्रूरेकिमा
कांक्षसीत्यादिरितिचेत्॥ नानुभवसंवादेनप्रमाणयति॥हेसुंदर्यनवद्यांगि॥ईषदित्यादि॥किंचिद्वलितानांनेत्रपत्राणांश्रेणीभि
रनाकूतस्मितैः किंचिदाकूतगर्भितहास्यैर्नजोल्याथैत्वाद्वास्मितैर्वीक्षणैर्नपुंसकेभावेक्तइत्यनुशासनादेतैरेवानायाससाधनैस्त्वयाद्यसंप्रति
करक्रोडेहस्तपंजरेजगद्वशिकःपुरुषोवर्ततेत्वदायत्तंभवतीतिभावः॥हेक्रूरेकिंचित्कालवियोगमात्रेणैवातिशयितसंतापदायिनीहेति
मयीत्यर्थः॥अंतरित्याद्यभ्यंतरेधूलिधूसरंहेमकेतकमित्यभूतोपमानिरूपमत्वद्योतनाय॥यद्वाहेमकेतकंगंधफली॥वस्तुतोहेमकेतकमिति
पंक्तिरथपदन्यायेनसुवर्णकेतकमितिप्रसिद्धंविजातीयमेवकेतकमत्राभिधित्सितमितिबोध्यं॥तस्मादलद्रोणीद्रोण्याकारंदलंतयादुरापाश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. कयासादनाम्नी:शोभायस्यतादृशस्यदोर्मूलस्यकक्षायाविभावनादूसनांचलसंस्थापनव्याजेनप्रकाशनात्पुनरधिकंकिमाकांक्षसिसिषाध नौका
२१ यिषसिसाध्यांतरानालोचनादितिभाव:॥स्वव्यधिकरणरसपरिपोषकतयोद्दीपनविभावानामपिकटाक्षादीनांस्वसमानाधिकरणरसानु
मापकत्वादनुभावतापिसंभवतीत्यभिप्रायेणलक्षणद्वयंयोजयन्निष्टापत्त्यासमाधत्ते॥करणत्वेनेति॥व्याप्तिप्रकारकपक्षधर्मताज्ञा
नविषयत्वेनेत्यर्थ:॥विषयत्वेनेति॥प्रकृष्टरसजनकज्ञानविषयत्वेनेत्यर्थ: इतीतिपर्यवसन्नमित्यर्थ:॥तदप्युक्तमनुभवरसिकै:॥ग
र्जतिवारिदपटलेवर्षतिनयनारविंदमबलाया:॥भुजवल्लिमूलसेकेविरहलतापल्लवंसूत इति॥अत्राबलायाविरहंप्रतिवारिदप

सत्त्वं॥कटाक्षादीनांकरणत्वेनानुभावत्वंविषयत्वेनोद्दीपनविभावत्वं॥तथाचनायिकात्मनिरसावभासकत्वेननायिकांप्रति
कटाक्षादयोनुभावास्तेचदृष्टिगोचरीभूता:कामिनोमनोविकारंकारयंतोविषयत्वेनोद्दीपनविभावाइति॥सचानुभाव:कायि
कमानसाहार्यसात्त्विकभेदाच्चतुर्धा॥कायिकाभुजाक्षेपादयोमानसा:प्रमोदादयोनाट्ये चतुर्भुजत्वज्ञानमाहार्य:सात्त्विकारोमां
चादय:॥ दलगर्जनस्यैवतत्कामुकस्यविरहंप्रतितस्याभुजवल्लिमूलसेकस्यपूर्वार्द्धेतांप्रत्यनुभावतयोपात्तस्याप्युद्दीपकत्वमभिमतमि
तिसूक्ष्मदृशांपरामर्श:॥तंविभजते॥उदाहरति॥विकारत्वालिंगिताच्चरमभेदाद्विकारत्वानालिंगितत्वादस्यपृथग्भेदत्वेत्यभिप्रेत्याहभुजाक्षेपा
दयइत्यादि॥प्रमोदादयइति॥यथाचांतरस्याप्यनुभावत्वंतथाग्रेग्रंथकृदेवस्फुटयिष्यति॥चतुर्भुजत्वज्ञानमिति॥चतुर्भुजत्वारोपइत्यर्थ:॥लो
कप्रसिद्धबुद्धिचतुष्कवैलक्षण्यमेवास्यद्वितीयभेदवैलक्षण्येबीजमितिदर्शयितुंनाट्यइत्युक्तं॥यत्तुचतुर्भुजत्वमेवाहार्योनुभावोज्ञानमिति रम:
तुज्ञायमानस्यैवगमकत्वाभिप्रायेणेतिकेश्चिदुक्तं॥तत्सकलग्रंथविरोधादुपपत्तिविरोधाद्ग्रंथकृतोनभिप्रेतत्वाच्चानादेयं॥तथाहि ॥ ॥ २१
४=तथाचभुजवल्लीत्यत्राबलायाइत्यनुषंगंविरहलतेत्यत्रास्माकमित्यध्याहारंचपश्यतामित्यर्थ:

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारणान्यथकार्याणिसहकारीणियानिच॥रत्यादेःस्थायिनोलोकेतानिचेन्नाट्यकाव्ययोः॥विभावाअनुभावास्तत्कथ्यंतेव्यभिचारिणइत्यालंका
रिकैःसर्वैरभ्यधायिनचचतुर्भुजत्वस्यतत्कार्यत्वं॥चतुर्मुखत्वमिवसरस्वतीं दिदृक्षोर्विधेरिवलक्ष्मीमालिलिंगिषोर्विष्णोश्चतुर्भुजत्वंप्रत्यापर्यं
त्यागममूलास्मतिरुपलभ्यतेकिंयेनश्रद्दधीमहि॥पच्चत्तायमानस्यगमकत्वमुक्तमायुष्मतातत्कुत्रपक्षइतिविवेक्तव्यंनतावच्चतुर्भु
जेदेवेदेवदत्तत्वादिलिंगकानुमितेरिवरसानतुगुणत्वापातात्॥नतावन्नायिकादौदृष्टरिपक्षाश्रतित्वात्स्मरतित्वभ्रमविषयस्याप्य
नुभावत्वेविभावतथात्वंदुर्वारंतल्लक्षणेयथार्थपदपरित्यागस्यसहस्तितत्वात्॥सोयमुपपत्तिविरोधः॥ग्रंथकृतारसमंजर्यासखीपरि

शृंगाररसस्यानुभावाः॥तत्रभरतः॥नयनवदनप्रसादैःस्मितमधुरवचःप्रमोदैश्च॥विविधैरंगविकारैस्तस्याभिनयःप्रयोक्त
व्यः॥कटाक्षभुजक्षेपादयऊहनीयाः॥यथा॥मुक्ताहारस्तनकलशयोःकर्णयोःकर्णिकारंमौलौमालापरिभवभयाद्
रएवन्यवारि॥दृष्टेभीष्टेसमजनिपुनःसुभ्रुवोभूषणायप्रातर्वातोत्तरलकमलद्रोहदक्षःकटाक्षः॥ हासउदाहृतः॥आमा

रभित्तिलिखितासुनिवेदयस्वकःसप्रमोदश्रसुमूर्त्तिषुलोकभर्त्तुः॥इत्थंसखीजनवचःप्रतिपद्यसद्यःसीतास्मितद्युतिभिरुत्तरयांच
कारेति॥तत्रसीतायाश्चित्रेरामारोपंविजानतीसखीतेनैवारोपेणरतिमनुमायसमादरावलोकनाशयोज्ञातइतिवक्तुंदृक्कुतिसीताप्यनु
कस्तत्वार्थोज्ञातइतिहसतीत्यर्थः॥अन्यथावैदग्ध्यहान्यापत्तेस्तस्माद्यथास्थितमेवज्यायः॥विविधैरंगविकारैश्चुंबनयोन्त्राबोधकौ
ष्ठप्रदाक्कुंचनप्रभृतिभिःसात्विकभावैश्च॥प्रातरित्यादि॥ईर्षाहूकसितत्वादितरजनभीत्याचंचलत्वाच्चसूर्योदयकालिकस्यवातचंच
लस्यकमलस्यद्रोहेदक्षःसमर्थःसदृशइतियावत्कटाक्षःपुनःकटाक्षएवाभीष्टप्रियतमेदृष्टेसतिसुभ्रुवोभूषणायसर्वातिशयमाधात्

र॰न॰ एवकारश्चवक्तुद्यप्रपयादयतिप्रक्तेत्यादिना॥स्तनावेवकलशौरसुंदूकेोन्मुखत्वात्तयोर्मुक्ताहारः कर्णयोः कर्णिकारं पुष्पंमौलौ धम्मिल्ले नौका
२२ मालास्रचपरिभवभयान्मालिन्यसंभावनायाउद्वेगाहूादर एवन्यवारित्यक्तेत्यर्थः॥हास्यंमुखविकासंयस्माज्जनयेत्तस्मादेवहेतोर्हास्य
पदवाच्योरसोविकृताकारैर्वाक्यैर्लुप्तगद्गदास्सैरंगविकारैः शैथिल्यादिभिर्विकृतवेषैर्वदनलोहित्यादिभिर्ज्ञेयोऽत्रमेयः॥मंदमीषद्धसं
स्यातिकसहास्यपातयापार्वत्याशिशोगजास्यषडास्येवाकिंचिदिति॥ईषन्निमीलन्नयनप्रांतरचनावक्रादृष्टिश्वभ्रुः समारोपितास्यापि
तं॥कीदृशेशिशौ॥ हृदंस्वसमीपवृत्तिशिवाविनाभूतं॥इदंचलिंगविपरिणामेनमणिकलयोरप्यन्वेति॥कपालमंडलंमंडलाकारंकपा

हास्यस्यानुभावाः॥तत्रभरतः॥ विकृताकारैर्वाक्यैरंगविकारैश्चविकृतवेषैश्च॥हास्यंजनयेद्यस्मात्तस्माज्ज्ञेयोरसोहास्यः
॥आस्याधरविवरणकपोलस्पंददृष्ट्याकुंचनादयऊहनीयाः॥यथा॥पात्रीकृत्यकपालमंडलमिदंपीयूषभानोःकलांवर्ती
कृत्यफणामणिंफणिपतेःसंपाद्यतस्मिन्शिखां॥सायंदीपविधिंवितन्वतिशिशौमंदंहसंत्यातयाकिंचित्कुंचदपांगभंगकुटिला
दृष्टिःसमारोपिता॥ लंपात्रीकृत्याऽशरावःशरावःसंपद्यतेतथाकृत्वेतिपात्रीकृत्यतस्मिन्पीयूषभानोश्चंद्रस्यकलां॥वर्तीकृत्येत्यपि
प्राग्वत्॥तस्यांफणिपतेःफणामणिमेवशिखांदीपकलिकांसंपाद्यसायंसंध्याकालेदीपविधिंदीपोद्योजनप्रकारंवितन्वतिप्रकाशयतीत्यर्थः
॥यत्तुतस्माद्यशोदयेत्यर्थंपिलातच्छब्दस्यप्रकृतार्थबोधकत्वयुक्तिरूपोहूलकतयापन्यस्ता॥तत्रविवदंतेबहवः कुतोज्ञापकेनयशोदायाः
प्रकृतत्वंनिरणायि॥श्रीकृष्णस्यमंगलाचरणेमुख्यतयानिर्देशादितिचेत्॥अत्रपार्वत्यर्थकतयातत्पदंकेपिमामंसतेतियशोदापरतयाप्रकृ रामः
तपदंव्याचक्षाणेनभवतायस्मागुदाहृतेप्राणस्यप्रतिमूर्तिरितिपद्येपितत्पदंयशोदापरतयातद्योग्यतासंपत्तयेचममेतिनंदपरतयानम्या २२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्रपार्वतीतात्पर्यग्राहकाभावान्नार्थांतरप्रसक्तिरितिनतथाव्याख्यातमितिवचनंपुनरन्यतात्पर्यग्राहकेदृढतरेजाग्रतितथास्वविवक्षि
तार्थतात्पर्यग्राहकमननुपन्यस्यस्वविवक्षितार्थपरत्वेनतत्सदंव्याख्यातवतोऽतात्पर्यविषयार्थख्यापकत्वमभिमंजयद्दुराग्रहमेवानुरण
नयति॥तद्वाक्यमुख्यतयानिर्देशस्तुतद्वाक्यंगिलेगमकोनवाक्यांतरे॥नापिनैषधादाविवाप्रबंधंमहातात्पर्यंश्रीकृष्णेस्तिसकलश्लोका
नामुदाहरणमात्रपरत्वात्॥तस्मात्कृष्णस्यैववाक्यतात्पर्यविषयत्वंदुर्लभंप्रागेवतुयशोदायाः॥अत्रापिरसेमहातात्पर्यंरसश्चश्रीकृष्णा
त्मारसोवैसइतिश्रुतेरितिचेत्॥ॐ॥रसत्वेनतात्पर्यविषयत्वेकथंयशोदायास्तथात्वं॥रसचर्वणाविभावकत्वसाधर्म्यादितिचेत्॥वस्तु

करुणस्यानुभावाः॥तत्रभरतः॥श्वसनैरुदितैर्मोहैःप्रलापपरिदेवनप्रलयैः॥अभिनेयःकरुणरसोदेहाघातादिभिश्चै
व॥मुखशोषणवैवर्ण्यादयऊहनीयाः॥यथा॥तातेनिर्गच्छतिगणपतौनाकमद्यापितस्यावाचादेव्यास्त्यजतिशिथिलंकं
कणंनैवदोसोः॥ अत्रस्यैवविभावानुभावव्यभिचार्यन्यतमत्वेनतथात्वमविशिष्टमेवेतिविरमत्वाग्रहानिति॥तदपरेनसमंते॥दृग्गो
चरेयशोदायागोविंदस्यशिवःस्वयं॥निवसन्गोकुलेतत्रपालयामासतंविभुमितिपुराणात्त्वदभिमतेदंपदादिसमभिव्याहाररूपगम
कस्यापिसाधारण्यादुभयतात्पर्येपिसामंजस्यंतत्त्वदस्यसंभवतीत्यलमप्रकृतेन॥पुराणमनालोचयतांद्राग्बुद्ध्युपारूढःपुराणालो
चनोत्तरमप्यबाध्यमानःसर्वेषामविप्रतिपन्नोर्थस्तत्पदार्थोऽसाधारणयशोदापरत्वगमकानालोचनेनपार्वतीरूपत्वमेवपर्यवस
न्नमितिबलवत्तरबाधकेदुरपन्हवएवेतियुक्तमुत्पश्यामः॥मोहोविपरीतमतिकार्यं॥प्रलापोऽसंबद्धार्थकोक्तिः॥परिदेवनंदुःखक
था॥प्रलयोनवभासकार्यं॥अत्रगणपतौगणपतिनामकेतातेपितरिनाकंस्वर्गंनिर्गच्छतिसतितस्याःपतिव्रतायावाचादेव्याः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ इदंचस्वबोध्यवाचकसरस्वतीपदवाच्यत्वरूपपरंपरासंबंधात्मकलक्षितलक्षणयाकविमात्रर्थकं॥ यथा॥ अद्यापितिष्ठतिदृशोरि नौका
२३ दमुत्तरीयंधर्त्तुंपुरःस्तनतटास्पतितंप्रवृत्ते॥ वाचंनिशम्यनयनंनयनंममेतिकिंचित्तदायदकरोत्स्मितमायताक्षीत्यत्रममनयनंनयन
मितिवाचमर्थात्तदीयांनिशम्यस्तनतटात्पतितमुत्तरीयंधर्त्तुंप्रवृत्तेसतिमयीतियोग्यतावशाल्लभ्यतेतदायदितिक्रियाविशेषणंआयता
क्षीस्मितमकरोदिदमद्यापिदृशोरत्रापिममेत्यनुषज्यतेपुरस्तिष्ठतीत्यर्थेनयनपदेनस्ववाच्यचक्षुर्वाचकनेत्रपदवाच्यत्वलक्ष्यमुच्यते॥ केचि
त्तुप्रवृत्तेतिप्रथमांतंपाठंकल्पयंतःस्तनतटात्पतितमुत्तरीयंधर्त्तुंयथास्थानंप्रापयितुंप्रवृत्तायताक्षीममनयनंनयनमितिममवाचंपयो
धरप्रविष्टंमदीयंचक्षुःपयोधरपिधानेनापिहितंमाकुर्वित्यर्थिकांनिशम्ययत्स्मितमकरोदिदंममदृशोःपुरस्तिष्ठतीतिवाक्यार्थंवर्णयंतो

अद्याप्यार्द्रीभवतिकुचयोर्नापिपाटीरपंकोनेत्रेनिर्यस्यसितपुनःकज्जलंस्थैर्यमेति॥

नयनपदंमुख्यार्थपरतयैवतत्रयोजयंति॥ दृश्यंतेचैवंविधानिबहून्युदाहरणानि॥ यथामम॥ तववरिपुशिरःपयोजैर्नदीगतैर्वाशुकृत्तनि
जनालैः॥ बाणप्रपीतरुधिरैःकिमनंतःपद्मनाभोभूत॥ अत्रवाहिन्याशुगशिलीमुखपदपर्यायैर्नदीवायुबाणशब्दैःसेनाशरभ्रमरा
विवक्षिताः॥ बाणप्रपीतरुधिरैरित्यनेनकृतनोत्तरमपिबाणसंबंधबोधकेनजयद्रथशिरसइवोदधिपर्यंतप्रापणद्वाराज्ञेनोपसाध
न्यते॥ तथामधुपदपर्यायस्यरसपदस्यपर्यायेणकीलालपदेनसमानार्थकेरुधिरपदेलक्षितलक्षणायाःपरंपरासंबंधःस्ववाच्यवा १८
चककीलालपदवाच्यवाचकरसपदवाच्यवाचकमधुपदवाच्यत्वमित्यन्यैवसरणिः॥ एवंक्वचित्स्वघटकपूर्वपदवाच्यवाचकपदपूर्व राम॰
पदकस्वघटकोत्तरपदघटितसमुदायवाच्यत्वमपिलक्षणायाःपरंपरासंबंधोदृश्यतेयथापंक्तिरथपदस्यदशरथादावित्येषेकादि २३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४७

दोष्णोर्हस्तयोः कंकणमय्यापि पुत्रादेर्हेयत्वनिश्चयेपि शिथिलं सत्तेन पुत्रादिविषयाचिंताद्योतितान त्यजति न मुंचत्यर्थात्तद्धस्तमिति ल
भ्यते तेनाखंडितसौभाग्यमुद्दीर्णं॥ तथा तस्याः कुचयोः पाटीरपंकः सतीभूषणाय कल्पितश्चंदनद्रवो यद्यपि तत्कालनिर्वर्तितोपि नार्द्रीभव
ति तात्कालिकपुत्रादिदुःखविमर्शसंजातदुःखज्वरेण शुष्यतीत्यर्थः॥ निर्यंसयस्यनेन पुत्रादिक्लेशेषसह्यताद्योतिता नेत्रे चक्षुषि पुनरि
ति लक्ष्यैकज्जलं स्थैर्येनैति प्राप्नोत्यश्रुसरत्सुतत्वादित्यर्थः॥ न चैवमालंबनस्य पुत्रादेरनुक्तत्वात्कथं रसप्रतीतिरिति वाच्यं॥ अत्र पदं वक्ष्यमाण
ये यद्गुरुदाहरणद्वयासेप्यत्वादिति कश्चिद्धिहरणुते॥ तत्काव्यनिंदामनादरणीयमेव॥ न हि जीवदालंबनो मृतनिष्ठः शोकः कैश्चिदभ्युपगतः॥
एतेन सहगमनाव्यवहितप्राक्कालीनोयं वृत्तांतस्तथा च भर्त्रालंबनो भार्यानिष्ठः सइति प्रजल्पंतोपि निरस्ताः॥ असामंजस्यात्॥ अत एव निर्यं
त्स्यसि नेत्रे सत्यपि नार्द्रीभवतीति योजना वा तथाऽऽनिर्यंस्यसीत्यकारं प्रश्लिष्य तस्रोष्यहर्षपोषिकानंकाकुर्वीत्यर्थैर्वान्यथैव सामंजस्या
त्तथा हि॥ गणपतौ तातेअत्र भर्तरीत्युक्ते वक्ष्यमाणलक्षणलक्षितः स्वनिष्ठः शोकोनुचित एव प्रतीयेतेति तातइत्युक्तं॥ तेन च वक्ष्यमाण ल
क्षणलक्षितः कविमात्रगतः परनिष्ठः शोकः कविगतप्रधानीभूतस्वनिष्ठकरुणांगतयैव प्रतीयतामिति नातौचित्यमिति सूचितं॥ नाकं निर्ग
च्छति वर्तमानार्थककृत्समभिव्याहृतसति सप्तम्यर्थनिर्गमसमानकालीनत्वं शैथिल्यकल्पनं निर्याणेघन्वेति तस्याः वाचां देव्याः सरस्वत्याः
॥ एतेनालंबनविभावः प्रदर्शितः दोष्णोर्हस्तयोः शिथिलमिति॥ इदं च तत्त्वाख्यानपरं सच्छब्दशक्तिमूलानुरणनव्यापारेणोत्कंठितात्कंठा
पूरणमंथरमित्यर्थमावेदयत्सर्वदैव स्वंभाविस्वगोचरस्मृतिरूपव्यापारघटनया स्वसमभिव्याहृतेन नैव त्यजतीत्यनेन गम्यस्य स्वस
मास्लिष्टपरित्यागनियमरूपस्य लोकोत्तरतदीयकंकणस्वभावस्यांगमात्रस्मरणरूपेण्य भिचारिभावे साहाय्यमाचरति॥ कंकणमय्या
पि बहुकाले व्यतीतेपि नैव त्यजति मामित्यार्थिकं॥ मामित्यध्याहृतकर्मविशेषणमेव शिथिलमिति मंदस्नेहमित्यर्थकमित्यन्ये॥ एवं तस्याः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. कुचयोः पाटीरपंकोद्यापि मयि दुस्तरविपद्विपन्नप्रायेपि सति नार्द्रीभवति न प्रसीदति पुनर्दर्शनपथं नायातीति भावः॥ नार्द्रीभवतीत्यंतवाक्ये नौका
२५ न पाटीरपंकस्यार्द्रत्वमुचितमित्यर्थशक्त्यागम्यते तेन च मातुरेवं दुःस्थे पुत्रे प्रसादः समुचित इत्यर्थो नार्द्रीभवतीति पदशक्त्या द्योत्य
ते तेन चार्थशक्त्यापि न प्रसीदतीति तद्विषये आर्द्रताभिव्यज्यते॥ तथानेन निर्दयस्य यस्य त्वद्विषयकवात्सल्यसंभूताश्रूणि यदा
कदाचिदपि सति॥ एतदभिप्रेत्यैवाद्यापीत्यत्र नावर्तितं कज्जलं जडत्वाल्लोकः सुभगायाविहितत्वाच्च शास्त्रतोपि युक्तस्य मयुनरि
ति कैमुतिकन्यायं द्योतयति॥ मम तु पयो निर्याणनिदानाकलनसमकालसमुचितप्राणनिर्याणस्य प्राणिनो द्यापि कृतः स्थेमेति॥ स
तेनोद्दीपनविभावउक्तः॥ स्थैर्येनेति॥ अन्नैतीत्यनेनापरोक्षवन्निर्देशेन मोहकृतविपरीतमतिकार्यमावेदितमिति॥ मम॥ गतमपरिहा

रौद्रस्यानुभावाः॥ तत्र भरतः॥ नानाप्रहरणसंकुलशिरःप्रकंपैः कराग्रनिष्पेषैः॥ घोरैरर्थविशेषैस्तस्याभिनयः प्रयोक्त
व्यः॥ भ्रुकुटिदंतोष्ठपीडनादयऊहनीयाः॥ यथा॥ येये भीमेन बद्धभ्रुकुटिघनरवं दंतनिष्पीडितोष्ठं विक्षिप्ताव्योम्नि विंध्या
चलचटुलचमत्कारभाजः करींद्राः॥ तेषामेषां कपोलादिव भयविधुनात्काचिदुड्डीयलग्ना बिंबे पीयूषभानोर्मधुकरपटली लांछ
नस्य च्छलेन॥ येमर्थे किं त्वमशोचस्त्यज त्यज व्यसनं॥ त्वामनुसीदतिबंधावार्द्रीभावं भज भज च स्थैर्यमिति समाधिस्त्वन्मातुर्वत्सल
स्य कवेर्वात्सल्योक्तिरियमित्यन्यैरपरिशीलिता सरणिः॥ नानाप्रहरणसंकुलः संग्रामः॥ प्रकंपो घूर्णनं॥ अर्थविशेषउद्दंडकर्म॥ भीमेन ये
ये करींद्रा दुर्योधनसेनामत्तमातंगाः विंध्येत्यादि॥ विंध्यनामकगिरेः क्षणिकमत्युच्चैः प्रपतनं भजंतः संतः स्तिमितभूतलं निबिडध्वनिं राम:
ददृष्टाधरं यथास्यात्तथा व्योम्न्युत्क्षिप्तास्तेषां कपोलाद्गंडाद्भयविधुताभयकंपितोड्डीयोत्प्लुत्य लांछनस्य च्छलेन मिषेणामृतद्युतेर्मंडले लग्ना २५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काचित्पुनर्भयभीते षाध्वसा भ्रमरपंक्तिरिवेत्युत्प्रेक्षा॥ अत्र दुर्योधन आलंबनं स च गम्य एव रसचर्वणाहेतुरिति स्मर्तव्यं॥ शौर्यैः शूरकर्मभिः॥ वीर्यैर्बलविशेषैः॥ पराक्रमः परबंधनादिः॥ प्रभावो मारणादिः॥ आक्षेपस्तिरस्कारः॥ विसृत्य शं करते॥ गूढाभिसंधिः समाधत्ते॥ आशयमुद्घाट्य स्मारयति॥ चतुर्विध इति प्रागुक्त इति शेषः॥ सचेति॥ मानसस्त्वित्यर्थः॥ ज्ञायमान एवेति॥ न तु साक्षात्क्रियमाण इत्यर्थः॥ ग

वीरस्यानुभावाः॥ तत्र भरतः॥ धैर्यैः शौर्यैर्वीर्यैरुत्साहपराक्रमप्रभावैश्च॥ वाक्यैराक्षेपकृतैर्वीररसः सम्यगभिनेयः॥ नन्वतींद्रियस्य रसस्य ज्ञापकाः शरीरधर्मा भवितुमर्हंति त एव सर्वत्रोक्तास्तथा च धैर्योत्साहौ न शरीरधर्माविति चेत्॥ सत्यं धैर्यपदेन चांचल्याभाव उत्साहपदेनाश्रुपुलकादयो लक्षिताः॥ यद्वानुभावश्चतुर्विधस्तत्र मानसोप्यनुभाव उक्तः स च ज्ञायमान एव गमकः स च मानस ऐंद्रियकश्चेति न विशेषः॥ विनयबलादय ऊहनीयाः॥ युद्धवीरानुभावो यथा॥ अग्रे वासवजित्समग्रसमरव्यापारदीक्षागुरुः पार्श्वे तस्य विपक्षपक्षदलनक्रीडाधनो रावणः॥ इत्थं जल्पति सर्वतः परिजने संध्यास्तुतिं कुर्वतः श्रीरामस्य न कुंभकस्य पवने सुप्तः सकोपि क्रमः॥

मक इति॥ यत इति शेषः॥ सचेति॥ ज्ञायमानोप्यनुभाव इत्यर्थः॥ मानस इति लैंगिको वेत्यपि बोध्यं॥ न विशेष इति॥ गमकत्वे शारीरत्वस्याप्रयोजकत्वात्तदघटितयथाश्रुतलक्षणस्य तत्रापि संभवात्॥ समग्रस्य समरव्यापारस्य दीक्षायामन्यप्रत्युपदेशेन गुरुः पटीयान्वासवजिदिंद्रजिदग्रे तिष्ठतीति शेषः॥ सेनाग्रणीर्भवतीति भावः॥ तस्येंद्रजितः पार्श्वे॥ विपक्षेत्यादि॥ शत्रुभटानां दलनं खंडनमेव क्रीडा नायासः संपन्नं प्रियं तदेव धनमवश्यसंग्राह्यं यस्येदृशो रावणस्तिष्ठतीत्यत्रापि शेषो बोध्यः॥ इत्थममुना प्रकारेण सर्वतश्चतुर्दिक्षु परिजने वानरसमुदाये जल्पति वदति सति संध्यास्तुतिं संध्यावंदनं कुर्वत आचरतः श्रीरामस्य कुंभकस्य पूरककुंभक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. यद्वाकुंभकादिशब्दाःक्रियाविशेषविशिष्टवाच्यर्थकास्तथाचतन्नामकेपवनेवायावभेदेषष्ठीनचाभेदोनसंबंधइतिप्राचांप्रवादा नौका
२५ न्नकथंशेषषष्ठ्यवसरइतिवाच्यं॥नसंबंधइत्यस्यसरूपयोराकांक्षितइत्यादिपूरितार्थेनास्यर्थात्तएवावयवावयविभावेनान्वयप्र
तियोगिनोर्वैरूप्यंसमर्थितंभगवतामहाभाष्यकृताराहोःशिरइत्यत्र॥संक्रमोयथोक्तरीतिरूपःकोपीषदपिनस्तुण्णोनविघ्नितः॥एते
नचांचल्याभावउक्तः॥हेकौत्समृद्वाजनंमातिंकंपात्रंसंवीक्ष्यविचारपूर्वकंदृष्टोदास्यंवैतत्स्यनविधेहिमाकुरुगृहान्मदीयादित्यादिनेग
च्छमागाःकिंत्वेतदखिलंसम्यक्तानविचारणीयमितिभवंतंक्षणमित्यत्रस्थयशैघ्र्यंगमयतियाचेचेद्यद्यहंदासःकिंकरोस्मिनिश्चितंचेद्द

दानवीरानुभावोयथा॥औदास्यंनविधेहिगच्छनगृहात्संवीक्ष्यमृद्वाजनंयाचेकिंतुभवंतमेतदखिलंकौत्सक्षणंसम्यतां
॥दासश्चेदहमस्मिचेत्सुमतीसर्वैवसागृह्यतांस्वर्णंचेद्गुरुदक्षिणाधनपतेरानीयसंपाद्यते॥दयावीरानुभावोयथा॥ध्वां
तस्तोमधरेजगद्भयकरेपाथोधरेवर्षतिक्रोशद्व्याकुलवत्सगोकुलदयादीनेक्षणःकेशवः॥हस्तन्यस्तमहीधरश्च्युतिभयान्न
वांगुलीपल्लवैःस्रस्तंवत्समुरीकरोतिननतनोःस्रस्तंहरत्यंशुकं॥ सुमतींरोचयेस्तर्हिसर्वैवसागृह्यतांफललाभस्तवैवास्तुचेत्सु
मतींरोचयेस्तर्हिगुरुदक्षिणाधनपतेःकुबेरादानीयाहृत्यसंपाद्यतेमयेत्यर्थः॥दीयतइत्यत्रक्षायदेवंविविधसौष्ठवेनाभिधानंतन्मयासं
पादितेर्थेःर्थिनांस्वाकूतंयुमस्त्येवेत्यर्थमभिव्यंजयदुत्साहंपुष्णाति॥गाढांधकारसमूहधारकेतएवजगद्भयकरेपाथोधरेजलधरेव
षतिसतिक्रोशदिति॥हुंवारवकरेव्याकुलेभयभीतवत्सानांतदतिरिक्तगवांचवकेचित्तुक्रोशंतःतएवव्याकुलास्तथावगतावत्सायासां रामः
तासांगवामितिविक्लिशुः क्रोडव्याकुलेतिक्वाचित्कःपाठोयुक्तनरस्तत्रक्रोडभुजांतरेव्याकुलावत्सायासामितिगवांविशेषणस्योद्दीप २५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नातिशयार्थत्वादित्यवधेयं कुलेससमुदायेद्दययाकृपयादीनं तत्वाभिव्यंजनचतुरमीक्षणं चक्षुर्यस्य तादृशः केशवो हसतेति॥ करकलित
स्यगोवर्धनगिरेः पतनशंकयांगुलीपल्लवैरक्तांगुलीभिः कृत्वा स्रस्तं गलितं वेणुं वंशिकां नैवाधीकरोति तनोः सकाशात्स्रस्तच्युतमंशुकं
प्रावरणं च न हरत्याहरतीत्यर्थः॥ करचरणनेत्रमस्तकप्रधानानां सर्वांगानामित्यर्थः॥ शुष्कोष्ठतालुकंठैरोष्ठतालुकंठशोषैरिति भावः॥ कृस
स्य गावः विस्तीर्णे आयते भुजगस्य व्यालराजस्य सस्यवक्त्रकुहरे मुखबिले व्यात्तेत्यादि॥ व्यात्ते भयप्रसारिते नस्व न्यस्तं तृणानामवलीढमवलेहो
येन तादृशे॥ न्यस्तस्रस्तेति पाठे न्यस्तानि खंडानि स्रस्तानि गलितानि येषां तादृशैस्तृणैरवलीढेयुक्तइत्यर्थः॥ तादृशे वदने व्याकीर्णा व्याप्ताः फे

भयानकस्यानुभावाः॥ तत्र भरतः॥ करचरणनेत्रमस्तकसर्वांगानां प्रकंपनैश्चैव॥ शुष्कोष्ठतालुकंठैर्भयानको नित्यमभिनेयः
॥ रोमांचवदनवैवर्ण्यस्वेदादयऊहनीयाः॥ यथा॥ व्यात्तन्यस्ततृणावलीढवदनव्याकीर्णफेनोच्चयं काकुव्याकुलघोरघर्घर
रवं स्फारीभवल्लोचनं॥ कंपप्रस्खलदंघ्रिवामनतनुश्वासोर्मिभिन्नाधरं विस्तीर्णे भुजगस्य वक्त्रकुहरे कृष्णस्य गावः स्थिताः॥ बी
भत्सस्यानुभावाः॥ तत्र भरतः॥ आननेत्रविघूर्णनलोचननासापिधानैश्च॥ अव्यक्तवादपतनैर्बीभत्सः सम्यगभिनेयः॥ सर्वां
गसंहारनिष्ठीवनादयऊहनीयाः॥ यथा॥ कपटहरेर्मुखकुहरे विवृते संवीक्ष्य दिनकरं लक्ष्मीः॥ नोच्चयः फेनसमुदायो यस्मिन्क

र्मणि यथा भवति तथा॥ काक्विति काकुः स्वरविशेषस्तया व्याकुलो युक्तो घोर उग्रो घर्घरो घर्घरानुकृतो रवः शब्दो यत्र स्फारीभवद्विस्तारं भजल्लो
चनं चक्षुर्यत्र कंपेन प्रस्खलन्नंघ्रिश्चरणो यत्र वामना संकुचंतीतनुर्यत्र श्वासपरंपराभिर्भिन्नः कंपमानोधरो यत्र तथा स्थिता इत्यर्थः॥ अव्यक्तवा
दपतनेस्तंभनस्खलनैरितियावत्॥ लक्ष्मीर्मायाविनः श्रीनृसिंहस्य विवृते व्यात्ते विकृतइति पाठे भयंकर इत्यर्थः॥ मुखकुहरे मुखरंध्रे दिनकरं

संवीक्ष्य हतस्य दैत्यस्य हिरण्यकशिपोः पल
लसमांसग्राससकवलोग्रासस्लह्लांस्यास्रखं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. २६

अंशुकैरिति बहुवचनेनावर्तनाभिप्रायेणैव बीभत्सः पोष्यते पिदधे आच्छादितवतीत्यर्थः॥ परुषग्रहणोल्लासैर्दुःश्राव्योद्भवैः॥ इदं नौका
च हाहाकारविशेषणं॥ स्पर्शग्रहणोल्लासैरिति पाठे तत्तुल्यस्कंधं॥ तत्र स्पर्शोधरांगुलिस्पर्शदंतजिह्वाग्रपीडनादिः॥ ग्रहणं गलग्रह
णकरतालिकादि॥ उल्लासः शिरोघ्राणचुंबनादिरित्यर्थो बोध्यः॥ स्वरभेदैरुदात्तादिभिः॥ अर्जुनं दोरितिदीर्घबाहुबलविध्वंसितशत्रु
बलं वीक्ष्य नाकिनां स्वर्वासिनां नेत्रजात्यभिप्रायेणैकवचनं निमेषाः पक्ष्माकुंचनानि॥ अद्यापीदानीमपि नैव जाग्रति नैवोद्भवंति दृढं निर्निमे

हतदैत्यपललकवलभ्रांत्याग्रस्तमंशुकैः पिदधे॥ अद्भुतस्यानुभावाः॥ तत्र भरतः॥ पुरुषग्रहणोल्लासैर्हाहाकारैश्च साधु
वादैश्च॥ वेपथुगद्गदवचनैः स्वरभेदैरभिनयस्तस्य॥ निर्निमेषप्रेक्षणरोमांचादयऊहनीयाः॥ यथा॥ पांडवं वीक्ष्य दोर्दंडखं
डितारातिमंडलं॥ अद्यापि नाकिनां नेत्रनिमेषा नैव जाग्रति॥ इत्यनुभावनिरूपणं नाम तृतीयस्तरंगः॥ अथ सात्विकभावान्नि
रूप्यंते॥ तत्र भरतः॥ स्तंभः स्वेदोथ रोमांचः स्वरभंगोथ वेपथुः॥ वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विका मताः॥ नन्वस्य सात्विकत्वक
थं॥ व्यभिचारित्वं न कुतः सकलरससाधारण्यादिति चेत्॥

षप्रेक्षणाभ्यासादिति भावः॥ ॥इति श्रीजड्युपनामकगंगारामविरचितायां नौ
कारव्यायां रसतरंगिणीव्याख्यायां तृतीयस्तरंगः॥ श्रीः॥ तथैवं सात्विकभावनिरूपणं प्रतिजानीते॥ केवलयोगस्यानतिप्रसक्तस्याभावाद्रूढेश्चानिर्धार
णात्तानुद्दिशति॥ शंकते॥ सात्विकत्वं सात्विकपदव्यपदेश्यत्वं॥ कथमिति॥ सत्वं जीवस्तदीयत्वनिबंधनस्तथाव्यपदेश इत्युक्तं॥ व्यभिचारिणामपि
जीवाश्रितत्वादिति भावः॥ प्रस्तुतविशेषणाभितश्चारयंतिते व्यभिचारिण इति व्युत्पत्त्याकर्मीभूतरसविशेषानुपन्यासात्सामान्यतो रसमात्रचारकत्वे रामः
व्यभिचारिपदप्रवृत्तिनिमित्तत्वमध्यवसीयते तच्च सात्विकभावेष्वपीति तत्रापि व्यभिचारित्वव्यपदेशः कुतो नेत्याह॥ सत्वेन जीवमात्रेण युक्ताद्दुःख २६

स्वपरसाधारणदुःखभावनायामनुकूलत्वंतत्सदप्रवृत्तिनिमित्तंगम्यतेतच्चानुकूलत्वमयमनुकूलोयंचप्रतिकूलइतिप्रतीतिसाक्षिकःस्वरूपसंबंधविशेषःसचेतेषामेवेतिव्यभिचारित्वेपितेषांपृथगुक्तिरितिमतंदूषयितुमुपन्यस्यति॥सत्त्वंनामेति॥सत्त्वपदप्रकृतिकठक्प्रत्ययार्थसंबंधित्वंचेत्यर्थः॥एतेननिरुक्तप्रकृतेरुक्तार्थत्वस्यायांतात्पर्यग्राहकाभावेनानाश्वासापत्तिः॥सत्त्वशब्दस्यप्राणिवाचकत्वादित्यग्रिमग्रंथविरोधापत्तिश्चेत्यपास्तं॥सर्वसाधारणदुःखभावनायामनुकूलत्वस्यविवक्षितात्यंतिकत्वगमकस्यावगतयेकैमुतिकन्यायेनस्वीयदुःखभावनायामनुकूलत्वंप्रतिपादयितुंपरकीयेति॥जीवपर्यायसत्त्वपदप्रकृत्यासार्थ्याव्यभिचारिणोदुःखस्यैवोपस्थितेस्तत्समभिव्याहृतप्रत्ययप्रतिपाद्येदुःखमेवघटयति॥दुःखभावनायामिति॥यथाश्रुतप्रत्ययार्थोवर्त्तमानत्वंतच्चनिरुक्तप्रकृतिसमभिव्या

अत्रकेचित्॥सत्त्वंनामपरकीयदुःखभावनायामत्यंतानुकूलत्वंतेनधृताःसात्त्विकाइतिव्यभिचारित्वमनादृत्यसात्त्विकव्यपदेशइति॥तन्न॥निर्वेदस्मृतिधृतिप्रभृतीनामपिसात्त्विकव्यपदेशापत्तेः॥नचपरदुःखभावनायामष्टावेवोत्पद्यंतइत्यनुकूलशब्दार्थोत्वएवसात्त्विकत्वमष्टेषामितिवाच्यं॥ हारादुक्तदुःखभावनाकालीनत्वरूपमप्यतिप्रसक्तमित्युक्तमेवानोत्पन्नेति॥आत्यंतिकत्वंचसर्वसिद्धप्रतीतिसात्त्विकत्वमेवेतिनातिप्रसंगः॥तेनतदात्मकेनसंबंधेन॥धृताअधिष्ठिताः॥इतीति॥व्युत्पत्तिविशेषमादृत्येतिशेषः॥व्यभिचारित्वमिति॥सामान्यतयेतिशेषः॥तथाचनिरुक्तविशेषमभिप्रेत्यसात्त्विकभावानांपृथक्करणेतेषामेवोल्बणतयाप्रथमंनिरूपणमुचितमितिभावः॥तादृशनिर्वेदादिव्यावृत्तस्तंभादिसाधारणस्वरूपसंबंधरूपानुकूलत्वेप्रमाणाभावएव॥साक्षात्क्रियमाणत्वस्यगमकतायांनप्रयोजकत्वंकिंत्वविनाभावस्तथाचजन्यत्वंवागमकत्वंचाययाश्रुतमन्येषामपीत्यभिप्रेत्यैतच्चमतंदूषयति॥तथाचपरदुःखभावनायामुत्पत्तिरूपमेवानुकूलत्वंवाच्यंतच्चजायमाननिर्वेदादिसा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इतिहेतौ॥अनुकूलशब्दार्थइतियथाश्रुतएवविवक्षितइतिशेषः॥अतएवनिर्वेदादीनांतत्रानुसक्तेरेव॥अपिरनुकूलशब्दार्थत्वसमुच्चा
यकः॥एषामष्टानामेव॥वेमसंपरिहरति॥उत्पत्तिरितीतिशब्दोनचेत्यत्रहेतुः॥प्राणीजानातिप्राणीचेष्टतइतिप्रतीत्योरविशेषणश
रीरावच्छिन्नात्मप्रतिपादकप्राणिपदपर्यायीभूतस्यापिसत्वशब्दस्यप्रकृतेशरीरमात्रपरत्वमेवतस्यधर्माइतिव्युत्पत्त्याशारीरधर्माःसात्विक
शब्देनमुख्ययावृत्त्योच्यंतेतेह्यश्रावेवेतितत्कारणीभूतामानसाविकारास्तेनैवशब्देनगौण्यावृत्त्योच्यंतेनतुकार्यीभूताःशरीरधर्मास्तत्र
सात्विकभावशब्देनविवक्षिताः॥नचैवमांतराबाह्याश्चेतिप्रागुक्तविभागासंगतइतिवाच्यं॥बाह्याइत्यस्यबाह्यविकारजनकीभूताइत्य
र्थकत्वात्॥अतएवविकारोमानसोभावइतिकोशःसंगच्छतइतिनकोपिदोषइतिप्राञ्चः॥तन्न॥त्वदभिमतमानसविकारकारणका

निर्वेदादेरपिपरदुःखभावनायामप्युत्पत्तिरिति॥अन्येदंप्रतिभाति॥सत्वशब्दस्यप्राणिवाचकत्वादत्रसत्वंजीवशरीरंतस्यध
र्माःसात्विकाः॥इत्थंचशारीराभावास्तंभादयःसात्विकभावाइत्यभिधीयंते॥स्थायिनोव्यभिचारिणश्चेतिभावाआंतरतयानशरी
रधर्माइति॥ नांशारीराणामेवतथात्वोपपत्तौतादृशमानसविकारेमानाभावात्॥नचविनिगमनाविरहइतिवाच्यं॥शारीराणांतेषांप्रत्यक्ष
सिद्धतयोभयसंमतत्वात्॥अस्मन्मतेचतत्कारणंकृप्तएवमानसविकारोनतुकल्प्यइतितेषामेकमात्रसिद्धत्वात्तावतैवतेषांधूमादिसंभूता
श्रुप्रभृतिवैलक्षण्यमपिसर्वसंमतंसमायाति॥नचैवंविकारोमानसोभावइतिकोशासंगतिरितिवाच्यं॥तत्रमानसपदेनमनोधीनस्थितिक
त्वविवक्षणात्॥अधीनत्वंचसाक्षात्परंपरयाचबाह्यानामविशिष्टमेवेत्यभिप्रायेणोत्तरयति॥इत्थंचेति॥शारीरत्वेसतिस्थायिभावप्रकार
कारोपविशेष्यीभूतभावत्वंसात्विकभावसामान्यलक्षणमित्यर्थः॥इतिभावाइति॥इतिव्यपदेश्याभावाइत्यर्थः॥नशरीरधर्माइति॥तथाचसत्वंतेन

CC-0. Mumukshu Bhawan Varanasi Collection, Digitized by eGangotri

गतीतिगतिसामान्येत्यर्थः॥स्पस्वंतप्रयोजनमाह॥सामान्यपदकृत्यमाह॥चेष्टानिरोधश्चेष्टामात्रनिरोधः॥नगतीतिनगतिसामान्येत्यर्थः
वस्तुतस्तुगतिनिरोधःपादप्रक्षेपनिरोधः॥चेष्टानिरोधःशारीरक्रियासामान्यनिरोधः॥नगतिनिरोधःनपादप्रक्षेपरूपशरीरक्रियाविशे
षस्यैवनिरोधइत्यर्थः॥अतएवसर्वथाऽपट्वलएवप्रलयपदव्यवहारःसांप्रदायिकानामिति॥अस्यस्तंभस्य॥क्वचिदस्येतिस्थानेऽथेतिपाठस्त
त्रास्येतिप्रकरणप्राप्तमेवेतिबोध्यमेवमग्रेपि॥रमणीयपक्ष्मसंबंधिनीदृग्दृष्टिर्यस्यास्तयागोविंदश्रीकृष्णंसमुदीक्ष्यजातःस्तंभोहेमातरितिस
खींप्रतिसात्रकंपोक्तिरप्रतार्यत्वप्रकटनायममेत्यार्थिकंश्रोणीकटिपश्चाद्भागःपीनतरातिशयेनपीनातनुर्मध्यादिरूपाकृशतरातिसूक्ष्माव

शरीरधर्मलेसतिगतिनिरोधःस्तंभः॥नचनिद्रापस्मारादावतिव्याप्तिः॥शरीरधर्मपदेनतेषांवारणात्॥प्रलयभावेतुचेष्टानिरो
धोनगतिनिरोधः॥अस्यविभावाः॥हर्षरागभयदुःखविषादविस्मयक्रोधाः॥यथा॥श्रोणीपीनतरातनुःकृशतराभूमीधराडंब
रावस्रोजस्यतटीकृतोनिजकुटीमातर्मयागम्यतां॥इत्युद्भाव्यकदंबकुंजनिकटेविश्रम्यमंदस्मितंगोविंदंसमुदीक्ष्यपक्ष्मलदृशा
स्तंभस्तिरोधीयते॥वपुषिसलिलोद्गमःस्वेदः॥ सोऽजस्येस्येकवचनेनभेदग्रहप्रतिबंधकात्यंतसंश्लेषोध्वन्यतेतदीयावाररूपाभूमीध
राडंबरोच्चैस्त्वरत्वेनपर्वतसादृश्यवतीनेनातिकृशमध्यस्यातिपृथुलोभयभागस्यचशरीरस्योद्वहनानभिरूपत्वप्रतिपादितातर्हिमयाकुतःके
नोपायेननिजकुटीसीयापर्णशालागम्यतांप्राप्यतामित्युद्भाव्यबोधयित्वाकदंबकुंजनिकटेसमुदितकदंबगृहसमीपेविश्रम्यश्रीकृष्णावलो
कनार्थंसमस्समुपविश्यापितिरोधीयतेकारणांतरप्रभूतत्वबुद्धितन्नोत्सादयत्यागोपाय्यतइत्यर्थः॥स्वेदंलक्षयति॥नारिकेलादावपिसलिलोद्ग
माद्वपुषीति॥तच्चनेत्रभिन्नशरीरावयवपरं॥तेनाश्रुव्युदासः॥घर्मसंभूतस्वेदेसात्विकत्वव्यपदेशाभावाद्वपुःपदसमभिव्याहृतोद्गमपदस्येगौविकारसं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ अस्य भावो भावसाधारणस्य स्वेदस्य विभावाः कारणानि ॥ एवमग्रेपि ॥ विपरीतरतिश्रांतां नायिकां प्रति सखी प्राह ॥ कांते सुंदरि स्वेदबिंदवस्तव कु नो॰का
२८ चप्रांते राजंते शोभंते ॥ उदाहरणे योजयितुं तत्रोत्प्रेक्षते ॥ हृष्यता घटितघटनासंजाततोषेण मदनेन मनोभुवा कृता मौक्तिकवृष्टय इवेवेत्यस्य
तिमन्यइत्यर्थः ॥ क्वचित्पुस्तके मदनेनैवेत्येवकारघटितः पाठो दृश्यते स तु रूक्ष एव ॥ तत्रैवं व्याख्येयं ॥ सखी यानुरागं गोपायंतीं नायिकां प्रति नाय
कः साकूतमाह ॥ कांतदूति ॥ हे कांते अभिलाषवति ये स्वेदबिंदवस्तव कुचप्रांते राजंते वर्तंते ते तत एतद्व्याख्या हृष्यता योज्यं ॥ मौक्तिकवृष्टयो
मौक्तिकाकाराः पृषद्गणा न तु धारारूपाः ते न श्रमसंभूतेभ्यो वेषस्य माविष्कृतं ॥ मदिति पंचम्यंतमस्मदो रूपं मत्त इत्यर्थः ॥ हृष्यता विप्र
लोभवता अनेनाभिलाषेण कांतापदार्थैकदेशस्यापि तस्यतात्पर्यानुरोधात्परामर्शो न विरुद्ध इति भावः ॥ कृता एवेत्यनेन नत्वया पकृते

अस्य विभावाः ॥ मनस्तापहर्षलज्जाक्रोधभयश्रमपीडाघर्ममूर्छादयः ॥ यथा ॥ कांते तव कुचप्रांते राजंते स्वेदबिंद
वः ॥ हृष्यता मदनेनेव कृता मौक्तिकवृष्टयः ॥ विकारसमुत्थो रोमोत्थानं रोमांचः ॥ अस्य विभावाः ॥ शीतालिंगनहर्षभय
क्रोधाः ॥

प्यभिलाषेस्वासाधारणकर्मणासौ प्रकृत एवेति पुनराकूतमावेदितं ॥ रोमांचं लक्षयति ॥ शीतसंभूतरोमोत्थाने सात्विकव्य
पदेशाभावाद्विकारेत्युक्तं ॥ न चैवं सात्विकभावविभावेषु शीतपदानर्थक्यमिति वाच्यं ॥ विकारपदव्यावर्त्यसद्भावप्रदर्शनायैव तदुपादाना
देवमग्रेपि ॥ न चैवं पदांतरप्रक्षेपेणाहल्यतद्वारणे कः पुरुषार्थ इति वाच्यं ॥ रसानुकूलत्ववदननुकूलत्वरूपवैलक्षण्यप्रतिपत्तेरेव तत्त्वात् ॥
भावसामान्यलक्षणस्यैव तदर्थत्वमिति तु माशंकिष्ठाः ॥ सामान्यलक्षणाक्रांतमेव हि विशेषलक्षणलक्ष्यं ॥ सात्विकभावा नामेतदाक्रांत राम॰
त्वं ह्यनुभावतया रसानुकूलत्वादेव ॥ न च शीतोत्थरोमोत्थानं स्थायिनः कार्यं तद्विलीनमेव तज्ज्ञापकत्वप्रत्याशयापीत्यन्यत्र विस्तरः ॥ २८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हे आलिसखिस्मितसुभगो हास्यमनोहरो नंदसूनुर्बकुलेत्यादि बकुलनामकवृक्षाणां कलिकात्मनः कोशाङ्कुंडारगृहात्कोशत्वोक्त्योद्दीप
कत्वातिशयद्योतनाया लिश्रेणीबुकरूपाणत्वं व्यज्यते॥ सोयं व्यंजनामूलध्वनेरुध्वा॥ कृपाणत्वयोग्यश्रेणीरूपतायै रोषस्तेषामभिहितः॥
भवत्वेवहि तुल्यापराधजनितशेषाणामेकवाक्यता॥ नचासौ परस्यानुसरणं विनापरस्यैकवाक्यतेतितयासर्वेषां परानुसरणरूपाश्रे
णी निवेद्यते॥ तादृशतुल्यापराधतात्पर्यकमेवहि मुकुलेतिपदमनर्थिप्रत्तमकरंदतामभिव्यनक्ति॥ रोषेणनिर्गच्छंतोयं मधुकरास्ते
षां कूजितसेविन्यां कुंजभूमौलतामंडपेकपोलपालिंगंडतटीं॥ अद्येतिलोकोक्त्यनुकृतिः॥ कथमनिर्वचनीयेनकारणेनपुलकयतिसंजा
तपुलकांकरोतीत्यर्थः॥ स्वरभंगं लक्षयति॥ स्वरस्वभाववैलक्षण्यं स्वलितावुकरणेप्यस्पतोभूतां तं॥ तावन्मात्रं चकृत्या संभूतेतत्रैवगतम

यथा॥ बकुलमुकुलकोशरोषनिर्यन्मधुकरकूजितभाजिकुंजभूमौ॥ पुलकयतिकपोलपालिमालिस्मितसुभगः कथमद्य
नंदसूनुः॥ यद्वद्दलप्रयोजकीभूतस्वरस्वभाववैलक्षण्यं स्वरभंगः॥ अथविभावाः॥ क्रोधभयहर्षमदाः॥ यथा॥ व्यक्तिः स्यात्स्वर
भंगस्य कोपाद्युक्तिः क्रियेत चेत॥ इतिपशुः पुरो राधामौनमाधायतिष्ठति॥ तोवैलक्षण्यमिति॥ तदप्यभिव्यंजककंठादिवीणादिभे
दभिन्नमतिप्रसक्तमेवेतिस्वभावेतिविकाराप्रभूतभेदस्फोरणाय॥ तच्चवैलक्षण्यमुक्तकृत्याकार्यव्यावृत्तमत्रभवसिद्धमेचविपश्चितामिति
मधुपानसंभूतमदकृतासाधारणविभावितं स्वरवैवर्ण्यसामान्यमेवलक्ष्यमित्यभिप्रेत्यैवविकारोद्भूतत्वमत्रपरित्यक्तमित्यपिकेचित्॥ चे
दुक्तिः स्वस्योत्तरं क्रियेताभिधीयेततर्हि कोपात्कोपवशात्कोपमनुमापयितुमितियावत्॥ स्वरभंगस्यैववैवर्ण्यस्यव्यक्तिः प्रकाशः स्याद्भवेदि
तिसामाभवलितिकृलाव्यक्तोसस्यां हितेननानाचाटुकारैर्बलात्कोपेपनीतेदाक्षिण्याहृतः पुनरनेनसहसंलापः प्रसज्येतैवेतिमत्वेतियावत्तेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धस्तुर्नायकधुरीणस्य श्रीकृष्णस्य पुरोग्रे राधेति राधेति साभिलषितमित्यर्थो राधापदशक्तिमूलानुरणनविषयो भानंचाङ्गि· यमव्याजमा
धापालम्भति ध्वनीत्यर्थः॥ वेपथुलक्षयति॥ शरीरस्पंदश्शारीररूपांत्यावयविकंपः॥ सूचकस्पंदादाविति॥ अन्यथाभासहेतुपरप्रयोज्य
त्वाक्षेपणापक्षेपणारूपावयविकर्मणीत्यर्थः॥ नातिव्याप्तिरिति॥ मनोविकारजन्यत्वप्रयुक्तं भावत्वं च न तत्रेति तद्वारणमिति भावः॥ चे
ष्टाश्रयमात्रपरं चेष्टावदंत्यावयविपरमित्यर्थः॥ शरीरावयवकंपे हासोद्भूताधरस्पंदादाविति भावः॥ नातिव्याप्तिरिति॥ तत्र विकारसंभूत
त्वेपि शरीररूपावयविक्रियात्वाभावादिति भावः॥ नचासौ शरीरक्रियैवेति वाच्यं॥ क्रियायाव्याप्यवृत्तित्वेन शरीरक्रियायाः सर्वावयवाव

भावत्वे सति शरीरस्पंदो वेपथुः॥ भावत्वे सतीति विशेषणात्सूचकस्पंदादौ नातिव्याप्तिः॥ शरीरपदं चेष्टाश्रयमात्रपरं॥
तेन शरीरावयवकंपे नातिव्याप्तिः॥ अस्य विभावा आलिंगनहर्षभीत्यादयः॥ तथा॥ कथय कथमुरोजदामहेतो यदुपतिरे
षचिनोतु चंपकानि॥ भवति करतले यदस्य कंपः प्रियसखि मत्तमतिरेव मत्सपत्नी॥ च्छेदेनोपलब्धिप्रसंगात्॥ नचैवमपि भयसं

भूतपलायने तिव्याप्तिरिति वाच्यं॥ पलायनस्यापि पादाद्यवयवक्रियारूपत्वात्॥ युगपत्क्रियया रथक्रियावदेकावयवक्रियया ऽन्यत्रावयवेष्व
क्रियाकलापाभ्युपगमात्॥ वेपथुस्तु सर्वशरीरावच्छेदेनैवोपलभ्यत इति भवत्येव शरीरक्रियारूप इत्याशयात्॥ वस्तुतस्तु॥ सूचकस्पं
दादौ बाहुस्फुरणादौ॥ चेष्टाश्रयमात्रेति॥ मात्रपदं कृत्स्नार्थकं॥ शरीरावयवकंप इत्युपदर्शितार्थकमेव॥ नातिव्याप्तिरिति॥ प्रकृतलक्षण
स्येत्यादिः॥ तस्य व्याप्तिपदार्थसंबंधेन्वयः॥ व्यापनं संबंधः सैव व्याप्तिरिति क्रांता प्रकृते शरीरावयवकंपे न वर्तत इत्यतिव्याप्तिस्तथा च प्रकृत
लक्षणसंबंधः शरीरावयवकंपे निरुक्तेन युक्तिभंग्याव्याप्तिरेव पर्यवस्यति॥ नाव्याप्तिरिति क्वाचित्कः पाठस्तत्र ऋजुरेव॥ हे प्रियसखि सुखदुःख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सदानिकटवर्तीयदुपतिश्चंपककानि चंपकपुष्पाण्युरोजदामहेतोर्वक्षोजरामणीयकसाधनमालानिमित्तं कथं केन प्रकारेण चिनोतु
संगृह्णातु॥ कथयेत्यत्रवाक्यार्थस्यैव कर्मत्वं कथयेत्यनेन श्रीकृष्णस्य स्वविषयकानुरागवत्वप्रतिपादनपुरःसरं निजसखीं तां सपत्नीका
र्यकारकत्वं दृढयंतीकविनिबद्धवक्त्रीतदीयानुरागातिशयमभिधत्ते॥ यद्यस्मात्कारणादस्य करतलेकरतलस्यैव संग्रहसाधनत
यातस्यैव वैफल्यं दर्शितं॥ तेनसर्वशरीरकंपोन विरुद्ध इति व्याख्या हूये पुदाहरणसंगतिः॥ कंपो भवति तत्तस्मात्कारणादहमेवज्ञा
नेयन्नतत्स्मृतिरेवचंपकपुष्पात्मकसदृशावलोकनसंभूता मम स्मृतिरेवनान्या कावित्तथासतितथा प्रतिज्ञातथा संप्रवृत्तिश्चेत्येतद

विकारप्रभववर्णान्यथाभावो वैवर्ण्यं॥ अस्यविभावाः॥ मोहभयक्रोधशीततापश्रमाः॥ यथांकुकुदेकुर्वतिकाणमानुनं श्लिष्ट
योस्तयोः॥ दिवाकरकराक्रांतशशिकांतिमिवादधौ॥ विकारजनितमक्षिसलिलमश्रु॥ अस्यविभावाः॥ हर्षामर्षधूमभ
यशोकजं भाषीतनिर्निमेषप्रेक्षणानि॥ खिलमाकुलीभवेन्मत्तपत्नीमत्सभीहितविघ्नकारिणीजातेत्यर्थः॥ वैवर्ण्यंलक्षयति॥ ज्व
रातपादिकृतवैवर्ण्यव्यावर्तनाय प्रभवांतं॥ श्लिष्टयोरसभरानाकलितप्रभातवेलं समालिंगनासक्तयोः कयोश्चित्स्त्रीपुंसयोराननं कुकुदेलाम्र
चूडेकाणप्रभातध्वनिं कुर्वति सति॥ दिवाकरेति॥ सूर्यकिरणपरिभूतचंद्रद्युतिमादधाविवेत्युत्प्रेक्षा॥ उत्कंठापूर्वभावेन हीयमानौजस्कम
भूदितिभावः॥ अश्रुलक्षयति॥ धूमाद्युत्थाश्रुव्यावर्तनाय जनितांतं॥ पक्ष्मलेरमणीयपक्ष्मयुक्ते आयते विस्तीर्णे चाक्षिणी यस्यास्तस्यानापि
कायाअश्रुबिंदुर्नवोदितमश्रु॥ अक्ष्णोः सकाशाद्रूपस्सिनिपतति तत्रोत्प्रेक्षते॥ हे चित्तत्वमित्यध्याहार्यं तथा सत्येव मध्यमपुरुषस्य साधु
त्वादित्येके॥ नाध्याहार्यमित्यन्ये॥ नचाध्याहाराभावेमध्यमपुरुषस्यसाधुतानस्यादितिवाच्यं॥ मध्यमपुरुषप्रयोगे हि युष्मदस्तिङः पस्याप्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ पस्थापकत्वमावश्यकं नतुयुष्मदनुप्रयोगोपितत्त्वसंबोध्यत्वरूपंतेनविनापितदेतदभिप्रेत्यैवस्थानिन्यपीत्युक्तं॥प्रयोगयोग्यत्वेपी नै॰का॰
३० त्यस्यतदर्थत्वात्॥एतेनाध्याहारोनानुप्रयोगस्यविषयः॥किंतुस्थानिन्यपीत्यस्यैवेत्यल्पस्वल्पप्रलपितमनादेयं॥फलेभ्योयातीत्यत्राहर्तुमित्यस्याध्याहारेपिसाधुतापत्तेः॥नचेष्टापत्तिः॥कारकविभक्त्याचतुर्थीबाधापत्तेः॥नचाध्याहृतमनाकांक्षमेवेतिवाच्यं॥अध्याहारादिनाचतुर्थ्यादीनांसाधुताउपपत्तिरितिबहुव्याकोपापत्तेरित्यलमाविशेन॥तमममुंविशेषमभिप्रेत्यैवसकलपदवाक्यप्रमाणपारावारीणैःश्रीकालिदासैः॥इतःपरानर्भकहार्यशस्त्रान्वैदर्भिपश्यानुमतामयासि॥एवंविधेनाहवचेष्टितेनत्वंप्रार्थ्यसेहस्तगतामसैभिः॥इतिश्लोकेकर्त्राख्यातमध्यमपुरुषसमभिव्याहारेणत्वंपदंनप्रयुक्तंकर्माकांक्षापूरणायतूत्तरार्द्धेसंबुध्यसमभिव्याहृतेप्रयुक्तमिति

यथा॥विसृजविसृजवित्तदुःखधारामयमुपकंठमुपागतोमुरारिः॥इतिकथयितुमश्रुबिंदुरस्योर्निपततिवक्षसिपक्ष्मलायतास्याः॥

संतत्यं॥क्वासौयोग्यतेतिचेत्॥युष्मत्सामानाधिकरण्यंयदाहुः॥समानाधिकरणइति॥नचैवंभवच्छब्दप्रयोगेपिमध्यमपुरुषापत्तिरितिवाच्यं॥युष्मदीत्यस्यसावधारणत्वात्॥नचैवंतुल्ययुक्त्यास्मत्यर्थप्रयोगेउत्तमपुरुषोप्यसाधुरितिस्थितेसौत्यहमर्थेकमव्ययमितिवृत्तिविरोधइतिवाच्यं॥अहमर्थकमित्यस्याहंशब्दार्थकमित्यर्थाल्लक्षितलक्षणयातदर्थोपस्थापकत्वोक्त्यास्मत्प्रयोगयोग्यत्वस्यैवतेनावेदनात्॥युष्मदस्मदुपस्थित्यद्वारकपदांतरानुपस्थाप्यत्वस्यैवावधारणार्थत्वात्॥अन्यथाभावनायाःप्रथमांतार्थेन्वयइतिव्युत्पत्तिभंगापत्तेरस्यर्थेनतदन्वयबाधादसंबद्धप्रलापापत्तेरहमर्थेतात्पर्येसंबंधाद्बोधेचाकिंपदस्मृत्येति॥दुःखधारांसंतन्यमानंदुःखंविसृजविसृजजहीहिजहीहित्वरावगतयेवीप्सा॥तत्रहेतुमाह॥अयमिति॥यतइतिपूरणीयं अयंमुरारिर्मुकुंदउपकं रामः
३०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

30

शरीरधर्मत्वे सतीत्यर्थः ॥ चेष्टानिरोधश्चेष्टानुत्पत्तिप्रयोजकोयमेव च करणापाटवशब्देन शैथिल्यशब्देन च व्यपदिश्यते ॥ सत्यंतदलप्र
योजनमाह ॥ ननु चेष्टाक्रियामात्रं मनःक्रियानिरोधसाधारण्येनार्थप्रत्यायकप्रलयपदसमभिव्याहारात् ॥ तथा च यत्किंचिच्चेष्टानिरो
धोतिप्रसक्तोयथाप्रागुक्ते वेपथूदाहरणे एव वेपथौ प्रत्यावचयानुत्पत्तिप्रयोजकता ॥ एवं स्तंभेपीति चेष्टासामान्यनिरोधो वाच्यस्तथा
चासंभवः प्रकृतोदाहरण एव मनःक्रियात्यंतरुद्धत्वादित्याशंकां वारयति ॥ साहचर्यकथनेनेति तृतीयातत्पुरुषः सा च तृतीया विशेषणे ॥

शारीरत्वे सति चेष्टानिरोधः प्रलयः ॥ शारीरत्वे सतीति विशेषणान्निद्रादौ नातिव्याप्तिः ॥ स्तंभादयः शरीरधर्मास्तेषां साहच
र्यकथनेन प्रलयोपि शरीरधर्म एव विवक्षितः ॥ तेनात्र चेष्टापदेन शरीरचेष्टैवाभिमता ॥ मनसस्तु कर्मैव भवति न तु चेष्टा ॥ अत
एव चेष्टाश्रयः शरीरमिति शास्त्रीयं लक्षणं ॥ अस्य विभावा रागोत्कंठ्यादयः ॥ यथा ॥ नो वक्त्रं नमितं धृतं न च शिरो न्यावर्तितं नो
वपुर्वासो न श्लथमाहृतं न निगदितं नो वा निषेधाक्षरं ॥ शोणेनापि विलोचनेन विरचितं क्रीडाकलाकातरं चेतः केवलमाननेम
धुरिपोर्व्यापारितं राधया ॥ प्रलयोपि प्रकृते प्रलयपदार्थोपि ॥ शरीरधर्म एवेत्येवकारेण मनःक्रियानिरोधकमनोधर्मव्यवच्छेदः ॥
तेन शरीरधर्मविवक्षणेन ॥ शरीरचेष्टैव हिताहितप्राप्तिपरिहारार्था क्रियेव अत्रैवकारो मनःक्रियां व्यवच्छिनत्ति ॥ तथा च तादृशक्रियाला व
च्छिन्ननिरोधो लक्षणे विवक्षित इति न कोपि दोष इत्याह ॥ चेष्टापदप्रयोगेनिहितार्थं परिहरन्नेव चेष्टापदार्थस्य तादृशशरीरमात्रधर्मत्वे स
तीमाह ॥ अन्यथातिप्रसंगादिति भावः ॥ अत्र मानातिशयप्रगुणीकृतविप्रलंभाजितदुःसहज्वरदुःखखिन्नया शठतानुसंधानसंभृत
रोषप्रकर्षग्रहिलयाप्यवितर्कितं तत्कालवृत्तदुर्घटसमागमसंजातोत्कंठाभरतरलांतःकरणया राधया तन्मुखानवलोकनस्पृहानुवर्तनेपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ वक्त्रंमुखंनोनमितंननम्रीकृतंतथाचुंबुकपरामर्शेशिरश्चनधुतंनिषेधायनकंपितंआश्लेषेवपुःशरीरंनोव्यावर्तितंनविपरीतंकिंचिद्दलि नौका
३१ तंस्खलथंगलितंवासोवस्त्रंस्वयंनाहृतंधृतंतेनपरामर्शेनिषेधासरंनेतिवानोनिगदितमुक्तंविलोचनमपिशोणमारक्तंनविरचितंभोक्तव्यंभु
क्तमतःपरंकिंरोषेणेतिमत्वानकृतंकिंतुक्रीडाकलासुक्रीडाविशेषविषयेकातरंदीनंश्रेयांसिबहुविघ्नानीतिन्यायाच्चेतोंतःकरणंकेवल
मित्यवधारणेनेनोदाहरणसंगतिः॥मधुरिपोःश्रीकृष्णस्यपरदुःखप्रहाणशीलस्येतिपदध्वनिः॥आननेमुखेव्यापारितंप्रेरितमितिपूर्व
रपव्याख्यानं॥तथासतिगुणीभूतरोषवितर्तीकरणंमुख्यकातर्यनिर्देशमात्रमित्यनुदाहरणताशंकाकलुषितत्वाद्रोषकातर्ययो
रेकविषययोरेकदासंभावितयोर्वर्णनेकविसंरंभानाधायकतयाद्वयोर्मुख्यतायाअसंभवात्॥अन्यथाकविकुलसुपण्णसरणिप्रच्य

जंभाचनवमःसात्विकभावइतिप्रतिभाति॥

वापत्तेः॥किंतुनविद्यादिनिषेधघटितवाक्यार्थषट्कंस्त्रीजातिस्वभाव्येनप्रसक्तप्रतियोगिसत्ताकंनिरुक्तप्रलयात्मनैवोपपन्नंनरोषपरं॥
वैवर्ण्यंसात्विकभावरूपशोणताप्यनिवार्याषाष्ठंवाक्यार्थंप्रबाधमानास्त्रीजातिस्वभावसुलभबलात्कृष्टनिमित्तांतरसंभूतवैवर्ण्यमपिमि
थ्याभूतरोषप्रभवतयाश्रीकृष्णायनप्रदर्शितमितिरूपेविश्राम्यति॥जंभायाःसात्विकभावत्वंवक्तुंयुक्तं॥तस्याःरसाननुकूलत्वाद्विकाररूपत्वाच्च॥
नचलज्जासंभूतांगसंकोचस्यापितथात्वापत्तिरितिवाच्यं॥लज्जायाव्यंजकस्यतस्यरसाननुगुणत्वात्॥प्रागुक्तविकारत्वस्यासंतबाधितत्वाच्च
॥नचस्वतःसुंदरत्वंजंभायाअपिनास्तीतिवाच्यं॥प्रामाणिकैस्तथात्वेनाभिधानात्॥वातप्रभूतजंभायाअतथात्वेपिविकारसंभूतायास्तस्यास्त रामः
थात्वात्॥यथातवधूमाद्युत्स्याश्रुणोःतथात्वेपिमनोविकारसंभूताश्रुणस्तथात्वमित्यभिप्रेत्याह॥वायुपरिपोषश्चेत्यर्थः॥नवमइति॥ ३१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नचतुल्ययुक्त्यानिःश्वासोपिदशमःसात्विकभावोवक्तुमुचितइतिवाच्यं॥मुखाविर्भूतवायुपरिपोषोजंभानासाविर्भूतवायुपरिपो
षोनिःश्वासः॥इत्थंचजंभात्वेनविभागेनिःश्वासोदशमःसात्विकभावोयुज्यतएव॥वायुपरिपोषत्वेनविभागेतुनवमएकएवाधिकोभेद
इत्येतदाशयात्॥अतएवजंभानिःश्वाससाधारण्येननवमसात्विकभावत्वप्रापणायैवोभयचरितानोज्वलसमर्पकमालस्य॥
भेदोवाचिदृशोर्जलंकुचतटेस्वेदःप्रकंपोधरेपांडुर्गंडतटीवपुःपुलकितंलीनंमनस्त्विष्वति॥आलस्यंनयनश्रियस्त्वरणयोःस्तंभःसमुज्जृं
भतेतत्किंराजपथेनिजामधरणीपालोयमालोकितइतिरसमंजर्यांजंभास्थानेप्यपेचि॥अन्यथाजंभावक्त्रसरोरुहइत्येवप्रक्रमानुरोधा
सठितुंयुक्तमित्युत्सप्ष्यामः॥एवंस्थितेयद्यप्यनयैवप्रणाल्यास्वेदाश्रुणोरपिसलिलोद्गमत्वेनैकविभागत्वंवक्तुंशक्यंतथापिगणनायाः

ऊर्जेन्नाननमुल्लसत्कुचयुगंस्विद्यत्कपोलस्थलंकुंचत्पक्ष्मगलद्दुकूलमुदयन्नाभिभ्रमद्भूलतं॥बालाग्रांगुलिबद्धबाहुपरि
धिर्यंचद्विरुच्चत्त्रिकंत्रुट्यत्कंचुकसंधिदर्शितलसद्दोर्मूलमुज्जृंभतइत्यादौ॥ पुमिच्छामात्रनियंत्रितत्वादनुढाप्यमेवतदित्यवधे

यं॥तत्रसंमतिमाह॥बालोज्जृंभतइत्युत्तरार्द्धोपात्ताभ्यामाद्यंताभ्यांपदाभ्यामन्वयोवशिष्टान्येकादशक्रियाविशेषणानि॥ऊर्जेन्नाननं॥ऊ
र्जेन्नःप्राणोयत्रतथाननंयत्रेतिव्युत्पत्त्याधिकश्वाससंचारिवदनंयत्र॥ऋजवस्तुद्विन्नाननमितिपठंति॥उल्लसत्कुचयुगं॥उत्उच्चैस्त
रतापवत्लसत्प्रकाशमानंस्तनद्वयंयत्र॥स्विद्यत्कपोलस्थलं॥घर्मजालयुक्तोगल्लदेशोयत्र॥एतेनजंभायाःस्वेदसात्विकभावसामानाधि
करण्यमुक्तंभवति॥कुंचत्पक्ष्म॥मिलन्नेत्रपत्रंयत्र॥गलद्दुकूलं॥स्खलन्नीवीबंधोयत्र॥उदयन्नाभि॥ऊर्ध्वंगच्छंतीनाभिर्यत्र॥भ्रमद्भूलतं॥
भ्रमंतीभुग्नीभवंतीभ्रूलतालताकाराभ्रूर्यत्र॥अग्रांगुलिबद्धबाहुपरिधि॥अंगुल्यग्रैर्बद्धोबाह्वोःपरिधिःपरिवेषोयत्र॥एतेनतदेशितेस्थान

रसतरंगिणीटी ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यंचद्धूर्वृत्तत्रिकं॥न्यंचदधोगच्छद्धि वृत्तंभुग्नंत्रिकंपृष्ठवंशाधोभागोयत्र॥त्रुट्यत्कंचुकसंधि॥त्रुट्यन्भज्यमानःकंचुकस्यकंचुलिकायाःसंधिः संधानंयत्र॥दर्शितलसद्दोर्मूलं॥दर्शितंकामुकलोचनातिथीकृतंलसत्स्वतःप्रकाशंदोर्मूलंकक्षाप्रदेशोयत्रकर्मणियथाभवतितथेत्यर्थः॥इ सादावित्यस्यसात्विकभावसामानाधिकरण्यदर्शनाद्दित्यग्रेतनेनान्वयः॥तद्यथा॥सत्यंसंतिगृहेगृहेप्रणयिनोयेषांभुजालिंगनव्यापारे कूलद्कुमोहनजलाजायंतएणीदृशः॥प्रेयान्कोप्यपरोयमत्रनियतंदृष्टेपियस्मिन्वपुःस्वेदोज्जृंभणकंपसाध्वसमुखैःप्राप्नोतिकांचिद्द शामित्यत्रस्वेदोज्जृंभणकंपेतिस्वेदवेपथुरूपसात्विकभावसंघटिताजृंभानिर्दिष्टातेनतन्मध्यपतितस्तद्ग्रहणेनगृह्यतेइतिन्यायाज्जृंभा याःसात्विकभावतारुद्रस्याभिमतेतिभावः॥श्लोकार्थस्तुतेप्रणयिनःप्रेमपात्रभूताःप्रमासोगृहेगृहेप्रतिगृहंसंतिवर्त्तंतइतिसत्यं॥तेकेए

शृंगारतिलकादौचसात्विकभावसामानाधिकरण्यदर्शनात्॥नन्वसौसात्विकभावोवानुभावोवेतिविनिगमनाविरहइतिचेत् ॥सत्यं॥अनुभावत्वेपिसात्विकभावत्वेबाधकाभावात्॥ णीदृशोयेषां॥भुजेत्यादि॥भुजाभ्यामालिंगनात्मनाव्यापारेणोत्कूलद्रु

लीभूयनिर्गच्छद्कुंस्वभावसुंदरंपद्मगंधीतियावत्॥मोहनजलंनिधुवनसंबंधीनिष्यंदोयासांतास्तथाविधाजायंतेयमुद्दिष्टःप्रेयान्को प्यनिर्वचनीयलावण्योप्यपरःलौकिकएवसंभाव्यतेसंभावनार्थकापिपदोपसंदोपसंदानात्॥यस्मिन्नत्रप्रेयसिदृष्टेसत्यत्रत्योपरि वधारणेवपुःशरीरंस्वेदश्चोज्जृंभणंचकंपश्चसाध्वसंचनामदुष्प्रापतास्संभावनासंभूतभयंचेतिप्रभृतिभिःसमुदायैःकांचिदनिर्वचनी यांदशामवस्थांनियतमवश्यमेवप्राप्नोतीत्यवसेयः॥अनुभावेष्वंतर्भावंशंकते॥भावलक्षणाक्रांतेनुभावत्वेभावत्वसंकीर्णमेवनविवि क्तमितिसमाधत्ते॥ननुविरुद्धयोरेकत्रसमावेशासंभवादन्यतरबाधावश्यकत्वमुनिवचोगौरवाद्यथाशास्त्रमेवज्यायइत्याशंकांविरोधपरि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथासात्विकभावत्वानुभावत्वयोः संकीर्णतायाः॥ भ्रांतः शंकते॥ भ्रांतिमुद्घाटयति॥ नविकारा इति॥ नप्राणिप्रयत्नसाध्या इत्यर्थः॥ अं
गाकृष्ट्यादिषुप्राणिप्रयत्नसाध्यत्वमन्वयव्यतिरेकाभ्यां दर्शयन् जृंभायाः प्राणिप्रयत्नसाध्यत्वव्यतिरेकमाह॥ एतच्छब्दार्थं विवृणो
ति॥ उदाहरति॥ महेश्वरेणमानंप्रियापराधचेष्टामाधायकृत्वा॥ रहस्येकांतेतेनजृंभायाउद्दीपितवियोगकालावच्छिन्नरतिरूपविका
रसंभूतत्वमसूचि॥ स्थितायाउपविष्टायाअचलात्मजायाहिमालयसुतायाजृंभामुखव्यादानफलिकांवायुपुष्टिंसंभाव्यनिश्चित्यततर

पुलकादौतथादृष्टत्वात्॥ नचांगाकृष्टिनेत्रमर्दनादीनामपिभावत्वापत्तिः॥ तेषांभावलक्षणाभावात्॥ रसानुकूलोविकारो
भावइतिहितल्लक्षणं॥ अंगाकृष्ट्यादयोहिनविकाराः किंतुशरीरचेष्टाः॥ प्रत्यक्षसिद्धमेतत्॥ अंगाकृष्टिरक्षिमर्दनंचपुरु
षेच्छयाविधीयतेपरित्यज्यतेच॥ जृंभाचविकारादेवभवतितन्निवृत्तौनिवर्ततेचेति॥ यथा॥ आधायमानंरहसिस्थिता
याः संभाव्यजृंभामचलात्मजायाः॥ चुटत्कृतिं स्मेरमुखोमहेशः करांगुलीभिः कलयांचकार॥ इतिसात्विकभावनिरूपणंना
मचतुर्थस्तरंगः॥ अथव्यभिचारिभावानिरूप्यंते॥ तत्रभरतः॥ निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः॥ आलस्यंचैव
दैन्यंचचिंतामोहः स्मृतिर्धृतिः॥१॥ वलिंगात्तुसाध्यमानापनोदप्रतिपत्तेः स्मेरमुखोहसन्करांगुलीभिश्चुटत्कृतिंचुटदित्यनुक
रणंयस्यतंशब्दं॥ यद्वाचुटतः कृतिश्चेष्टाविशेषात्मिकातांकलयांचकारमानेनोद्दीपितमित्युपहसतिस्मेत्यर्थः॥ इतिश्रीजड्युपनामकगं
गारामविरचितायांनौकाख्यायांरसतरंगिणीव्याख्यायांचतुर्थस्तरंगः॥ श्रीः॥ तथैवव्यभिचारिभावनिरूपणंप्रतिजानीते॥ मानसत्वे
सतिस्थायिभावप्रकारकारोपविशेष्यीभूतभावत्वरूपलक्षणलक्षितत्वमेषांपृथक्निरूपणबीजमतस्तथाविधानेवविभज्यदर्शयति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. अत्रत्रासश्चैव वितर्कश्च व्यभिचारिणो व्यभिचारिपदवाच्या विज्ञेया इत्यन्वयः॥ त्रयस्त्रिंशत्संख्याका व्यभिचारिणो नाम्ना तु नाम्नैव न लक्ष् नौका
३३ णतः समाख्याताः कथिता इत्यर्थः॥ व्यभिचारिपदप्रवृत्तिनिमित्तस्य शारीरमानसविकारसाधारण्याद्द्वयोरपि लक्ष्यत्वं युक्तमित्याशये
नतौ लक्षयति॥ इतस्ततः काव्यनाट्यादिरूपेणानियतेन येन केनाप्युपायेन सहृदयहृदयं प्रविष्टाः॥ रसेषु चर्व्यमाणेषु सत्सु ॥ संचा
रिणश्चर्व्यमाणा ये भावास्तत्त्वमित्यर्थः॥ तथा च स्थायिभावप्रकारकारोपविशेष्यीभूतभावत्वमुभयसाधारणं लक्षणमुक्तं भवति॥ रसेषु
स्थायिभावेषु विषये इतस्ततोऽनुभावाद्यात्मके कार्ये जनयितव्ये संचारित्वं सहकारित्वमित्यपि कञ्जवः॥ व्यभिचारिपदप्रवृत्तिनिमित्त

व्रीडा चपलता हर्ष आवेगो जडता तथा॥ गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥ २॥ सुप्तं विबोधोऽमर्षश्चाप्यवहित्थमथोग्र
ता॥ मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥ ३॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः॥ त्रयस्त्रिंशदमी ख्याता ना
म्ना तु व्यभिचारिणः॥ इतस्ततो रसेषु संचारित्वं॥ अनेकरसनिष्ठत्वं॥ अनेकरसव्याप्यत्वं वा व्यभिचारित्वं॥ न च रोमांचादा
वतिव्याप्तिः॥ तेषामपि संग्राह्यत्वात्॥ ते च भावाः शारीरा व्यभिचारिण एते चांतरा व्यभिचारिण इतीयांस्तु विशेषः॥ स्योभयसाधार
ण्य एव द्वयोर्लक्ष्यत्वं युक्तमतस्तदेव दर्शयति॥ अनेकरसेषु निष्ठा पोषकभावाख्यः संबंधो येषां तत्त्वमित्यर्थः॥ पोष्यपोषकभावो न केवलानामे
षामिति वक्तुमन्यदेव तत्पदप्रवृत्तिनिमित्तं दर्शयति॥ अनेकरसचर्वणाव्याप्यसामग्रीप्रविष्टत्वमित्यर्थः॥ क्वचिद्धि भावादावतिप्रसंगवार
णाय भावत्वमत्रापि बोध्यं॥ आशयमविद्वान्शंकते॥ आशयमुद्घाटयति॥ एतेषां लक्षणलक्ष्यतावच्छेदके एव शारीरत्वमानसत्वविशेषणा रामः
भ्यां विभिन्ने शारीरभावानां मानसभावानां चावांतरलक्षणलक्ष्यतावच्छेदके बोध्ये इति वदंति॥ इयांस्त्विति॥ इयानपरमित्यर्थः॥ शंकते ॥ ३३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३३ निर्वेदादेरित्यादिना क्रोधभयाभ्याम विशिष्टयोरमर्षत्रासयोः परिग्रहः॥ स्थायित्वं संतन्यमानभावविशेष्यकारोपप्रकारत्वं॥ व्यभिचारि
त्वं स्थायिभावारोपविशेष्यीभूतभावत्वं॥ कथमिति॥ द्वयोर्विरोधादित्याशयः॥ अन्यादृशव्यभिचारिभावविशेष्यकारोपप्रकारत्वेपि स्थायि
भावांतरप्रकारकारोपविशेष्यत्वस्य रत्यादेः शृंगारस्थायिभावे करुणव्यभिचारिभावात्मनि दृष्टत्वान्न तयोर्विरोध इत्याशयेनोत्तरयति॥ अ
ग्रमेवाहि ष्टनात्मरसाधिककाव्यरसस्थायित्वलक्षणं विशेषमभिसंधाय मंगलप्रायस्याप्यस्य प्रथमत उद्देशमकृत्वमनुत्तेस्मभरताचार्यस्तच्चाग्रे
विज्ञायते॥ ननु तत्र स्त्रीपुंसयोरन्योन्यालंबनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिः स्थायिभावः प्रत्राद्यालंबनस्तु व्यभिचारिभाव इति न विरोध इति
चेदत्रापि नित्यानित्यवस्तुविचारजन्मा विरागाख्यश्चित्तवृत्तिविशेषो निर्वेदः स्थायिभावोस्तु गृहकलहादिजन्यस्तु स्वावमाननात्मा व्यभिचारी

ननु निर्वेदादेः स्थायित्वं व्यभिचारित्वं च कथमिति चेन्न॥ रसपर्यंतस्थायित्वमितस्ततो गामित्वं चेत्युपाधिभेदमादायोभयसंभ
वात्॥ स्वावमाननं निर्वेदः॥ भवितुमर्हत्येवेत्येवमपि नामतुष्यत्तु भवान्नित्यभिप्रेत्य निर्वेदं लक्षयति॥ इदमुपलक्षणं॥ परमापराध
जन्मा परविनाशहेतुश्चित्तविकारः क्रोधः स्थायिभावः क्षुद्रापराधजन्मा परुषोक्त्यनुक्त्यादिहेतुरसावमर्षव्यभिचारिभावस्तयोः करालक
टोमानसो विकारो यथायथं भयत्रासशब्दाभ्यां स्थायिभावव्यभिचारिभावावभ्युपगतावितिबोध्यं॥ पलोस्मातिक्रांतर्विकारस्त्वाः स्वाप
राधोद्भवस्त्वसौ भयमिति भेदमाहुस्तन्न॥ तथासति॥ ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने दत्तदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभया
द्भूयसा पूर्वकायं॥ दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥ इत्यादेर्वीर
रूढेदभिमतायाभयानकोदाहरणताया असंगत्यापत्तेः॥ श्लोकस्तु ग्रीवाया भंगेन प्रसेचनेनाभिरामं यथास्यात्तथा अनुपतति स्यंदने मुहुर्दत्तद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्टिः शरपतनभयाद्भूयसा विपुलेन पश्चार्द्धेन पूर्वकायं प्रविष्टः श्रमविवृतमुखभ्रंशिभिरर्द्धावलीढैर्दर्भैः कीर्णवर्त्मा यं मृगउदग्रप्लुत
त्वादसंतोर्ध्वमाह्वि यैतिबहुतरं यथा नभोर्व्यांस्तोकं च यथात् तथा प्रयातियत्तस्यश्येति मृगयाविहारिणोदुष्यंतस्य सूतं प्रत्युक्तिता
स्यैक्तुः॥ तथा सत्यैवोत्कटधावनक्रियाया दर्शनक्रियाकर्मत्वमप्युपपद्यते॥ न च क्रियाविशेष्यकबोधांगीकारेणाध्याहारं विनैवैक
वाक्यतयापि तदुपपत्तिरितिवाच्यं॥ प्रकृत्यर्थापेक्षया प्रत्ययार्थस्यैव प्राधान्यस्य बहुशो दृष्टत्वात्॥ क्रियाप्राधान्यप्रतिपादकभूवादि
सूत्रस्थभाष्यस्य च क्वाचित्कानुभवसिद्धक्रियाप्रधानबोधतात्पर्यकत्वात्॥ यद्वा गुणवान्प्राणिनिः प्रधानप्रस्तावे वचनमशिष्यमर्थस्यान्यप्र
माणत्वादितिवचनमात्रं प्रत्याचक्ष्यौ॥ कथमन्यथायो यः शूद्रस्य पचति द्विजोन्नं सोति निंदित इत्यादौ क्रियायाविधित्सितनिंदितत्ववि

संसारे हेयताबुद्धिर्वा॥

धानं क्रियाप्राधान्यनियमवादिभिः समर्थनीयं॥ निंदित इत्यस्य क्रियाविशेषणत्वे कर्मत्वापत्तिः॥ निंदिताभिन्नद्विजकर्तृकाशूद्रान्नपवि
क्रियेति बोधांगीकारे विधित्सितविधानानुपपत्तिः॥ निंदितत्वस्य विशेष्यान्वयिनान्वयित्वस्वीकारे पुनरेकवाक्यताभंगदूषकता बीज
विध्यतरस्मादरे बहुशो दृष्टप्रत्ययार्थप्राधान्यापेक्षा निर्बीजा॥ निंदितमिति क्रियाविशेषणपादांतराध्याहारे च प्रस्थितमितोप्येकवाक्य
तयेति शूद्रान्नपक्ता द्विजो निंदित इति प्रथमांतविशेष्यक एव तत्र बोधोभ्युपेयइतिनतद्वाध्यं नियमपरमपितु न्यायमूलमित्यासूपादा
नापेयाः॥ विशेषावगत्यै निर्वेदस्यायिभावमप्यन्नैव लक्ष्यति॥ नन्वेवमपि व्यभिचारिण्या एते रगणनान्न्यूनतापत्तिरन्यथा पुत्रादिविष
यकरतिस्थायिभावकं वात्सल्याख्यं रसांतरं प्रत्याख्यातुमशक्यमेव शांतरसवदितिचेन्न॥ रतिस्थायिभावगणनयैव तद्गणनान्निर्वेदव्यभि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रतेरत्रनिर्वेदस्यतत्रगणनापिकर्त्तुंशक्यतइतितथैवकिंनकृतमितिनियोगस्यमहर्षिंप्रतिलवितितरांकर्त्तुमनुचितत्वात्॥अशोकवनि
कान्यायादेवान्यप्रत्ययपि॥विभावानुभावावेवात्रव्यंजकौनत्वेकश्चिन्व्यभिचारिणिध्वन्यमानेव्यभिचारिपतरंव्यंजकतयापेस्यतेतस्यैव
प्राधान्यापत्तेरितस्तावेवदर्शयति॥अनुभावइत्यत्रापितत्रेत्यनुषज्यते॥तत्रेतिषष्ठ्यर्थेसप्तमीप्रकृतस्यनिर्वेदाख्यव्यभिचारिभावस्ये
त्यर्थः॥एवमग्रेपि॥तत्त्वज्ञानंगृहकलहादि॥तदुक्तं॥तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदःस्वावमाननमिति॥नहिमुख्यंतत्त्वज्ञानंस्वावमानन
हेतुः॥निर्वेदस्यापिभावविभावत्वंतुशांतरसकथावसरेग्रंथकृदेववक्ष्यति॥स्थायिनोपिव्यभिचारितयातत्रैवमुख्यंतत्त्वज्ञानपदार्थो
विभावइतितुसर्वानुमतःपंथाः॥इदमत्रातिरहस्यमनुसंधेयं॥कस्मिंश्चिद्व्यभिचारिभावेप्रकरणवशात्त्वीयसर्वसामग्रीव्यंग्यतयाप्राधा

तत्रविभावास्तत्त्वज्ञानापदीर्ष्यादयोनुभावाःखेदप्रकाशाश्रुपातादयः॥यथा॥क्षोणीपर्यटनंश्रमायविहितंवादायविद्यार्जि
तामानध्वंसनहेतवेपरिचितास्तेतेधराधीश्वराः॥

न्यंगतेसतिनांतरीयकत्वादन्यदीयस्वल्पसामग्रीव्यंग्यत्वेनतन्निमानमावह
तोन्यस्यव्यभिचारिभावस्यप्रधानीभूतव्यभिचारिभावगुणीभावोपिननिषेध्यः॥यथागर्वोदावमर्षस्यामर्षोदौवागर्वस्य॥नचैवंसतितादृश
भावकाव्यस्यगुणीभूतव्यंग्यत्वापत्तिरितिवाच्यं॥गुणीभूतंभावांतरांगीभूतंव्यंग्यंदृश्यगुपात्तविभावानुभावव्यक्तचर्वणाविषयीभूतंयत्रेत्यर्था
त्॥नांतरीयकस्यविभावानुभावौतुनदृश्यगुपात्तावितिनगुणीभूतव्यंग्यत्वंविभावोप्यस्यनिमित्तकारणमात्रंनतुरसस्येवसर्वथैवालंबनोद्दी
पनेएवात्रापेक्षिते॥यदितुक्वचित्तेअपिसंभवतस्तर्हितत्रापिनकस्यापिविद्वेषइति॥कृज्ञानेनमोहमूलकभ्रमशालिनामयाक्षोणीपर्यटनंनाना
देशसंचारःश्रमायसिध्यतोप्यभिलषितार्थस्यवासनापरिपूरकत्वाभावात्तत्सायावधिसुखादित्याशयः॥विहितंकृतंविद्यातर्केतंत्रादिवो

दायकथायैअर्जितादृढमभ्यस्तांतेवासिनामया
कृतथापरोपकाराभावादितिनिगर्वः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र·त· तेतेहंकारतिरस्कृतनिखिलप्रपंचाधराधीश्वराः पृथ्वीपरिवृढामानध्वंसनहेतवेऽपमाना यपरिचिताअनुसृतागुणग्राहकासंगतेरिति नौका
३५ भावः॥सरोजसुंदरदृशांपद्ममनोहराक्षीणामास्येमुखेदृष्टयःसाभिलाषवीक्षणानिविश्लेषाय वियोगोद्भूतदुःखानुभूत्यैकृताःप्रेरिताः
सदासंभोगोत्कंठायाएवानुवृत्तेरितिभावः॥परंतुप्रयागनगरेनारायणोनाराधिनापूजीतिलत्तत्कर्मणाक्लिश्यतःकुटुंबनायकस्योक्तिरि
यं॥अत्रापदादिविभावितश्चिंताद्यनुभावितोनिर्वेदश्चर्वणाविश्रामधाम॥तथाचेदंभावकाव्यमितिगीयते॥रसकाव्येभावप्रतीतावपिस्था
यिभावएवचर्वणाविश्रामधाम॥भावानांतत्रस्वासाधारणरूपेणाभानादितिस्मर्तव्यं॥यत्रचस्वासाधारणरूपेणापिभावोलंकाराद्युगत
याभासतेतत्राप्यसौनभावपदव्यवहार्यः॥किंतुतदलंकारकाव्यमेव॥यथामम॥यातुप्राघुणिकोनिजांतृणकुटीगंताध्वगंदंडवच्चेतस्तस

विश्लेषायसरोजसुंदरदृशामास्येकृतादृष्टयःकुत्रानेनमयाप्रयागनगरेनाराधिनारायणः॥

रिपालितांदिशमिमांचीनांशुवद्भावति॥श्रीमच्छासनसेविभिःकतिपयैःसूत्रैर्विवर्णैरपिस्वीयैर्यन्त्रितमध्वगैरिदमिवस्वास्थ्यंतदा
लंबतामित्यत्रपूर्णोपमामुख्याप्रभुविषयकरतिभावोगुणः॥यथावाममैव॥योभिन्नदिक्कउभयोस्तयेवरोहोमुनाचयातुलना॥स्वकुटुं
बदेवयोगाज्जातेतत्काकतालीयमित्यादौकाकागमनसदृशविशिष्टतालपतनसदृशंसमासार्थस्तदुत्तरछप्रत्ययस्यसदृशोर्थस्तत्रचैत
दधिकारसूत्रस्यप्रत्ययार्थैकदेशेसादृश्येप्रतियोगितयाप्रकृत्यर्थान्वयस्ययोग्यतासंपत्तयेकाककृततालफलतुलनायांप्रकृतेलक्षणाप्र
कृतिशक्यार्थस्यछप्रत्ययार्थसदृशेप्रयोज्यतयान्वयइतिस्थितेकालिकसामानाधिकरण्यसंबंधेनकाकागमनसदृशेककर्तृकतयेवरोह रामः
विशिष्टतालपतनसदृशापरकर्तृकतयेवरोहप्रयोज्याकाककृततालफलतुलनाप्रतियोगिकसादृश्यवनीतयोस्तुलनेतिशाब्दबोधाकाका ३५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गमनस्य तालपतनस्य च काककर्तृकतालफलतुलनायाश्चोपमानस्यानुपादानाल्लुप्तोपमा मुख्या॥ क्वचित्काककर्तृकतालफलोपभोगे क्वचित्तालफलकर्तृककाकवधे लक्षणेत्यत्रोपमेयविशेषसमभिव्याहारस्तात्पर्यग्राहको भवति प्रकृते इव॥ स्वकुटुंबदेवयोगादिसुक्तविमनस्कतानुभाविता गम्यजीवनसंशयविभावितापि विषादोलुप्तोपमायां लीनः॥ ग्लानिं लसयति॥ निर्बलता धातुपादवाभावः॥ तस्या मनोधर्मत्वाभावादाह॥ व्याध्यादिप्रभूतवैवर्ण्यादिकृतदुःखविशेषोवेत्यर्थः॥ न चैवं निर्बलतोक्तिरसंबद्धप्रलापः स्यादिति वाच्यं॥ बलहानिसामानाधिकरण्यप्रत्यायनेन बलसमानाधिकरणश्रमपार्थक्यसमर्थनार्थत्वात्॥ हरौ श्रीकृष्णे प्रातरुषसि तल्पं पर्यंकमपास्य त्यक्त्वा

ग्लानिर्निर्बलता॥ निःसहता वा॥ तत्र विभावाः॥ रत्यायासतृट्क्षुधादयोनुभावा वैवर्ण्यशैथिल्यदृग्भ्रमणादयः॥ यथा॥ व्याहर्तुं पुनरीक्षणाय न गिरः कंठाद्बहिर्निःसृताः श्लेषाश्लेषविधिं विधातुमपि वा नैवोन्नता दोर्लता॥ प्रातस्तल्पमपास्य गच्छति हरौ चंडांशुचंडातपक्लिष्टश्लिष्टकुरंगभंगुररुचस्तस्याः स्थिता दृष्टयः॥ उत्कटकोटिकानिष्टप्रतिसंधानमिष्टहानिविचारो वाशंका॥ तत्र दुर्नयपरक्रौर्यादयो विभावा अनुभावाः कंपक्रियाप्रच्छादनादयः॥ गच्छति याति सति तस्या राधाया गिरः पुनरीक्षणाय पुनर्दर्शनं वितरीतुं व्याहर्तुं प्रार्थयितुं कंठाद्बहिर्न निःसृताः तथा तस्या दोर्लतापि श्लेषाश्लेषविधिं संभोगांगपारितोषिकालिंगनं विधातुं कर्तुं नैवोन्नता जातेति शेषः॥ किंतु तस्या दृष्टयश्चंडांशोः सूर्यस्य चंडेनोग्रेणातपेनोस्नेन क्लिष्टस्याभिभूतस्य श्लिष्टः संबद्धः कुरंगो हरिणो यत्र तादृशस्य चंद्रस्येव भंगुरा भंगशीला रुचः कांतयो यासां तथाभूताः स्थिता आसन्नित्यर्थः॥ अत्र रत्यायासविभाविता वैवर्ण्याद्यनुभाविता ग्लानिश्रवणाविश्रामधामा शंकां लसयति॥ इष्टहानेरप्यनिष्टांतर्गतत्वादत्र वाकारः संगृहीतविवेकार्थेवोपन्यस्त इति बोध्यं॥ अत एव विभा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गी॰ त॰ वामनयनैतेभूयोनुभूतागुरुजनाः श्वशुरादयश्चित्तविलोचनाश्चित्तं परकीयांतःकरणं विलोचयंति जानंति तादृशाश्चदिति परस्याशयवेदि टीका
३६ न इति यावत्॥ सहकार्यंतरमप्यहमहमिकान्यायादवतरतीत्याह खलाइति पिशुनाइत्यर्थः जिह्वाग्रदोषाः जिह्वाग्रएव दोषः परकीयइत्य
र्थो येषां तादृशाः परकीयदोषोद्घाटनरसिकाइति यावत्॥ पौराजानपदाः॥ क्रूरेति॥ मर्मस्पृग्यो वचःप्रपंचो वाग्विभवस्तेन यशः ख्यातिर्ये
षां तादृशाः परकीयनिंदाव्यसनिनइति यावत्॥ नन्वेतः साक्षिभूतयाश्वश्र्वा सर्वं तत्वानिष्टं परिहर्तव्यमित्याशंक्याह॥ श्वश्रूश्चेति॥ चस्त्वर्थे॥
चक्षुःश्रवाश्रुतमात्रार्थग्राहिणी॥ तथाच परप्रेरितप्रज्ञस्य सक्षणक्षीणसंस्कारस्य परोपन्यस्तसाधकबाधकमानापादितवितथभावकाध्यस

यथा॥ एते चित्तविलोचनागुरुजनाजिह्वाग्रदोषाः खलाः पौराः क्रूरवचःप्रपंचयशसः श्वश्रूश्च चक्षुःश्रवाः॥ किं स्यादित्यमन
र्थबीजमसकृत्तं चिंत्यवक्षोरुहि स्फूर्जत्किंशुकदामवामनयनानिःश्वस्य विन्यस्यति॥ परो""त्कर्षासहिष्णुता॥ परानिष्टचिकीर्षा
वासूया॥ तत्र विभावा मन्युदोर्जन्यादयः॥ अनुभावाः कोपचेष्टादोषाद्भावनादयः॥ कस्य दुःप्रतार्यते वेत्याशयः॥ यद्वा चक्षुःश्रवाव

धिरा॥ तथाच दृष्टान्यथाशंकमानासौप्रतारणाया अविषय इति भावः॥ इत्थमेवं सति किं स्यात्कोनर्थ आपतेदिति एवंरूपमसकृद्वारंवारम
नर्थबीजमुत्कटानिष्टसाधारणोपायं विचिंत्य ध्यात्वा वक्षोरुहि स्तने स्फूर्जत्किंशुकदामभासुरपलाशकुसुमाभरणं निःश्वस्य श्वासमुन्मु
च्य विन्यस्यति नखक्षतगोपनाय स्थापयतीत्यर्थः॥ अत्र स्वीयदुर्नयपरक्रौर्यादिविभाविताक्रियाप्रच्छादनानुभाविताशंकाचर्वणाविश्रा
मधाम॥ असूयालस्यति॥ एतेन परोत्कर्षासहिष्णुत्वपदव्यवहार्यत्वं लक्षणमुक्तं भवति नत्वव्यवहार्यतावच्छेदकाग्रहेदुर्ग्रहमिति ल रामः
क्षणांतरमाह॥ भवानीतुषारभानोः हिमरश्मेः काप्यनिर्वचनीयप्रभावा कलाकलेवकला यथा कला सर्वस्वायत्तीकरोति तथासावपिश ३६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मयापिप्रेमभरेणाङ्गीकृतयापीत्यपिशब्दव्यापारः॥अलभ्यवासेऽलभ्योदुःप्रापोवासःस्थितिर्यत्रतथाभूतेहरशिरसिनिवसतिनि
र्यापयतिष्ठतीतिविधुंतुदस्यचंद्रस्यषोडशकलापूर्णस्यापीत्यर्थःशक्त्याभ्यर्थापादनसमर्थस्यराहोर्मूर्तिंचित्रंप्रतिभवनंभवनेभवनेप्र
तिभूधरंभूधरेभूधरेलिखतिवर्णिकाभीरचयतीत्यर्थः॥अत्रचंद्रकलायाहरशिरोधिश्रयणप्रभवचंद्रकलाविषयकमन्युविभावित
चंद्रकलाग्राससमर्थराहुप्रतिमायाःसर्वत्रलेखनरूपकोपचेष्टानुभाविताचंद्रकलाविषयासूयाचर्वणाविश्रामधाम॥मदंलसयति॥
उत्कर्षोस्यजातिविशेषपरिचयायतद्बीजकमाह॥सुखानुभवइत्यस्यसुखानुभवनियतइत्यर्थोनोत्कर्षोजातिविशेषइत्यग्रिमग्रंथ

यश्च॥हरशिरसिमयाप्यलभ्यवासेनिवसतिकापिकलातुषारभानोः॥इतिलिखतिविधुंतुदस्यमूर्तिंप्रतिभवनंप्रतिभू
धरंभवानी॥हर्षोत्कर्षोमदः॥दुःखासंभिन्नसुखानुभवउत्कर्षः॥तत्रविभावःपानमनुभावउत्तमानांनिद्रामध्यमानांह
सितमधमानांरोदनं॥इंद्रियमोहरूपात्रनिद्रा॥तस्मादिंद्रियसंमोहेनयनघूर्णनसाम्येननिद्रेवनिद्रा॥नचहर्षव्यभिचारि
भावेतिव्याप्तिः॥ विरोधोनवातलसासात्कारेतिव्याप्तिः॥अयंचमदस्त्रिविधः॥तरुणमध्यमाधमभेदात्॥अव्यक्तासंगतवाक्यैःसु
कुमारस्खलद्गत्याचयोभिनीयतेसप्रथमः॥भुजास्फालितस्खलितघूर्णितादिभिर्योभिनीयतेसद्वितीयः॥गतिभंगस्मृतिनाशहिक्काघर्घरा
दिभिर्योभिनीयतेसतृतीयइतिबोध्यं॥अत्रपुरुषप्रकृतिभेदादनुभावोविलक्षणएवेतिविशेषंदर्शयति॥मुख्यनिद्रापदार्थस्यानुभवबा
धितत्वाद्गौणार्थपरतयागौणमेवनिद्रापदमितिदर्शयति॥पदंगौणत्वजीवातुमुख्यार्थसादृश्यंविवक्षितार्थनिष्ठंदर्शयति॥उत्कर्षपदप्रयो
जनंवक्तुमुपक्रमते॥नत्वत्रेति॥हर्षात्मकव्यभिचारिभावइत्यर्थः॥उत्कर्षोजातिविशेषः॥उत्कर्षपदव्यवहार्योजातिविशेषः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. एकस्यैव व्यभिचारिभावस्यावांतरोपाधिरूपोत्कर्षापकर्षभेदे न द्वैविध्यमेव किं न स्यादत आह॥ तत्र लक्षिते मदव्यभिचारिभावे॥ मोह इति नौका
३७ ॥ मोहपदव्यवहार इत्यर्थः॥ यदाहुरभियुक्ताः॥ संमोहानंदसंदोहो मदो मद्योपभोगतः इति॥ अत्र मदलक्षणांतिमांशे शंकाविषये हर्षव्य
भिचारिभावे॥ प्रसाद इति॥ प्रसादपदव्यवहार इत्यर्थः॥ तच्चोक्तमभियुक्तैः॥ देवभर्तृगुरुस्वामिप्रसादः प्रियसंगमः॥ मनोरथाप्तिरप्राप्य
मनोहरधनागमः॥ समुत्पत्तिश्च पुत्रादेर्विभावो यत्र जायते॥ नेत्रवक्त्रप्रसादश्च प्रियोक्तिः पुलकोद्गमः॥ अश्रुस्वेदादयश्चानुभावा हर्षे समा
दिशेदिति॥ नन्वत्र प्रसादास्योनुभावः प्रदर्शितो न तु हर्ष एव प्रसादपदेन व्यवहृत इति कथमुपष्टंभकमेतदिति चेत्॥ वक्त्रप्रसादपदा

तत्र हर्षमात्रसत्त्वान्न तु तत्रोत्कर्षो जातिविशेषः॥ किंच तत्र मनसो मोहोत्र च मनसः प्रसाद इति स्वरूपभेदात्॥ तत्र निद्रारो
दनादयोत्र च पुलकादयोनुभावा इत्यनुभावभेदाच्च॥ ननु तिष्ठ तिष्ठ क्षणं मूढ मधु यावत्पिबाम्यहमित्यादौ वीररसेपि मदो
दृष्टोस्ति तत्र निद्रारोदने वा कथमनुभावौ न हि योधः स्वपिति निद्राति रोदिति वेति चेत्॥ सत्यं रसभेदेनानुभावभेदः शृंगारे ते न
भावाः वीरे नयनारुण्यचमत्कारादयः॥

र्थस्तेजोविशेषो नेत्रप्रसादपदार्थश्च स्वस्थताविशेषस्तस्य प्रसादरूपांतरविकारप्रभूत
त्वरूपोपाधिकत्वं एव प्रसादपदव्यवहारो नान्यथा तथा सत्यननुगमापत्तेरित्यनुजानीहि॥ इति॥ एवं रूपकार्यवैचित्र्यात्॥ स्वरूपभेदा
त्॥ उत्कर्षापकर्षवत्त्वदुक्तमादायैव पार्थक्यांगीकारादिति भावः॥ रसैक्येप्यनुभावभेदो हर्षमदयोः पृथग्व्यभिचारिभावत्वगमक इत्याह
॥ ननु पानादिप्रभववीररसपरिपोषकमदानुभावत्वासंभवात्कथं निद्रारोदनादेर्मदानुभावत्वमित्याशंक्य ते॥ एकस्यैव व्यभिचारिभावस्य रस रामः
भेदनियतानुभावभेदसंभवान्न निद्राद्यनुभावकमदान्नयनारुण्यानुभावकमदस्य विभिन्नव्यभिचारिभावतावक्तुं युक्तेति समाधत्ते॥ रसभेदे प्य ३७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यूनतां एवमुदाहरणश्रमं च परिहर्तुं सामान्यतोऽनुभावं गम्यमनुसृत्य सामान्यीभूतं विभावं व्यंजकमुपादायैव द्विविधमपि मदं स्वाभिधा
नसौष्ठवमावेदयन्नुदाजहार ॥ असावस्मत्सजातीया रसनास्स्वयमेव मधुरस्यति स्वदते स्माकं जनुर्जन्मानर्थकमिष्टानवाप्तेरिति हेतो
स्तत्र मधुनि समस्तमिंद्रियं प्रतिबिंबस्य मिषेण मज्जतीति गम्योऽत्र स्नाद्वादेरभावात् ॥ पानसमकालसंजातमदेन जातान्यन घूर्णा
नाख्यानस्य चिरमनुवृत्या दीर्घकालं सर्वेंद्रियाणामाभिमुख्यं जातमिति मज्जतीत्येतदाशयः ॥ अत्र पानविभावितो गम्यास्ति घूर्णनादनु
५८ भावितो मदश्रवणाविश्रामधाम ॥ बलविरोधिन्याग्लानेः सकाशाद्बलाविरोधित्वप्रतिपादनेनास्य भेदं दर्शयन्नाश्रमं लक्षयति ॥ सर्वं

सामान्येन च मदेन यन्न घूर्णनवचनस्खलनादयश्चेति ॥ यथा ॥ रसनारसयत्यसौ मधुस्स्वयमस्माकमनर्थकं जनुः ॥ इति
तत्र समस्तमिंद्रियं प्रतिबिंबस्य मिषेण मज्जति ॥ आयासप्रभवः पराभवः श्रमः ॥ तत्र विभावास्त्वध्वगत्यादयोऽनुभावाः स्वेदा
दयः ॥ यथा ॥ सरामचंद्रः सह निर्गतायाः स्वेदांबुसंसक्तपयोधरायाः ॥

वाक्यं सावधारणमिति न्यायादायासादेव न तु बलहानेः प्र
भव उत्पत्तिर्यस्येति व्युत्पत्त्या बलहान्यनुक्त्या तत्प्रतिषेधस्यैव प्रत्युतैवकारेणोक्त्या बलसमानाधिकरणत्वमेतद्विशेषणतात्पर्यविषयोऽर्थो
प्रतिषिद्धप्रतिषिद्धप्रतिद्वंद्विता वश्यमनुमतं भवतीति न्यायात्तेन न तत्र नातिव्याप्तिः ॥ पराभवः खेदनामा दुःखविशेषः ॥ अत्र रामो योगिमनो
विश्रामधामभूतः ॥ चंद्रः ॥ सकलानामप्याल्हादजनकत्वात् सह निर्गतायाः अत एव स्वेदांबुसंसक्तपयोधरायाः एतेन चंडांशुसंपर्कजन्यस्वे
दस्य कथमांतरविकारान्नमा पृक्तत्वाशंकापरिहृता ॥ मिथिलात्मजायाः अशेषान्निकृतान् विकृतां श्रमानपांगपातैः कृत्वाशिथिलीच
कारेत्यपव्याख्यानं ॥ यत्तदोर्नित्यसाकांक्षत्वया यच्छब्दस्यानध्याहृतत्वात् ॥ प्रसिद्धिपरतदोर्बुद्धिस्थे ऽशक्तत्वया न यच्छब्दसाकांक्षतेति चे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथापिसहशब्दस्यतृतीयायोगोननिर्दिष्टएव॥येनेत्यध्याहृत्यदूषणाहूयमुद्दिधीर्षुणापिकस्यापांगादितिशब्दोद्याकांक्षानपूरितैवश्री नौका
मता॥भावानांहिरूपसाध्यत्वमिवकृत्यनाश्यत्वमपिसर्वैरेवालंकारिकैरभ्युपगतं॥इत्थंचशिथिलीचकारेत्यस्यायोग्यत्वमपिलब्धंतेद
र्धदं॥श्रमस्यश्रमपदेनैवनिवेदनाद्धमनाख्यदोषोपिदुरुद्धरएवतथाव्याख्यानइतिनकिंचिदेतत्॥तस्माद्यस्यापांगपातैःसहनिर्गता
याद्दष्टिपूतंन्यसेत्पादमितिनीतिरीत्यनुसारेणयत्रैवदेशेगंतुंरामेणेप्सितंममश्रमाकलनात्सहगंतुंमाप्रतिषिध्यादितिमत्वाश्रमाभाव
द्योतनायतत्रदेशेपुरएवधावंत्याएतावतैवचस्वेदांबुसंसक्तपयोधरायाअप्रतिबध्यस्वेदयुक्तपयोधरयुगलायाःस्वेदस्यशिरःक्र
मेणाद्ध्यान्मध्यमंश्रममावेदयतिपयोधरग्रहणं॥मिथिलात्मजायामिथिलानामजनकपुरीतस्यतिजनकोपिमिथिलस्तस्यात्मजा

अपांगपातैर्मिथिलात्मजायाः श्रमानशेषाञ्छिथिलीचकार ॥

कन्यायद्वामिथिलानामकनगर्याएवात्मजातस्याअशेषान्सर्वान्श्रमानितितत्कारणेतत्त्वोपचारान्मार्गकाठिण्यादीनित्यर्थः॥सरा
मचंद्रःशिथिलीचकारएष्टीत्याज्ञाप्यनिवारयामासेतिव्याख्येयं॥युक्तंचैतत्॥रसमंजर्यामनुकूलनायकंरूपमेव॥ष्टथ्विलंभवकोम
लादिनमणेत्वंशैत्यमंगीकुरुत्वंवर्त्मलघुतांप्रयाहिपवनत्वंस्वेदमुत्सारय॥सांनिध्यंश्रयदंडकाननगिरेनिर्गच्छमार्गाद्बहिःसीता
सैविपिनंमयासहयतोनिर्गंतुमुत्कंठतेइत्युदाहृतवतातानेतानेवश्रमस्यविभावाननुभावांश्चश्रमत्वेनाध्यवस्यतैवानेनग्रंथकृताव
हुवचनांतश्रमपदसमभिव्याहारेणाशेषपदमप्युपन्यस्तुपबद्धं॥अन्यथातदानर्थक्यप्रसंगात्॥एतदेकवाक्यतामवगंतुमेवचासौतत्र
स्वेदमितिवाक्यमाहत्योपनिबबंध॥अपिचक्वचिदपिभावंस्वशब्देनाप्रतिपादयताश्रमभावोदाहरणेश्रमपदेनश्रमःप्रतिपादितस्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वसंमतनिबंधकर्तरितथामंतुर्मंतुमवमंतुंतूष्णींभावादन्यदुत्तरंदुरुत्तरमेवेतिभावुकतयाजोषमास्यतइत्ययमस्माकीनःपंथाः॥
केचित्तुश्रमानशेषानित्यस्यस्थानेपयःकणास्तानितिपठित्वाश्रमोदाहरणमश्रमेणैवयोजयंति॥तच्चिंत्यं॥उक्तरीत्याश्रमस्यस्थानेस्था
नेश्रमएवेतिपुनरत्रत्रिधाचिंताबीजं॥तथाहि॥श्रमपदस्थानेश्रमपदमेवयुक्तं॥अन्यथाश्रमपदघटितपाठेऽनुदाहरणताशंका
कष्टमापतेत्॥तच्चायुक्तं॥लक्षणाकष्टंचसप्रयोजनतयाप्रामाणिकमित्यनुपदमेवव्यक्तीभवितेतिविदुषांपरामर्शः॥अन्येतुविभा
वादीनांसाधारण्येव्यभिचारिणापदवाच्यत्वंनदोषइत्यूचुः॥अत्राध्वगतिविभावितःखेदानुभावितःश्रमश्चर्वणाविश्राममधास॥आलस्यं
लक्षयति॥नचात्रपदोक्तग्लानौवक्ष्यमाणजडतायांचातिव्याप्तिरितिवाच्यं॥बलसमानाधिकरणत्वेवश्यकर्तव्यार्थप्रतिसंधानसमा

उत्थानाद्यसमत्वमालस्यं॥विभावागर्भादयोनुभावाःक्रियाक्रांतर्यादयः॥यथा॥हरंहरंतंस्तनहारयष्टिंकरेणरोद्धुंनशशाकता
वत्॥गिरेःसुतागर्भवतीविहस्यदृगंचलंकांतरयांचकार॥

नाधिकरणत्वेचसतिक्रियानुन्मुखत्वमित्यर्थात्॥ग्लानौबलसमानाधि
करणत्वाभावाज्जडतायांचावश्यकर्तव्यार्थप्रतिसंधानाभावात्तयोर्व्युदासः॥केचित्तुनिखिलांरजनींप्रियेणदूरादुपयातेनविबोधिताकथा
भिः॥अधिकंनहिपारयामिवक्तुंसखिमाजल्पतवायतारसज्ञेत्येवमादिशोदाजह्रुः॥तच्चश्रमसंकीर्णं॥ननुप्रियकर्तृककथानांप्रियाश्र
माहेतुत्वात्कथंतत्रश्रमइतिचेल्लज्जापारतंत्र्येणविवक्षितसुरतादेःस्वशब्देनप्रतिपादयितुमशक्यतयाकथाभिरित्यविवक्षितवाच्यंनिर्दिष्टं
तथाचरतिप्रभृतःश्रमस्तत्रागतयाप्यवश्यमुत्तिष्ठतइतितदसंकीर्णालस्योदाहरणतामाविष्कर्तुमसाधारणंगर्भरूपंविभावमाचष्टेगर्भ
वतीति॥गिरेर्हिमालयस्यसुतापार्वतीप्रेमातिशयेनविहस्यदृगंचलंकांतरयांचकारविचलयतिस्मपरंतुस्तनहारयष्टिंहरंतंकरेणरोद्धुं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. अन्तर्गर्भविभावितंहृगंचलविवलनेनहरनिरोधाप्रवृत्त्याचानुभावितमालस्यंचर्वणाविश्रामधाम॥दैन्यंलसयति॥दुरवस्थासाध्यांतःक नौका
३९ रणवृत्तिरित्यर्थः॥दुरवस्थासाध्यावस्थांतरेमानाभावमभिप्रेत्याह॥दुःखातिरेकइति॥दुःखोत्कर्षइत्यर्थः॥शोकव्यावर्तनायातिरेकइति
मतांतरमाह॥निरुक्तदुःखातिरेकस्यानौज्ज्वल्यपदार्थत्वमेवन॥मालिन्यस्यतत्पदार्थत्वेपिनलस्यांतःकरणधर्मत्वमित्यभिप्रेत्यैतन्मतंदू
षयति॥एतेनदौर्गत्यादेरनौजस्यंदैन्यंमलिनतादिकृदितिप्राचांनिरुक्तिमन्नोपोहूलतयायोजयंतःपरास्ताः॥तन्नमालिन्यस्यानुभाव
तयापृथङ्निर्देशोनौजस्यपदस्यांतःकरणवृत्तौतात्पर्यग्राहकस्तस्याअस्मदुक्तार्थांतरपरतामेवावगमयतीति॥बहिर्विषयत्वेनानं

दुरवस्थादुःखातिरेकोवादैन्यं॥अनौज्ज्वल्यमितिकेचित्॥तन्न॥तस्यबहिर्विषयत्वेनतदनुभावत्वात्॥तत्रविभावाःकाय
क्लेशाःसुतपीडादयः॥यथातातचरणानां॥अंसेकुंतलमालिकास्तनतटेनेत्राम्भसांनिम्नगामायन्मन्मथकुंजरेंद्रदशनप्रांते
विलग्नंमनः॥किंचान्यद्विरहानलेनसरसंसंदह्यमानंवपुर्गंडेपांडिमकेतवेनसुतनोःफेनोच्चयंमुंचति॥

तःकरणधर्मत्वेस
तिव्याप्तिरिष्टस्यधर्मतयाज्ञातत्वेन॥तदनुभावत्वादिति॥एतेनदैन्यानुभावाप्रदर्शनप्रयुक्तंदैन्यमपाकृतंवेदितव्यं॥केशपाशस्तन्वहनोपे
क्षयात्कुंतलमालिकांसेविलग्नेतिलिंगविपरिणामेनान्वयः॥एवमग्रेपि॥स्तनतटइत्यत्रतदग्रहणंनिम्नगायाअपिपूरोत्कर्षवत्त्व
मतिशयोक्तिः॥मार्गस्तरुणोमन्मथएवकुंजरेंद्रोसमीक्ष्यकारित्वात्तदुद्धतत्वात्तस्यदशनोविषयासिद्धिप्रयुक्तदुःखात्मकबलव
दनिष्टकारणत्वात्तत्वेनाध्यवसितोमनोरथस्तस्यप्रांतेमुख्यदुःखकारणत्वात्तत्वेनाध्यवसितस्तस्यविषयस्तत्रमनोविलग्नमासक्तं॥ए रामः
तेनैकानुरूपोविषयःकदाकस्यभविष्यतीतिन्यायान्मनोरथभंगोप्यनुभावोदर्शितः॥अन्यच्चकिंब्रूमोविरहानलेनसरसंप्रेमार्द्रंसंदह्य ३९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शरीरमार्द्रोल्लुकमिवगंडेगंडस्थलेपांडिम्नःछलेनफेनोच्चयंडिंडीरोत्करंमुंचतिबहिःकरोतीत्यर्थः॥अत्रविश्लेषपीडाविभावितमनो
ज्वल्याद्यनुभावितंदैन्यंचर्वणाविश्रामधाम॥चिंतांलक्षयति॥उक्तार्थेऽनुशासनंप्रमाणयति॥स्मृत्यतिप्रसंगंवारयति॥स्मृतौनुतद
न्यत्वमितिनातिव्याप्तिरितिभावः॥व्यक्तीभविष्यतिचैतदुपरिष्टात्॥विवक्षितार्थंविशदयति॥एकमात्रप्रवणतेतियावत्॥हेशै
लराजतनयेशंभुंध्यायस्यंतःस्थापयस्यन्यथावमनाख्यदोषापत्तेः॥किंनामजानीमहइतिचेवशब्दःसंभावनायामेवावस्थापयति
ननूपमायांसंभावनायांचवास्तविकशंभुसत्तैववक्तुमुचितेतिचपरित्यजध्यैधातोश्चिंतार्थकताग्रहं॥ननुस्थित्यर्थकोधातुःकिम

चिंताध्यानं॥ध्यैचिंतायामित्यनुशासनात्॥ध्यानंचनस्मरणात्मकं॥स्मृतिभावस्याग्रेपृथक्त्वेनकथनात्॥किंतुचिंतै
काग्र्यं॥तत्रविभावाः॥इष्टानवाप्तिप्रभृतयः॥अनुभावाः॥तापवैवर्ण्यबाष्पश्वासादयः॥यथा॥शंभुंध्यायसिशैलराज
तनयेकिंनामजानीमहेतत्सैवाक्षितनूनपादिवतनोस्तापःसमुन्मीलति॥अक्ष्णोरश्रुमिषेणगच्छतिबहिर्गंगातरंगा
वलिःपांडिम्नःकपटेनचंद्रकलिकाकांतिःसमुज्जृंभते॥ नेननाकर्णितोयद्वमनाख्यदोषाशंकाकलंकिनममुमेवप्रायुंक्ते

तिचेद्भावानाकलनान्मावमंस्थाअन्यान्॥वद॥सकलकविकुलतिलकायमानैर्भट्टश्रीनारायणसिंहविशारददेवप्रभृतिभिर्वेणीसंहा
रमुद्राराक्षसमुख्येषुनाटकेषु॥सत्पक्षामधुरगिरःप्रसाधिताशामदोद्धतारंभाः॥निपतंतिधार्तराष्ट्राःकालवशान्मेदिनीपृष्ठे॥क्रूरग्रहः
सकेतुश्चंद्रमसंपूर्णमंडलमिदानीं॥अभिभवितुमिच्छतिबलाद्रक्षत्येनंतुबुधयोगइत्यादिभिर्यदमंगलप्रायकथाभिरुपक्रमःकृतस्त
थाविधानामेववचनानांसंकेतश्चकृतस्तत्किमन्यथानजानंतिते॥अथतत्रसंधानाभिभवश्रवणोद्दीपितक्रोधयोर्भीमकौटिल्ययोःप्रवे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र०त०
४०

कलनायचतत्तन्नाम्नएवसंकेतश्चाभिमतइतिचेदष्टाध्याय्यांमुखनासिकावचनोऽनुनासिकइतिसूत्रवत्संचाध्याय्यांसाध्यनिर्देशः
प्रतिज्ञेतिसूत्रवच्चचिंतोदाहरणतायाआपततोवगतयेत्रापिक्कचित्कचिदग्रेपिसधातुर्वेइइत्यादोलितेनमूर्ध्नानुमन्यस्व॥प्रकृतम
नुसराम॥किंनामेवितर्के॥वयंतथाजानीमहेयतस्तस्यैवशंभोरेवासितनूनपाल्लोचनाग्निरिवतत्तेनसंभाव्यमानस्तापउग्रत्वात्तनौस
मुन्मीलत्युदेति॥अस्याःसकाशादस्त्रमिषेणगंगातरंगावलिरत्रापितस्यैवत्यनुषज्यते॥एवमग्रेपि॥बहिर्गच्छत्याधिक्यात्सांडिस्नः
कपटेनचंद्रकलिकाकांतिःस्वच्छत्वात्समुज्जृंभतेप्रकाशतइत्यर्थः॥अग्रेष्टानवाप्तिविभाविताताषवैवर्ण्याद्यनुभाविताचिंताचर्वणा

मोहोवैचित्त्यं॥मुहवैचित्त्यइतिधातोर्मोहनंमोहइतिभावव्युत्पन्नोमोहशब्दः॥वैचित्त्यंकार्याकार्यापरिच्छेदः॥तत्रवि
भावाः॥भीत्यावेगानोचित्यादयः॥अनुभावास्तंभपातघूर्णनादर्शनविस्मरणादयः॥यथा॥अंतःस्मरसुवर्णकेतकद
लद्रोणीद्युतिद्रोहिणीलक्ष्मींवीक्ष्यसमुद्यदिंदुवदनासीरांबुधेरुच्छ्रितां॥शंभुस्तंभशताकुलश्शतमखःकर्तव्यमूढे
द्रिपस्सोप्यज्ञानभुजंगपाशपतितोजातस्त्रिलोकीपतिः॥ विश्राम्धाम॥मोहंलक्षयति॥वैचित्त्यार्थकमुहधातोःकर्तव्युत्प
न्नतायांबाधइतिधात्वर्थंविवृण्वन्नाह॥विकल्पंपरिच्छेदासमंचिंतयस्यसतथातस्यभावस्तत्त्वमित्यभिप्रेत्याह॥विकसत्सुवर्णवर्ण
केतकद्रोण्यंतर्गतदलकांतिमतींप्रसन्नत्वाद्गौरत्वाच्चतेनातपास्तश्यत्वमुक्तं॥समुद्यदिंदुवदनाउदयत्पूर्णचंद्राननाउद्रद्कांतिला
क्षीरांबुधेरुच्छ्रितांतेनकदाप्यवासितत्वमुक्तं॥लक्ष्मींवीक्ष्यशंभुःसुखप्रभवःस्तंभशताकुलःसुखकामनासंजातास्तंभ्यस्तंभयुक्तः
शतमखोऽव्यग्रचित्तइंद्रःकर्तव्यमूढेद्रियाघूर्णितःसोपिसर्वज्ञोपित्रिलोकीपतिर्ब्रह्माऽज्ञानमेवभुजंगपाशोऽनिवार्यत्वात्तत्रपति

नौका [illegible] रामः ४०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्रलक्ष्मीविषयकावेगविभावितःस्तंभघूर्णनविस्मरणानुभावितःशंभुशतमखत्रिलोकीपतिगतोमोहश्चवेणाविश्रामधाम॥स्मृतिंलक्षयति॥उंडु
डेत्यादिः॥प्रत्यभिज्ञामप्यत्रैवांतर्भावयति॥स्वविषयतत्तावच्छिन्नविषयकसंस्कारसहितस्वविषयेदंतावच्छिन्नलौकिकसंनिकर्षजन्यंतदुभयतादात्म्यज्ञानंप्र
त्यभिज्ञा॥स्वविषयतावच्छिन्नविषयकसंस्कारजन्यंज्ञानंस्मरणं॥तथाचसंस्कारजन्यत्वस्योभयत्रापिसत्वेनेत्यर्थः॥उद्बोधकमेवास्यविभावाभिमतइत्याह॥यस्मात्कालिं
80 दीश्यामलत्वात्संतन्यमानत्वाच्चतत्त्वेनाध्यवसितारोमालिःसरसोवर्तुलत्वाद्गंभीरत्वाच्चतत्त्वेनाध्यवसितायानाभेःसकाशात्समेत्यप्रादुर्भूयनभसःक्रोडेतन्नतरत्वात्त
त्वेनाध्यवसितमध्यस्थानःपरिक्रीडतेखेलति॥इदंचक्रद्वंद्वंगोलाकारत्वाच्चत्वेनाध्यवसितंकुचयुगलंसुधानिरतिशयतृप्तिसाधनत्वात्तत्त्वेनाध्यवसि —तो

संस्कारजन्यंज्ञानंस्मृतिः॥तच्चप्रत्यभिज्ञारूपंस्मरणरूपंचसंस्कारजन्यत्वेनोभयसंग्रहोन्यथाप्रत्यभिज्ञायाःपृथग्भाव
त्वापत्तेः॥संस्कारोद्बोधकाःसदृशादृष्टचिंताद्याविभावाः॥अनुभावाभ्रूसमुन्नयनादयः॥प्रत्यभिज्ञायथा॥कालिंदीसरसः
समेत्यनभसःक्रोडेपरिक्रीडतेचक्रद्वंद्वमिदंसुधाकरकलामाक्रम्यविस्फूर्जति॥चंद्रोपिस्मरचापचापलचमत्कारंसमालं
बतेतस्मात्सैवकदंबकुंजकुहरेराधापरिभ्राम्यति॥

धररसःतस्याकरस्तदविनाभावात्तत्त्वेनाध्यवसितस्याधरस्यकलामेक
देशत्वात्तत्त्वेनाध्यवसितमुपरितनभागमाक्रम्यतदेकभावनागोचरीभूयविस्फूर्जतिधातूनामनेकार्थत्वाच्चमत्करोतीत्यर्थः॥सुधाक
रकलाकौटिल्याच्चंद्रकलात्वेनाध्यवसितंनखक्षतंप्राप्यशोभतइतिवार्थः॥चंद्रआल्हादकत्वात्तत्त्वेनाध्यवसितंमुखमपिस्मरचापःका
मतियोज्यतारुण्यसमाकर्षणीयत्वात्तस्यकुटिलत्वाच्चचापत्वेनाध्यवसेयाभ्रुकुटीतस्याश्चापलेनक्रियाविशेषेणचमत्कारःशोभातिश
यस्तंसआलंबतेभजतितस्मात्तयाविनासंभावितेतावद्वस्तुमेलनात्सैवचिरातीतकालावलोकितैवराधाकदंबनिर्मितकुंजस्यमंड
पस्यकुहरेभ्यंतरेभ्राम्यतितिष्ठतीत्यर्थः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्रचिंतासहकृततादृशसंस्कारसंनिकर्षविभाविताऽगम्यसुखविकासाद्यनुभाविताप्रत्यभिज्ञाचर्वणाविश्रामधाम॥ वदनेति राधा
 मुखकमलपतद्भ्रमराश्लेषद्वत्यर्थः॥ अंबुजपदेन वदनाश्लेषिणि च सुषिभ्रमरलावेदनादत एव कर्णानाकलनान्मय्यवतंसंकर्ण
विकीर्षितविन्यासंभूषणमंससमूले स्कंधाधो बध्नति सति दरेति ईषद्वलितलोचनं स्मितेति हासचित्रितं आननं मुखं स्मरामि स्मृचिंत
यामित्यर्थे कथनाच्चिंतयामीत्यर्थः॥ ननु ध्यानं च न स्मरणात्मकमित्युक्तवता ग्रंथकृता स्मरणान्यज्ञानं चिंतेत्युक्तं तथा च प्रतियोगिवि
धया स्मृतिभावावगम एवमप्यापात एवेति चेन्न॥ तथा सति किंतु चित्तैकाग्र्यमित्यग्रिमग्रंथानर्थकतापत्तेः॥ तस्माद्विजातीयं
ज्ञानं तत्र पदद्वकतात्पर्यार्थावसेय इति न कोपि दोषः॥ एतेन प्रकृतपद्ये स्मृतिर्न भावो वाच्यस्य व्यक्त्यनालिंगितत्वात्॥ नाप्यलंकारः॥

स्मृतिर्यथा॥ वदनांबुजलग्नदृङ्निपाते मयि बध्नत्यवतंसमंसमूले॥ दरकुंचितदृष्टि राधिकायाः स्मितकिर्मीरितमा
ननं स्मरामि॥ धृतिः संतोषः॥ अदुःखबुद्धिर्वा॥ विभावा ज्ञानशक्त्यादयोऽनुभावा अव्यग्रभोगादयः॥ सादृश्यामूलक

त्वात्॥ किंतु विभावमात्रं स्वतः सुंदरत्वाद्रसे पर्यवस्यतीति वदंतः समाहिताः॥ स्मृधातोर्मुख्यार्थपरतायामेव तेषां निरूपितानां प्र
सरात्॥ ननु तथापीह निहतार्थत्वदोषो दुरुद्धर एव संस्कारजन्यज्ञान एव तस्य योगप्राचुर्यादिति चेत्सत्यं॥ सप्रयोजनलक्षणाति
रिक्तस्थल एव तदवसरात्॥ अत्र चिंतोद्बुद्धसंस्कारविभाविता गम्यभ्रूसमुन्नयनानुभाविता स्मृतिश्चर्वणाविश्रामधाम॥ धृतिं लक्ष
यति॥ संतोष इच्छापर्याप्तिः सा च लाभादेव न भयशोकाभ्यामिति तदुद्भूतधृतिसाधारणं लक्षणांतरमाह॥ अनिष्टाजनकत्वज्ञानं वेत्य
र्थः॥ अनिष्टमिष्टविरोधि द्विष्टमिष्टहानिश्चेति द्वयमपि भवतीति नान्यतरासंग्रहः॥ यद्यपि भूषांगरागो भस्मरजांसि सर्वसुलभा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निनतु बहुवित्तव्ययायाससाध्यमृगमदचंदनादि तथापि मन्मथरिपोः कामारातेर्भोगः सुखानुभवो भ्रश्यति किमुत यद्यपि वे
श्मवसतिस्थानं विपिनं स्वतःसिद्धं नतु कष्टसाध्यसौधतोरणादि तथापि तस्य तत्रानुषज्यते॥ ईशत्वं जगन्नियंतृत्वं हीयते ऊनं भव
ति किमु॥ तथा यद्यपि वाहनं संचारसाधनं वृद्धोनाकलितजन्मभूमिर्वृषो नंदी नतूच्चैःश्रवःप्रभृति तथापि जनैरित्यत्रापि अनुषज्यते स
४ महादेव इति सकलश्रेष्ठ इति वाक्येन नो गीयसे न व्यवह्रियते किमु॥ तथा यद्यपि चेलं चीनांशुककार्यं प्रावरणकारि चर्म गजकृत्तिर्न त्व
नर्घ्यंशाल्यादि तथापि तस्य च दूरगतालंकारस्यापि देवदेव इति वा संज्ञा साम्राज्यलक्ष्मीसंपन्नेकनिरूढमपि नाम जनैस्त्यज्यते किमुप्र

यथा॥ भूषा भस्म रजांसि वेश्म विपिनं वृद्धो वृषो वाहनं चेलं चर्म तथापि मन्मथरिपोर्भोगः किमु भ्रश्यति॥ ईशत्वं किमु हीय
ते किमु महादेव इति नो गीयते किं वा तस्य च देवदेव इति वा संज्ञा जनैस्त्यज्यते॥ स्वकृतक्रियासंकोचो व्रीडा॥ न च शंकापात्रा
सेवातिव्याप्तिः॥ तत्र क्रियाविरह एव न तु क्रियासंकोचः॥ अत्र विभावा दुराचारादयः॥ अनुभावाः शिरोनमनवदननयन
प्रच्छादनादयः॥

युज्यते वा किमित्यर्थः॥ अत्र गम्यविवेकविभाविता चापलोपशमाद्यनुभाविता धृतिश्रवणा विश्रामधाम॥ व्रीडां ल
क्षयति॥ संकुच्यते अनेनेति करणव्युत्पत्त्या क्रियासंकोचकारणीभूता चित्तवृत्तिरित्यर्थो दांतरत्वमुपपद्यते संकोचश्च सकंपप्रवृत्तिसाध्यत्वं
॥ नतु क्रियाविरहप्रयोजकत्वे एवं किं न कृतमित्याशंकते॥ अतिव्याप्तिं वारयति॥ यत इत्यादिः॥ स्त्रीणामेव पुरुषावलोकनमात्रात्सुसामेव
च प्रतिज्ञाभंगमात्राद्व्रीडेति तदुभयसाधारणं व्रीडाविभावं दर्शयति॥ काचित्कमलनयना कांतेन नायकेन चेलमंचलं हरति सति हरितं दि
शमेतेन भूत्या दृष्टिरावेदितालोलं कांतरं यथा स्यात्तथालोकयंतीवृ ततश्च सुःक्षिपंती अत एव भित्तौ भित्तौ अर्थात्काचनिर्मितायां संज्ञा॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. ताभिमुख्यायां च चतुर्दिगवस्थितभित्तावपि प्रतिफलगतं प्रतिबिंबतादात्म्यापन्नं भालसिंदूरबिंदुं सिंदूरांकितं रक्तं दृष्ट्वा दृष्ट्वा पुनः नौका
४२ पुनरवलोक्य केलिदीपः क्रीडार्थं स्थापितो दीपस्तेन स्त्रीजातिसाधारणव्रीडाविभावो दर्शितस्तस्य भ्रमेण भ्रमवशेन एतेन स्वयं निर्वा-
पितदीपेपि मणिमयरतिमंदिरे स्वतः प्रकाशताद्योतनादुदात्तालंकारो व्यज्यते॥ सहसा झटिति गात्रमंगं एकवचनेनावश्यपिधेयप-
योधराद्याविष्कृतं पाणिरेव पंकेरुहं प्रसारितांगुलिदलमाक्रांतेन॥ लसदंसहृदयसंलग्नाग्रं स्वस्तिकीकृतं यद्बाहुयुगलं तेनेलियाव-
त् प्रच्छादयति पिधत्त इत्यर्थः॥ केचित्तु हरितं मुपरिलनकौसुंबवस्त्रशोभातिशयाधायकं हरिद्वर्णं मधोंशुकमिति चेलविशेषणं कांते
हरति सति॥ किं वालीभिर्हरितायस्मात्तस्मात्सा हरितालिकेत्तिवद्धरितं अपहृतं चेलं परिधानीयं लोलं चकितं यथास्यात्तथालोक्य

यथा॥ यो व्याख्यावर्णने॥ भित्तौ भित्तौ प्रतिफलगतं भालसिंदूरबिंदुं दृष्ट्वा दृष्ट्वा कमलनयना केलिदीपं भ्रमेण॥ कांते चैलं ह-
रति हरितं लोलमालोकयंती गात्रं प्रच्छादयति सहसा पाणिपंकेरुहेण॥ इतरेतरक्रियाकारणं॥ क्रियायाः शीघ्रता
वा चपलता॥ स्यन्नविषयानुपादानमेव द्रष्टेः सूर्यत्वं गमयति सा पाणिपंकेरुहेण मुकुलितेन पाणिना गात्रं किंचिदेवांगं प्र-
च्छादयतीति हरितपदं चेलपदयोरन्यतरस्य स्थानव्यत्ययं कृत्वा क्लिष्टगत्या योजयंति॥ अत्र नायकालोकतदुपाचारविभाविता ग-
प्रच्छादनानुभाविता व्रीडा चर्वणा विश्रामधाम॥ चपलतालक्ष्यपति॥ व्यासज्यवृत्तिधर्मावच्छिन्नक्रियानिष्ठका यंतानिरूपितकार-
णताश्रयद्दृत्यर्थः॥ ननु कारणतावच्छेदकवैजात्यापरिचये दुर्ग्रहमेतल्लक्षणं॥ तत्परिचयेन तदेव लक्षणमस्त्वित्यभिप्रेत्य तथैवाह॥ शी- रामः
घ्रता॥ क्रियाशेधानियामिका विजातीयांतःकरणवृत्तिरित्यर्थः॥ एषैवानालोच्यकारित्वमिति गीयते॥ एतेन प्रकृतोदाहरणे विश ४२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिर्भवतिज्ञानानामेवयौगपद्यनिषेधात्॥तथाचानेकक्रियाकारणीभूताचित्तवृत्तिरेकानास्त्येवेतिनव्यगौडमतमालंब्यप्रजल्पं
तःसमाहिताः॥तथापियुगपत्तावत्प्रयत्नकारणीभूतायाश्चित्तवृत्तेस्तैरप्यभ्युपगमात्॥अन्यथाप्रयत्नयौगपद्यस्यैवाकस्मिकतायां
दुर्वारत्वात्॥अस्माकंतुविजातीयएकएवप्रयत्नस्तावत्क्रियाकारणत्वेनाभिमतः किंवातत्कारणतावत्प्रयत्नकारणीभूतान्यैवैकस्य
न्यदेतत्॥तावत्प्रयत्नसमुदायएवचपलतापदार्थइतितुयुक्तमुत्पश्यामः॥कारणतास्वरूपलक्षणवाक्येपिइतरदितरदितिचेष्टका
४२ रणस्यानेकत्वंस्फुटयितुंबहुषुपुस्तकेषुव्यस्तपाठस्यदर्शनात्॥अपिचकारणतावच्छेदकस्वरूपलक्षणवाक्येपिक्रियतेनेनेतिक्रियाप्रयत्न
स्तस्यशीघ्रतायौगपद्यमित्यक्षरानुसारात्॥इत्थंचव्यासज्यवृत्तिधर्मस्यकार्यतानवच्छेदकत्वेपिनक्षतिरितिमंतव्यं॥वैरिदर्शनंशत्रुगवेष

मात्सर्यद्वेषरागादयोविभावाः॥अनुभावावैरिदर्शनवाक्पारुष्यप्रहारादयः॥यथा॥लंकाचारिणिसेतुकारिणिरणक्रीडा
चमत्कारिणिप्रौढानंदवचःप्रसारिणिपुरोरामेधनुर्धन्वति॥जातास्तस्यदशाननस्यसमरप्रारंभदंभस्फुरत्केयूरक्वणितानु
मेयविशिखत्यागाःकरश्रेणयः॥

णं॥लंकाभिमुखगमनशीलेसेतुबंधकर्तरिरणेसंग्रामेयाक्रीडाहेलासमाश्रितोव्यापारस्तेनचम
त्कारिण्यद्भुतेप्रौढंप्रतिपक्षोहेजनसमर्थंतथास्त्रीयोत्साहसमुद्भूतंचयद्वचःसिंहनादस्तद्वोषिणिरामेदाशरथौपुरोग्रेधनुश्चापंधु
न्वतिप्रत्यंचाकर्षणेनटणत्कारयतिसतितस्यत्रिलोकीजयिनोपिदशाननस्यरावणस्यकरश्रेणयःकराणांविंशतिरपि॥बहुवचनमेके
कप्रक्षेपसमासक्तान्अभिमुखसव्यापसव्यबाहुद्वयस्यसव्ययोरेवोपर्यधःसोरपसव्ययोरेवोपर्यधःसोःसव्यापसव्ययोर्वोपर्यधस्सोऽस्त्रस
मुदायान्सव्यसाचितामभिव्यंजकान्बहून्वक्ति॥यत्तुपंचपंचानामेवसमुदायाश्चत्वारोबहुवचनार्थइतिकश्चिदाह॥तद्भसाभिधानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ समरेति॥दंभोगर्वस्ततोनस्फुरणमतःसमरेत्यादितद्विशेषणं॥तथाचसमरः प्रारभ्यतेयेनताहशोदंभोयेनेतिव्युत्पत्त्यादंभःसंग्रामा नोका
४३ त्मकेनफलेनोपहितोयद्दशात्सवेगोत्रदंभांतार्थः॥तेनव्यावल्गातोबाहुभूषणस्वराणितेनानुमेयाएवंनतुदृश्यावेगातिशयाद्वाण
प्रक्षेपायासांतथाभूताजाताइत्यर्थः॥नचात्रवक्ष्यमाणामर्षरूपव्यंग्येयनैवोपपत्तौकिंचपलतायाआधिक्येनेतिवाच्यं॥रावणेनासा
मर्षस्यचिरंतनतयायुगपत्तावक्रियाणामिदंप्रथमतायाअनुपपत्तेः॥अभिनवोदितकार्यस्यकारणेनाप्यभिनवोदितेनभवितव्यं
नतुचिरंतनेनेतिचपलतायाआधिक्यात्॥नन्वमर्षप्रकर्षएवाभिनवंकारणमस्तितिचेदेतावतैवसिद्धंनःसमीहितं॥हर्षमदयो
रिवामर्षचपलतयोःपार्थक्यस्यत्वयास्वहस्तितत्वात्॥प्रकर्षस्यताहशविजातीयप्रयत्नप्रयत्नकलापान्यतरोपाहितत्वएवपर्य

चेतःप्रसादोहर्षः॥प्रियदर्शनपुत्रजननादयोविभावाः॥अनुभावाःपुलकस्वेदाश्रुस्वरभेदादयः॥यथा॥पुलकितकुच
कुंभपालिराधाव्रजतिमुकुंदमुखेंदुवीक्षणाय॥

वसानात्॥अमर्षत्वावांतरजातौमानाभावादित्यास्तांतावत्॥अत्रधनुर्ध्वनि
समुद्दीपितमात्सर्यविभावितायुगपत्सर्वभुजकरणकप्रहारानुभाविताचपलताचर्वणाविश्रामधाम॥हर्षलक्षयति॥प्रसादःप्रसाद
हेतुःसुखं॥तेनांतरत्वमायाति॥दर्शनंज्ञानमात्रं॥दृष्टेत्यादितिवृन्नतुचाक्षुषमेवदृष्टोरिष्टप्रदोराहुरित्यादिवत्॥तेनवीक्षणायव्र
जतीत्युदाहरणेदर्शनातिरिक्तप्रियश्रवणादेरेवविभावस्यगम्यत्वेपिनक्षतिः॥राधामुकुंदस्यश्रीकृष्णस्यमुखमेवाल्हादकत्वादिंदुस्तेन
राधाचसुखोऽस्त्रकोरत्वमावेदयतोकंठागम्यते॥तस्यवीक्षणायावलोकनार्थं॥पुलकितेति॥संजातपुलकाकुचावेवकुंभौतेनोत्कूनानु रामः
रवत्वमावेद्यतेतयोःपालिर्मंडलंयत्रकर्मणियथास्यात्तथाव्रजतियातिमध्यस्यतनोरपिभंगाद्व्यथायाभीतिंनविरचयतिकरोतिनितंब ४३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अतएवनितंबपदमजहत्स्वार्थलक्षणयाकुचावपिवक्ति॥गतिविरोधीन्यपीतिशेषः॥नगणयतिनानुसंधत्तेइत्यर्थः॥अत्रगम्यप्रि
यसमागमश्रवणविभावितःपुलकोगपुष्ट्याद्यनुभावितोहर्षश्रवणाविश्रामधाम॥आवेगंलक्षयति॥आकस्मिकोयइष्टस्यवाऽनिष्ट
स्यवानिपातःसविवर्तोमुख्यकारणंयस्यताहशोमनोविकारइत्यर्थः॥जडतायामतिप्रसंगान्निरसणांतरमाह॥संभ्रमपदार्थोवेत्यर्थः॥
दर्शनश्रवणेज्ञानमात्रे॥तदुक्तं॥आवेगोराजविद्रावरस्यादेःसंभ्रमोमतः॥तत्रविस्मरणंस्तंभःस्वेदःकंपःस्खलद्गतिरिति॥रघुपतेःसे
नाचरानभटानालोक्यदष्ट्वावैरिमृगीदृशांकातरासीणामेकःकरोविश्लथेलराधावनगलितेवाससिद्वितीयःस्खलितावलंबनायसहच
विरचयतिनमध्यभंगभीतिंगणयतिनापिनितंबगौरवाणि॥आकस्मिकेष्टानिष्टनिपातविवर्तः॥संभ्रमोवावेगः॥वैरिदर्शन
प्रियश्रवणोत्पातादयोविभावाः॥अनुभावास्त्वराशरीरस्खलनविपर्यासादयः॥यथा॥एकोवाससिविश्लथेसहचरीस्कंधे
द्वितीयःकरःपश्चाद्गच्छतिचक्षुरेकमितरद्धर्त्तुंमुखंभ्राम्यति॥एकंकंटकविद्धमस्तिचरणंनिर्गत्यमुत्कंठतेचान्यद्वैरिमृगीदृशांरघु
पतेरालोक्यसेनाचरान्॥ रीस्कंधेन्यस्तस्त्यैकंचक्षुःपश्चात्पृष्ठतोगच्छतिधाटीपरीक्षायैइतरच्चमार्गभेदप्रसंगभयाद्धर्त्तुंरर्थादग्रेग
च्छतोमुखेमुखपदेनमुखानवलोकनेतुसर्वत्रभरबुद्धिरेवतासामित्यर्थोध्वन्यते॥भ्राम्यति॥एकंचरणंकंटकविद्धमस्तिमार्गानालोचनाद
न्यन्निर्गत्यधावितुमुत्कंठतेभयातिपातादित्यर्थः॥अत्रसेनाचरदर्शनविभावितस्त्वरास्खलनानुभावितआवेगश्रवणाविश्रामधाम॥यथा
वामम॥पतिमुपयांतमकस्मान्मध्येरथ्यंतयासमालोक्य॥यत्स्खलितमाशुगत्यानचिरात्स्फलितंमनोरथैस्तस्य॥अत्रप्रियदर्शनविभावितः
स्खलितानुभावितःसतश्चेतिविवेकः॥नव्यास्तु॥आकस्मिकोऽचिंतितबलवचरानर्थप्रतिपत्तिसंभूतइष्टानिष्टनिपातसेष्टानिष्टयोर्हेयो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ संभ्रमइतितुसकलव्यवहारविषयत्वप्रदर्शनेनकार्यविशेषपरिचयद्वाराकारणपरिचयोभवतीतिप्रदर्शनाय॥संभ्रमपदार्थत्वस्यप नौका
४४ रंशक्यतावच्छेदकापरिचयाद्दुर्ग्रहतासूचकोत्रवाशब्दः ॥ अतएवनोदाहरणन्यूनतापि ॥ ॥ ॥ अतएवचे
ष्टानिष्टनिपातपदस्याग्रिमेष्टानिष्टदर्शनपदेनतुल्यार्थत्वमपीतिनसंदर्भविरोधइतिप्राहुः॥जडतालक्षयति॥कार्याकार्यविवेकभिन्न
ज्ञानवत्त्वेत्यर्थः॥यत्किंचिद्विषयकविवेकभिन्नंज्ञानंत्रासभीत्यालस्येष्वतिप्रसक्तमितिविवेकत्वावच्छिन्नसामान्यभिन्नत्वंज्ञानेप्रापयितुं
सकलेति॥विवेकशून्यत्वमेवास्तुकिंज्ञानघटनयेत्याशंकते॥समाधत्ते॥नचस्वप्नेज्ञानमस्त्येवेत्यतिव्याप्तिनादवस्थ्यमितिवाच्यं॥ज्ञानप

सकलव्यवहारासमज्ञानवत्ताजडता॥नचमूर्छापस्मारनिद्रास्वप्नेष्वतिव्याप्तिः॥तत्रज्ञानविरहात्॥इष्टानिष्टदर्शनादयो
विभावाः॥अत्रभावाअनवभाषणानिर्निमेषप्रेक्षणेष्टानिष्टपरिच्छेदाः॥यथा॥दुष्पारवारिनिधिपारमुदारवीर्यामागच्छ
तोहनुमतोहसितंवितेनुः॥उद्दीक्ष्यनीरनिधिनीरमधीरवीचिचित्रार्पिताइवपुनःकपयोबभूवुः॥ देनमानससामान्यज्ञानविव

क्षणात्॥मानसत्वंचजातिरितिनज्ञानसामान्यस्यमनोजन्यत्वेनासंभवः॥अत्रकचित्पुस्तकेनचालस्यभीतित्रासेष्वतिव्याप्तिः॥तत्र
तत्रकतिपयव्यवहारस्यसत्वादितिसकलपदप्रयोजनंमूलएवसुव्यक्तं॥इष्टज्ञानसहितानिष्टज्ञानमित्यर्थः॥साहित्यंसामानाधिकर
ण्यमभेदोवेतिबोध्यं॥आदिनाचिंतोत्कंठाविरहभयप्रभृतयः॥येकपयोदुरासाधपारस्यपयोधेःपारंतीरंप्रत्युदारंप्रकटीभवद्वीर्यंबलं
यस्मिन्कर्मणियथाभवतितथाऽऽगच्छतोदृश्यमानाद्धनुमतःसकाशाद्धसितंहर्षाहितेनुर्विस्तारितवंतस्तएवनीरनिधेःसमुद्रस्यनीरंज रामः
लमधीरवीचीतिनीरस्यविधिविशेषणं॥क्षुब्धमुद्वीक्ष्यपुनस्तत्र्थैवचित्रार्पिताइवनिश्चेष्टतयासंभाव्यमानाबभूवुः ॥ ॥ ॥ ॥ ॥ ४४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्रहनूमन्नीरनिधिनीरोभयविलोकनविभाविताविश्लिष्टतानुभाविताजड्ताचर्वणाविश्रामधाम॥गर्वंलक्षयति॥द्वयोरपिसमानसंवित्संवे
द्यतयाविनिगमनाविरहेणतुल्यमायातिलत्त्वथैवाह॥तथाचसमबलयोर्विरोधात्मकोविकल्पोवाशब्दार्थोन्यथाद्वयोरेकत्रनिवेशेन्यतरवै
यर्थ्यापत्तेरितिभावः॥कलशोद्भवेनागस्तिनाजलधौसमुद्रेनिःपीतेःशेषंचुलकितेसतिगंगयाभागीरथ्यावपुःशरीरंगौरीपतेःपार्वतीजाने
र्ललाटदहनेनिटिललोचनाग्नेर्होतुंप्रक्षेप्तुंहंतेतिखेदेयावद्यावत्कालमध्येउपक्रमउद्योगःकृतआरब्धस्तावत्तावत्कालमध्यएवमये
यर्थांतरसंक्रमितवाच्यमनन्यसाधारणप्रभावंवक्ति॥तत्रदेशे॥विपक्षेतिशत्रूणांनगरीषु॥एतेनानेकपयोधिपर्याप्ततास्त्रुणोनिवेदिता॥

आत्मनिसर्वाधिकत्वबुद्धिः॥सर्वस्मिन्नधमत्वबुद्धिर्वागर्वः॥बलैश्वर्याभिजनलावण्यादयोविभावाः॥अनुभावाअवज्ञाभ्रू
ष्टिचेष्टितहसितपौरुषप्रकाशादयः॥यथापरशुरामवाक्य॥निःपीतेकलशोद्भवेनजलधौगौरीपतेर्गंगयाहोतुंहंतवपुर्ललाटद
हनेयावत्कृतःप्रक्रमः॥तावत्तत्रमयाविपक्षनगरीनारीदृगंभोरुहद्वंद्वप्रस्खलदश्रुवारिपटलैःसृष्टाःपयोराशयः॥इष्टसंशयः
॥अनिष्टजिज्ञासावाविषादः॥

यानार्यस्तासांचक्षूंष्येवांभोरुहाण्यंभांसिरोहंतिसमुत्पद्यंतेयेभ्यस्तेषां॥द्वंद्वमितिबहुसंख्याकानांनारी
णामप्यपेक्षयाद्वैगुण्यमावेदयितुं॥ततःप्रस्खलदतिशयेनोद्गच्छद्यदश्रुसंज्ञंवारिजलंतस्यपटलंसमुदायोत्रबहुवचनंसमुदायगतबाहु
ल्यंकथयत्स्वयोराशिगतबाहुल्यंद्रढयति॥तैःकृत्वापयोराशयोकूपाराःसृष्टाइत्यर्थः॥अत्रगम्येनबलैश्वर्यादिनाविभावितःपौरुषप्रकाशानुभ
वितोगर्वश्चर्वणाविश्रामधाम॥विषादंलक्षयति॥अनिष्टजिज्ञासायामपिविषादव्यवहारादाह॥तथाचेष्टसंशयानिष्टजिज्ञासयोरन्यतराव
गत्यर्थमत्रवाकारः॥अयमेवव्यवस्थितविकल्पइतिगीयते॥इष्टपदेनैकविषयसामान्यमेवग्राह्यंनतुप्रियजनगांधर्वकाव्यसेवाभिरित्यादावि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राग्वदत्रापिप्रकृतिभेदेनानुभावोभिद्यतइत्याह॥मध्येवर्त्ममार्गस्यमध्येकलानिधेश्चंद्रस्यसमुदयोजातःकिमातन्यतांकोप्युपायःकर्तव्य
इतिकस्याअभिसारिकोक्तिः॥यदिप्रत्यावृत्यभवनंनिजंव्रजामितर्हिवाचांप्रच्यवःप्रतिज्ञाहानिर्भवेद्यदिवानिकुंजमेवगच्छामितर्हीतःगृहे
हेवोह्लादनायविशिष्यानिर्देशः किंस्यात्कोनर्थआपतेत्कोवेदकोजानीतेनकोपि॥अहंतुसुतरांनजानेयदिकश्चिद्देवोभयभिन्नएववनतटेउ
भयतस्संकटादौदासीन्यमालंब्यतिष्ठाम्येतावताकिंजातंनकिमपि॥इष्टानवाप्तेरनिष्टावाप्तेश्चतादवस्थ्यादित्यर्थः॥अत्राभिसरणरूपापरा
धविभावितोनिष्टनिवारणचिंतानुभावितोविषादश्चर्वणाविश्रामधाम॥औत्सुक्यंलक्षयति॥प्रियप्राप्तौविलंबोमास्त्वितीच्छेत्यर्थः॥नन्विह

दृष्टपदेनजीवनधनयशःशरीरपुत्रकलत्रादयः॥विभावाअपराधधनगमनादयः॥अनुभावाउत्तमानांसहायान्वेषणोपाय
चिंतादयः॥मध्यमानांविमनस्कता॥अधमानामिष्टध्यानधावनमुखशोषनिद्राश्वासादयः॥यथा॥प्रत्यावृत्ययदिव्रजामि
भवनंवाचांभवेत्प्रच्यवोनिर्गच्छामिनिकुंजमेवयदिवाकोवेदकिंस्यादितः॥तिष्ठाम्येवयदिकश्चिदेहूनतटेकिंजातमेतावताम
ध्येवर्त्मकलानिधेःसमुदयोजातःकिमातन्यतां॥औत्सुक्यंकालासहिष्णुता॥सकलेंद्रियाणामेकदैवक्रियाप्रारंभोवा॥प्रियस्म
रणादयोविभावाः॥ इष्टकालेनाभिनवसंबंधोविलंबस्तथाचप्रियसमागमेनाभिनवसंबंधीदृष्टःकालोमास्त्वितीच्छातदितिफलितं
तदपेक्षयेष्टःकालःप्रियसमागमेनापूर्वसंबंधीभवत्वितीच्छैवौत्सुक्यमत्युलाघवाद्व्यापकत्वाच्चेयंतस्तथैवाह॥सकलानामिंद्रियाणामे
ककालीनायाक्रियाव्यापारस्तस्यप्रारंभस्समुत्पत्तिर्यस्याःसकाशात्साधुनैवास्यप्राप्तिर्भवत्वितीच्छारूपांतःकरणवृत्तिर्वेत्यर्थः॥अस्तिह्यौ
त्सुक्याद्व्यापारशैघ्र्यमितिभावः॥प्रातर्दूरसमागतनायकायानायिकायाःसखींप्रतिसख्यावातथाविधनायिकांप्रत्युक्तिः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हे सुंदरि सखि वासरस्य दिवसस्याद्यः प्रथमो यामः प्रहरः कैरपि स्वमात्र साक्षात्कृतैः केलिकौतुकेति ॥ क्रीडाचमत्कारगोचरमनोरथै द्वितीयः पुनर्मल्लीकेसरचारुचंपकनवांभोजस्रजां गुंफनैर्ग्रथनैस्तृतीयः कांचीकुंडलहेमहारवलयन्यासैर्नीतो यापितस्ततस्तदनंत रं संप्रतीतियावच्चरमो यामः कथमिति चिंतां गमयति ॥ केनोपायेन यास्यति गमिष्यति ॥ उत्कंठया कार्यांतरास्फूर्त्या दिवसदैर्घ्यस्यैव प्रतिपत्तेः ॥ मल्लीति बहुवचनं पुनः पुनः सातिशयकलानिर्माणाभिप्रायं ॥ कांचीति बहुवचनं त्वरयान्यासात्पुनः पुनः स्रंसनाभिप्रायं शेषं स्पष्टमेव ॥ अत्र गम्यप्रियसमागमनविभावितं गात्रगौरवचिंतानुभावितमौत्सुक्यं चर्वणाविश्रामधाम ॥ प्रांचस्तु चेतोमीलनं निद्रा

अनुभावास्तंद्रागात्रगौरवादयः ॥ यथा ॥ आद्यः कैरपि केलिकौतुकमनोराज्यैर्द्वितीयः पुनर्मल्लीकेसरचारुचंपकनवांभो जस्रजां गुंफनैः ॥ कांचीकुंडलहेमहारवलयन्यासैस्तृतीयस्ततो नीतः सुंदरि वासरस्य चरमो यामः कथं यास्यति ॥ इतरदिंद्रि यमपहाय मनस्त्वचि यदावर्तते तदा निद्रा ॥ मीलनं च ज्ञानजनकव्यापाराहित्यं पुरीतत्संबंध इति यावत् ॥ सुप्तं स्वप्न इंद्रियांतर संबंधविरहकालीनत्वगंतर्गतस्वप्नवहनाडीमनोयोग इति यावदिति वदंति ॥ तेषां मते निखिलेतरबाह्येंद्रियसंबंधविरहकालीनस्वप्न वहनाडीबाह्यदेशावच्छिन्नत्वङ्मनोयोगस्य विभिन्नत्व्यभिचारिभावतापत्तिः ॥ निद्रायामिव भावत्वस्य तत्रापि सत्वान्मनोधर्मत्वाच्च ॥ न या पुरीतत्संबंधस्य स्वप्नपूर्ववृत्तित्वनियमो न घटते सुषुप्तेः प्रागपि स्वप्नसंभवात् ॥ तथा च स्वप्नात्प्राङ्निद्रोद्देशे नियामकाभावश्चेत्यत्र शयानो नि द्रांतर्गत एव स्वप्न एवं च सुषुप्तेः प्रागवश्यं निद्रेति तत एव सुप्तात्प्राङ्निद्रोद्देशश्चेत्याशयेन निद्रां लक्षयति ॥ तदा ॥ तत्कालीना ॥ अंतःकरणवृ त्तिरिति शेषः एवमग्रेपि यद्यपींद्रियमपहायेत्येव वक्तुमुचितं तथापि त्वचि स्थितमिति रिक्तं वायवीयमिंद्रियं येन मन्वते तेषां त्वच एवेंद्रियत्वम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त.
५६

त्वगिंद्रियप्रसिद्धस्त्वक्शब्दो लाक्षणिक इत्यन्ये। तथा च प्रातिस्विकरूपेण प्रहाणलाभात्सर्वमतसाधारण्यमित्याशयः॥ सर्वेंद्रियक्रियासंपा नौका
तलक्षणां सुप्त्यानंतरं सर्वेंद्रियक्रियाशैथिल्यलक्षणां सुप्तमेव गणयितुमुचितमित्याशंकामपाचिकीर्षुराह॥ स्वप्नस्य निद्रांतभावं दर्शयति॥
नाडिकायामित्यल्पार्थककप्रत्ययेन तस्यास्त्वगात्मता बोध्यते॥ मयामेघखंडः श्रीकृष्णः स्वप्ने दृष्टः कीदृशस्तपनदुहितुर्यमुनायाः कच्छं तीरं प्र
तिगच्छन्॥ तथा पिच्छगुच्छावतंसः॥ किंचास्मद्वदनं कुंचितेनाक्ष्णाऽसकृद्वारंवारं पश्यन्॥ अपि च स्निग्धः प्रेमपूर्णोऽपांगो नेत्रप्रांतो यस्य॥ अ
परं च शिथिलचरणः सालसपदपद्मः॥ अन्यच्च स्तोकविस्पष्टहासः किंचिल्लस्यमुखविकासः॥ इतरच्च कमलकलिकामंडनः कमलकुड्म

सुप्तस्य कारणत्वात्सुप्त्याङ्गिद्राभरतेनोक्ता॥ स्वप्नवहनाडिकायां मनो यदा वर्तते तदा स्वप्नसंभवः॥ तत्र विभावाः स्वभावचिं
तालस्यक्लमादयः॥ अनुभावाः पार्श्वकरणनयनभ्रूचालनविभ्रमवचनस्वप्नदर्शनादयः॥ यथा॥ गच्छन्कच्छं तपनदु
हितुः पिच्छगुच्छावतंसः पश्यन्नस्मद्वदनमसकृच्च सुषाकुंचितेन॥ स्निग्धापांगः शिथिलचरणः स्तोकविस्पष्टहासः स्वप्ने
दृष्टः कमलकलिकामंडनो मेघखंडः॥ ग्रहाद्यावेशोऽपस्मारः॥

लभूषण इत्यर्थः॥ अत्र चिंताविभाविता स्वप्नदर्शनानुभाविता बाह्यें
द्रियमीलनरूपा निद्रा चर्वणाविश्रामधाम॥ अत्र कवेरिदमुक्तिसौष्ठवं॥ यत्स्वप्न इति स्थाने निद्र इति पाठे प्राचीनाभिमतसुप्तोदाहरणमेतदे
व॥ अनामंत्रणीयामंत्रणमनुभावो निद्रा विभाव इति च विशेष इति॥ अपस्मारं लक्षयति॥ भूतसंचारादिसंभूतो व्याधिविशेष इति भावः॥ सा
मान्यतया व्याधिनिर्देशेऽपि विशेषतया पुनर्निर्देशोऽर्थविशेषद्योतनाय॥ तथाहि॥ सामान्यतो व्याधिर्बीभत्सभयानकविप्रलंभकरुणेषु भव
ति॥ तत्रायं विशेषः॥ यद्बीभत्सभयानकयोरपस्मारख्यो व्याधिविशेष एव भवति नापरः॥ विप्रलंभकरुणयोस्तु कदाचिदपस्मारः कदाचिद

रासः
५६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उद्वेल्लंतो येन वाः पल्लवास्त एवाधररुचोधरोष्ठसदृशा येषां ते॥ अधरपदं वेपमानस्याधरस्यैव संलक्ष्यारुणिम्नः सादृश्यप्रतिपत्तिविका
शकतयोक्तं॥ तथा पर्यस्ताः प्रसारितायाः शाखास्ता एव भुजा येषां ते॥ एवं स्फूर्जंतः प्रकाशमाना ये कोरकास्त एव फेनबिंदवस्तेषां पटलैः
समुदायैर्व्याकीर्णा व्याप्ता देहश्रियो देहकांतयो येषां ते॥ किंच भ्राम्यन्ति भ्रमतो भृंगाणां कलापः समुदाय एव कुंतलः केशपाशस्तज्जुषस्तद्व
तः॥ अन्यच्च श्वासभूतेनानिलेनोत्कृष्टकंपभाजो भूरुहाः द्रोणाद्रिप्ररूढा वृक्षाः शैलं द्रोणाद्रिं कपेः रक्षःशक्तिप्रपातमूर्छितलक्ष्मणसंजी
वनौषधिशालिद्रोणाद्रिमानयतो हनुमतः सकाशात्॥ निपातितं किमिदमिति संदिहानेन भरतेन बाणं संधाय पातितमिति शैलस्य विधि

तत्र विभावाः॥ अपावित्र्यभूत्यस्थितिधातुवैषम्योत्कटदुःखभयादयः॥ अनुभावाः॥ कंपफेननिःश्वासभूनिपातविपर्यासजि
ह्वालोलनादयः॥ यथा॥ उद्वेल्लन्नवपल्लवाधररुचः पर्यस्तशाखाभुजाः स्फूर्जत्कोरकफेनबिंदुपटलव्याकीर्णदेहश्रियः॥ भ्रा
म्यद्भृंगकलापकुंतलजुषः श्वासानिलोत्कंपिताः शैलं प्रेक्ष्य कपेर्निपातितमपस्मारं दधुर्भूरुहाः॥ मूर्छाप्यत्रैवांतर्भवति॥ त्वच
मपि विहाय यदा मनः प्रीततिवर्तते तदा सुप्तं॥ निद्राविभावः॥ अनुभावा नेत्रमीलनप्रलापश्वासोच्छ्वासादयः॥ विशेषणं॥ प्रेक्ष्य दृ

ष्ट्वापस्मारं उच्चैः प्रपतनं दधुर्धृतवंत इत्यर्थः॥ अत्र महीरुहे समारोप्यमाणदुःखविभावितो वास्तविकभूनिपातानुभावितश्चाहार्यारोपविष
यीभूत एवापस्मारः श्रवणाविश्रामधाम॥ तस्या अप्यपस्मारविभावानुभावकथ्याधिलादित्याशयः॥ सुप्तं लक्षयति॥ अपि नास्वप्नवहनाडीसं
बंधेत्वक्परित्यागो नास्तीत्यावेदितं॥ पुरीतति॥ पुरीतत्त्वमास्यातनाड्यां॥ कापि बाला मुरारेर्मुकुंदस्य निभृतं निभृतं तज्जागरणशंकया मंदं मं
दं मंतः स्मेरं हासगर्भितं यथा स्यात्तथा कर्णावतंसं कर्णिकारं कापि ह्रिदग्धा तथैव बाहोः कनकवलयं कंकणं कापि दूर्वादाममालां मुसातीति

सर्वत्र संबध्यते॥ नोत्पतीत्यर्थः॥

अत्रकिंशब्दावृत्तिर्व्यक्तिभेदप्रतिपादनद्वाराधार्ष्ट्यस्योत्तरोत्तरमतिशयंद्योतयितुं॥तेनावतंसहरणापेक्षयाकटकहरणेधार्ष्ट्यमपेक्षितं नौका
दामहरणेतुतदप्यतिशयितमितिसूचितं॥तेनचत्रिविधायाअपिनायिकायाअनुरागोहर्षोध्वन्यते॥कीदृशस्यमुकुंदस्येत्याकांक्षायामा
ह॥तपनदुहितुरिति॥यमुनायाःकुंजेलतामंडपरूपेऽधिकरणे॥श्वासेति॥श्वासस्याधिक्येनसातिशयंकंपमानोधरप्रांतोयत्रयथाभव
तितथा॥एवमामीलितेअक्षिणीयत्रयथाभवतितथासुप्यतः॥अत्रत्वकरणस्यपृषादिसमासमात्रद्योतकतयादिवादेरपिश्वादिवदाकृ
तिगणत्वस्यसंगच्छतीत्यादिप्रयोगसाधुत्वायावश्यंवक्तव्यत्वात्साधुत्वमितिकेचित्॥तन्न॥संप्रसारणदौर्लभ्यात्॥कंड्वादेराकृतिगणत्वादिति

यथा॥श्वासोच्छ्वासप्रचलदधरोपांतमामीलिताक्षंक्रीडाकुंजेतपनदुहितुःसुप्यतःश्रीमुरारेः॥अंतःस्मेरंनिभृतनिभृतं
कापिकर्णावतंसंकांचिद्दोर्भ्यांकनकवलयंदाममुक्तातिकाचित्॥इंद्रियाणांप्रशमप्रकाशोविबोधः॥निद्राछेदोविभावाः॥
अनुभावाअंगाकृष्टिजंभाक्षिमर्दनांगुलिमोटनादयः॥ त्रुवयं॥कुंजइत्यधिकरणसप्तमीनिर्देशादेवशयानस्येत्यर्थोन्नवमनास्यदो
षाशंकावकाशोपीतिध्येयं॥अत्रशयनविभावितंश्वासाद्यनुभावितंचेतोमीलनरूपंसुप्तंचर्वणाविश्रामधाम॥विबोधंलक्षयति॥प्राथ
म्यंविभावदर्शनेनैवदर्शितंभवतीतितमाह॥बाह्येंद्रियमीलनोच्छेदइत्यर्थः॥अतएवस्वप्नेनातिव्याप्तिः॥येतुचेतोमीलनंनिद्रेत्याचक्षते॥
तन्मतेनिद्रानाशोत्तरंजायमानोबोधोविबोधइतितेषामेवलक्षणंव्याकुप्येत॥पद्मावतीनैनिद्रेत्यस्यत्वङ्मनोयोगइत्यर्थंप्रदर्शनमकारि
॥तदनवधानादेवेतिप्रतीमस्तथाहि॥तथासतिसुषुप्तेरेवत्वङ्मनोयोगनाशसाध्यत्वसंभवात्तत्रातिव्याप्तिरेवस्यात्॥नचनिद्राछेदइत्यं
तस्यत्वङ्मनोयोगइत्यर्थस्तथाचत्वङ्मनोयोगसहकृतेंद्रियजन्यत्वंपर्यवसितमितिनातिव्याप्तिरपीतिवाच्यं॥तथासतितथाभूतमनोज

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राधायादृशाकुलादेवस्य क्रीडाविदस्य कंसद्विषः श्रीकृष्णस्य सहसा बलाल्लोलाश्चंचला अपांगतरंगा नेत्रप्रांतकटाक्षा येषां भंगो रचना त
त्र चतुरं कुशलं नेत्राम्बुजं॥ अत्राम्बुजपदं सारूप्यमपि कायस्य कारणेन समं विदुरिति समालंकारन्यायेन तरंगात्रकूल्या योक्ता॥ नो स्मा
न्यातुरस्सलिलस्यर्थः॥ कथंभूतया दृशा नभः क्रीडामंडपांतरालं कुवलयस्य तत्त्वेनाध्यवसितु नेत्रस्य द्रोणीमकुलीभावस्तया दरिद्रं रहितं
कुर्वत्या तिर्यग्विकसंत्येतियावत्॥ इत्थं च शंकितयानया दृष्ट्या सांकेतिकशब्दासाधारणहेतुः शंका व्यज्यते अत्र नभोदरिद्रपदयोः स
मभिव्याहारेण राधाकृष्णयोर्द्वयोरपि नेत्राणि मुकुलीभूतानि न संतीत्यर्थमावेदयता तयोः परस्परं कटाक्षा अभूवन्नित्यर्थो ध्वन्यते॥ कु

यथा॥ राधायाः सहसा दृशाकुवलयद्रोणीदरिद्रं नभः कुर्वत्या कलकंठकंठनिनदैः सांकेतिकैर्जाग्रतः॥ अंगाकृष्टिविवर्त
मानवपुषो देवस्य कंसद्विषो लोलापांगतरंगभंगचतुरं नेत्राम्बुजं पातु नः॥ पराहंकारप्रशमोत्कटसमीहामर्षः॥ विभावा अव
मानाधिक्षेपादयः॥ अनुभावाः स्वेदशिरःकंपनयनारुण्यादयः॥

र्वत्या इति सविसर्गपाठे तु राधाविशेषणमेव तत्॥ दृशेति तु क
रोति क्रियां प्रत्येव करणे तृतीयेति बोध्यं॥ कीदृशस्य कंसद्विषः॥ सांकेतिकैः संकेतकृतैरत एव कलकंठस्य कोकिलस्य कंठनिनदै रम्य कू
जनिभिस्तत्त्वेनाध्यवसितै राधाहंकारादिभिरितियावत्॥ जाग्रतो विच्छिन्ननिद्रस्य पुनः कीदृशस्यांगाकृष्ट्या विवर्तमानं प्रसंवद्वपुः शरी
रं यस्य तादृशस्येत्यर्थः॥ अत्र निद्राच्छेदविभावितांगाकृष्ट्यनुभावितो विबोधश्चर्वणाविश्रामधाम॥ अमर्षं लक्षयति॥ परकीयाहंकारस्य प्र
शमने योत्कटा विजातीया समीहेच्छा सेत्यर्थः॥ भर्तृरामचंद्रस्याज्ञाप्रवर्तनानेवनास्त्येव॥ तदुक्तं॥ वीरमारुते हनुमन्त्र॥ मुद्रां समुद्रमुल्लंघ्य शीघ्र
माश्वासय जानकीं॥ विलम्बस्य परतस्तस्या आगच्छ मयि जीवति॥ इत्येतावन्मात्रस्य रामचंद्राज्ञाविषयत्वात्॥ श्लोकार्थस्तु शीघ्रं समुद्रमुल्लंघ्य सम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नंतरमेव मुद्रां तस्याः पुरतो विन्यस्यान्यथा रक्षो मायाभ्रांत्या विश्वसनीयता प्रसज्येत पश्चान्नानाशंकाकुलां जानकीं समाश्वासनसाः सम्य
क्समाधानं कृत्वा मयि जीवति सति शीघ्रमित्यर्थः ॥ त्वया विलंबिते विलंबासहिष्णोर्मम पुनर्दर्शनमसंभावितमेवेत्याशयः ॥ आगच्छ
एहीत्यवसेयः ॥ यथेक्षसि तथा मदिष्टं संपादयेत्युक्ते त्वं किं कुर्या इत्याकांक्षायामाह ॥ अद्येति ॥ इदानीमेव सरसिजनयनामंदोदरीगृहमे
धिनः स्त्रीप्राधान्यादभ्यर्हितत्वात्प्राङ्निर्देशः सूनुर्मेघनादादिः सेना चतुर्वाहिनी एवं द्वंद्वसमासः ॥ तथा च प्रकृतामर्षपरिपोषार्थं जडतामा
विष्कर्तुं पुत्रमित्रकलत्रादिभिः सहयुगपदेवासौ हंतव्य इत्यनेन स्त्रीवधानौचित्याप्रतिभात्मकं षष्ठानिष्टपरिच्छेदरूपस्तदनुभाव आविष्क्रि
यत इति काव्यविदां पंथाः ॥ एतेन धर्मशास्त्रविरोधं परिजिहीर्षुभिः कैश्चित्सरसिजनयनासूनुश्च सेना चेति द्वंद्व आश्रितः स प्रत्युक्तः ॥ स

यथा ॥ अद्याज्ञानैव भर्तुः सरसिजनयनासूनुसेनासमेतं बध्वा लांगूलमूले दशमुखमभितो भूतले भ्रामयामः ॥ शश्वन्मार्गा
वलोकप्रचलनयनया सीतया साकमेनां लंकामुत्पाट्य किंवा रघुपतिचरणांभोजयोर्योजयामः ॥ रसिजनयनापदानर्थक्या

पातात् ॥ ननु कस्य सूनुरित्याकांक्षानिरासाय तदिति चेत् ॥ मा वीरानुस्मृतरुरुचक्षुर्भव ॥ कस्य सरसिजनयनेत्याकांक्षायास्तावताप्य
नुवृत्तेः ॥ नन्वर्थाद्रावणस्येत्यध्यवसीयतामिति चेत् ॥ सूनावेव तथास्तु ध्यासे भवदीयाशंकापेति वा न वेति निमीलितनयनं विभावय
तु भवान् ॥ अत एव सरसिजनयनायाः सूनोः सेनेति तत्पुरुषद्वयमपि व्याख्यातं ॥ तत्पदद्वयस्याप्यानर्थक्यापत्तेः ॥ ताभिः समेतं प्रयुक्तं दश
मुखं रावणमभितः समंतात् लांगूलमूले पुच्छे बध्वा भूतले भ्रामयामो भ्रामयित्वा पातयाम ॥ श्रीरामनिकटे परावृत्य गमने विलंबमाशंक्या
ह किं वेति ॥ अथ वेत्यर्थः ॥ शश्वत् निरंतरं मार्गावलोको मार्गप्रतीक्षा तत्र प्रचलेन नयनेन यस्यास्तया ॥ इयं च स्वभावोक्तिरंतरांतरा बाधबुद्धिपरा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हतामपिश्रीरामस्यवातद्दुदंतप्रापकस्यकस्यापिवोत्सुक्यभरसमाहृतांसंभावनामलंकरोतीत्यवगंतव्यं॥सीतयासाकंसार्द्धंमेनांरसो
गणाकीर्णांलंकामुत्सार्योन्मूल्यरघुपतिचरणांभोजयोर्द्विवचनेनान्यपरायणतावेद्यतेयोजयामस्तथासतिशीघ्रंप्रत्यावृत्तेस्तत्रैववच
लंकानिर्दलनस्यसुकरत्वादित्याशयः॥अत्रप्राकृचसर्वेदेवाहोपुरुषिकयावयंनवीरकृताएवनतुकेनापिकर्मणापरिश्रांतास्मइत्युग्र
मर्थंकथंचित्स्वकृत्यानुष्ठितमपिबहुवचनंस्वसमभिव्याहारमात्रेणावगमयति॥अत्ररसःकृताधिक्षेपादिनागम्येनविभावितःपरुषो
क्त्यानुभावितोऽमर्षस्वर्वणाविश्रामधाम॥अवहित्थंलसयति॥आकारोनिर्वेदाद्यनुभावोमुखप्रसादादिः॥व्यवहारस्तथाभूतएवप्रियो

आकारव्यवहारसंगोपनमवहित्थं॥विभावाव्रीडाधार्ष्ट्यकौटिल्यगौरवादयः॥अनुभावाअन्यथाकरणान्यथाप्रेक्षणान्यथा
कथनादयः॥यथा॥लंकासद्मविभीषणःसगतवान्बद्धःसपाथोनिधिःकिंचित्क्रुध्यतिसोपिसारणिरतःसीतापरित्यज्यतां
॥इत्याकर्ण्यसुहृद्गणस्यवचनंस्मेराननोरावणोमुक्तादामकरेणकंठसविधेकीरस्यविन्यस्यति॥उग्रतानिर्दयता॥ क्त्यादिः॥तयोः

संगोपनंगुप्त्यनुकूलांतःकरणवृत्तिरित्यर्थः॥सबंधुरपिविभीषणःसद्मगृहंलंकागतवान्सोशक्यबंधनोपिपाथोनिधिःसमुद्रोबद्धःकृत
सेतुःसोपिपरमाप्तोपिसारणिःकिंचित्क्रुध्यतिपरकलत्रापहरणंनमृष्यतिअतःकारणात्सीतापरित्यज्यतामितिएवंरूपंसुहृद्गणस्यवचन
माकर्ण्यस्मेराननोवहेलितसुहृद्गणवचनोरावणःसुहृद्गणकोपपरिजिहीर्षयाहासस्यान्यसंभूतत्वमवगमयितुंमुक्तादाममौक्तिकमालां
करेणतामरसातामेणकीरस्यकंठसविधेशुकमुखाभिमुखंविन्यस्यतीदमसौदाडिमीबीजबुद्ध्यागृह्णातिकच्चिदितिपरीक्षितुंकरतलेनोपन
यतीत्यर्थः॥अत्रगम्यधार्ष्ट्यविभावितमन्यथाकरणानुभावितंगर्वाद्यनुभावभूतस्याकारस्यमुखविकासादेःसंगोपनफलकमवहित्थंचर्वणाविश्राम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रचंडक्रियाकारणीभूताकिमस्यकरोमीत्याकारिकेत्युर्थः॥स्वीयदोषकीर्तनस्वीयधनाद्यपहरणादयइत्यर्थः॥प्रचंडैर्दंडैःरणेति॥
संग्रामेखंडितायेराजानस्तेषांयाभुजास्ताभिरेवदंडैर्दैर्घ्यात्कोदंडंधनुःकृतंरचितंतत्रधनुषिज्यासिंजिनीप्रतिपक्षेतिशत्रुभूतानांरा
ज्ञांयारमण्यस्तासांवेणीलक्षणेस्तंतुभिर्गुंफिताकृता॥विशिखोबाणएकवचनेनैकस्यापिलक्ष्यंनलभ्यतेइत्यर्थआवेदितः॥क्रूरःकठोर
आकारःस्वरूपंयस्यतादृशस्यकुठारस्यतारमुच्चैर्यत्पतनमाघातानुकूलक्रियामात्रंतेनैवप्रभ्रष्टाःप्रत्यंचंतोदुष्टाःक्रोधाविष्टायेद्विपाह
स्तिनस्तेषांमत्तद्विपप्रत्यंचनेदंतयोरेवाघातादृज्यमानानियानिदंततलानितैःकृतोस्तिनतुपूर्वंकदाचित्प्रक्षिप्तोलस्यालाभात्॥

विभावाअपराधदोषकीर्तनचौर्यादयः॥अनुभावास्तर्जनताडनादयः॥यथा॥कोदंडंरणभिन्नभूपतिभुजादंडैःप्रचंडैःकृ
तंतत्रज्याप्रतिपक्षराजरमणीवेणीगुणैर्गुंफिता॥क्रूराकारकुठारतारपतनप्रभ्रष्टदुष्टद्विपत्रद्यद्दंततलैःकृतोस्तिवि
शिखस्तल्लक्ष्यमुद्वीक्ष्यते॥यथार्थज्ञानंमतिः॥अत्रविभावाःशास्त्रचिंतादयः॥अनुभावाःशिष्योपदेशभ्रूक्षेपकरचालनच
तुर्यादयः॥यथा॥लाटीनेत्रपुटीपयोधरघटीक्रीडाकुटीदोस्तटीपाटीरद्रववर्णनेनकविभिर्मूढैर्दिनंनीयते॥ तल्लक्ष्यंतद्योग्यंल

क्ष्यमुद्वीक्ष्यतेगवेष्यते॥इतिरामंप्रतिपरशुरामस्योक्तिः॥अत्रगम्यधनुर्भंगरूपापराधविभावितातर्जनानुभावितोग्रताचर्वणाविश्राम
धाम॥मतिंलक्षयति॥निर्धारणात्मकमितिशेषः॥मूढैःशास्त्रचिंतारहितैःकविभिःलाटीत्यादि॥लाटदेशाद्भूतनायिकासंबंधिनोलो
चनयुगस्यकुचकलशस्यलीलागृहस्यभुजविस्तारस्यचंदनपंकस्यचनिरूपणेनदिनंदिवसोनीयतेतिवाह्यतेतदेकमनसामव्यभिचा
रिभक्तिभाजांपुंसांसमयोगोविंदेतिजनार्दनेतिजगतीनाथेतिकृष्णेतिचव्याहारैःपरिक्रामति॥अत्रसर्वत्रेतिशब्दःप्रत्येकंप्राधान्यस्यजगती

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

49

अत्रशास्त्रविमर्शविभाविताचातुर्यानुभाविता मतिश्चर्वणाविश्रामधाम॥ नयादीनामाधिक्यमाशंक्यपरिहरति॥ मत्युदाहरणादिशेषदं
तस्यनीतिशास्त्रसिद्धार्थज्ञानरूपस्यनयस्यलोकवृत्तानुवर्तनरूपस्यविनयस्यस्वाभिलाषज्ञापनरूपस्यानुनयस्यचोदाहरणानिगला
र्थयन्नुपदेशमुदाहरति॥ वसुधनंप्रदेयंखलतोदुष्टाद्वधेयंसावधानतयास्थेयंमनोहरस्यचरणेनिधेयंस्थापनीयंकृतिभिःस्वार्थपराय
णैर्निजंविधेयंस्वाधिकारिकतयाविधिबोधितक्रियारूपंविधेयमनुष्ठेयंविधेर्दैवस्यविधेयंप्रापणीयंफलंविधिर्ब्रह्मैववेत्तितेनकर्मफलस्य

गोविंदेतिजनार्दनेतिजगतीनाथेतिकृष्णेतिचव्याहारैःसमयस्तदेकमनसांपुंसांपरिक्रामति॥ नयविनयानुनयोपदेशो
पालंभाअत्रैवांतर्भवंति॥ उपदेशोयथा॥ वसुप्रदेयंखलतोवधेयंमनोनिधेयंचरणेहरस्य॥ निजंविधेयंकृतिभिर्विधेयंविधे
र्विधेयंविधिरेववेत्ति॥ उपालंभोपिद्विविधः॥ प्रणयात्माकोपात्माच॥ प्रणयात्मायथा॥ पाषाणोयदिमार्दवंयदिपयोधाराहुता
शोदरेव्यालीनांवदनेसुधायदिरवेर्गर्भेहिमानीयदि॥ स्थेमाकिंचसमीरणेयदितदास्वप्नेपिभवेत्त्वयितांकिंनामस्मरभूमिपालभ
गवन्क्रोधान्मुधाधावसि॥

हापरित्यागपूर्वकंविहितकर्मानुष्ठानमुपदिष्टंभवति॥ उपालंभंविभजते॥ निंदेत्यर्थः॥ प्रणयेनात्मास्वरू
पंयस्येतिव्युत्पत्त्याप्रणयपूर्वकइत्यर्थः॥ एवमन्योप्यन्यपूर्वकइतिबोध्यं॥ काचित्स्वप्रेयांसमवलोक्यविरहव्याकुलासतीतत्समागमवशान्म
मेयंदुःखस्येतिवक्तुंमनोभुवमुपालभते॥ हेस्मरभूमिपालभगवन्क्रोधान्मुधाकिंनामधावसिबहून्विषयानाक्रामसिननुस्वयंदृष्टपदा
र्थंकिमित्याक्रमणेनैष्फल्यमतआह॥ पाषाणइति॥ मार्दवंप्रस्तरेयदिपयोधाराहुताशोदरेयदिसुधाव्यालीनां॥ जात्यैवस्वभावेनापिक्रौ
र्याधिक्येनसुधायाअत्यंतासंभवायस्त्रीत्वेननिर्देशः॥ वदनेयदिहिमानीमहद्धिमंरवेर्गर्भेयदिकिंचसमीरणेवायौस्थेमास्थैर्यंयदिभवेत्तदास्व

प्रेमस्यताभवेत्तेननायकस्यकठिनांतःकरणत्वंव्यंग्यं॥

र.त. कोपपूर्वकनिंदायाः पराहंकारप्रशमविषयोत्कटसमीहारूपामर्षसामग्रीत्वेनतद्व्याप्यत्वादितिभावः॥हेदेवदेवाभरणपरमेश्वरोत्तंसाने नौका
५० नमहाजनपरिगृहीतत्वमुक्तं॥स्वभावदुष्परिहार्यत्वमाशंक्याह॥शुधांशाविति॥नाम्नाविरुद्ध एवार्थः प्रतिपाद्यते॥यथा॥लोहितोयस्तु
वर्णेनमुखेपुच्छेचपांडरः॥श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यतेइत्यनेनलोहितोनीलसंज्ञयेत्याशंक्यनेत्याह॥जगदिति॥सुधेति॥
अमृताभिषेकशीतलमेवतेनाऽयोगव्यवच्छेदोबोध्यते॥जनयसिकरोषितथापिहिस्वरूपत्वेपिमेउरसितापंवहसिप्रापयसितद्दैरा
द्वेवत्वमेवंकुरुषेपरंतुयदुपतिवक्त्रसखावक्त्रसखायस्यतथासीतिहेतोरहंकिंब्रवीम्यनौचित्यान्नकिंचिद्वणामीतिचंद्रोपालंभोयदु

कोपात्मामर्षएवांतर्भवति॥यथा॥जनयसिजगद्देवदेवदेवाभरणसुधारसशीतलंसुधांशो॥उरसिवहसिमेतथापितापं
यदुपतिवक्त्रसखासिकिंब्रवीमि॥ज्वरादिविकारोव्याधिः॥कुपितधातुकामक्लेशादयोविभावाः॥अनुभावादशोपद्रवाः॥
यथा॥दातुंस्वीयमनर्घ्यदोधितिपदंतस्याःकुरंगीदृशःकेयूरंकनकांगुलीयकमिवानेतुंबहिर्गच्छति॥ पद्युपालंभेपर्यवस्यति

व्याधिंलक्षयति॥ज्वरादेःसंभूतोमानसोविकारइत्यर्थः॥अयमेवग्लानिनिदानतयाप्रागुक्तः॥ज्वरनिदानमेवात्रविभावइतिप्रतिपा
दयन्नादिपदग्राह्यंदर्शयति॥कामक्लेशादयइति॥विरहादयइत्यर्थः॥तदुक्तं॥एकैकशोद्वंद्वशोवात्रयाणांवाप्रकोपतः॥वातपित्तकफा
नांस्युर्व्याधयोयेज्वरादयः॥इहतस्मभवोभावोव्याधिरित्यभिधीयतइति॥अभिलाषःस्मृतिश्चिंतानिधनंगुणकीर्तनं॥व्याधिःप्रलापउन्मा
दोजडतोद्वेगइत्यमीइत्युक्तदशावस्थाः॥अत्रव्याधिशब्देनशारीरंसंतापकार्श्याद्युच्यते॥रसमंजर्यांतथैवतल्लक्षणप्रणयनात्॥विवे रामः
चयिष्यतेचेदमुपरिष्टात्॥तस्याःप्रस्तुतायाःकुरंगीदृशःकातराक्ष्याःकेयूरंबाहुभूषणंकर्तृस्वीयमनर्घ्यदोधिति अत्युज्ज्वलंपदंबाहुरूपं ५०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दातुं वितरीतुं कनकांगुलीयकं स्वर्णोर्मिकामानेतुमाकारयितुमिव बहिः स्वस्थानमतिक्रम्य गच्छति हेरूसे तोवस्यमाणादन्यदधिकं किं
निवेदयामि तस्या वेणीमिषात्केशपाशजूटिम्याजात्कालियो लोचनवारि बहलीभूतं कज्जलाहितकालिमं च दृष्ट्वा कालियसरोभ्रांत्या
यमुनेह्रदबुध्या॥ यद्यपि स्वसरइत्येव वक्तुमुचितं तथापि कालियसरः पदस्य तत्र प्रसिद्धिविशेषमाहत्यतथोक्तं॥ परिभ्राम्यतिपरि
तो वर्तते केशसंनहनाभावादासमंततो वेणीवल्लात इतिभावः॥ अत्र विरहविभाविताश्रुपातानुभाविता व्याधिस्मर्वणा विश्रामधाम॥ उन्मा
दं लक्षयति॥ सुखानुद्देश्यकाचरणफलको मनोविकार इत्यर्थः॥ तत्र सुखानुद्देश्यकत्वरूपाचरणविशेषणप्रयोजनं वक्तुमाशंकते॥ नन्व

अन्यत्कस्म निवेदयामि किमितो वेणीमिषात्कालियो दृष्ट्वा लोचनवारि कालियसरोभ्रांत्या परिभ्राम्यति॥ विनाविचारमाचारउ
न्मादः॥ न चागम्यागमनेतिव्याप्तिः॥ विनाविचारमितिपदेन व्यावर्तनात्॥ तत्र सुखमुद्देश्यं तदंशे विचार एव॥ क्रियानसमीची
नेत्यन्यदेतत्॥ अप्रेक्ष्यकारितोन्माद इति यस्समतं तत्रेदं दूषणं॥ तत्र विभावाः प्रियवियोगविभवभ्रंशादयः॥ अनुभावास्त्वाल
पितरथारोदनादयः॥ गम्यागमनस्यासफलत्वे सति न कुर्यान्निष्फलं कर्मेति निषेधविध्यविषयत्वेन तत्कर्तुर्विगानं न स्यादत आह॥ न

बलवदनिष्टाननुबंधिनीत्येवंरूपमेतद्धि गाननिमित्तमन्यदफलत्वात्स्थगेव तथा च सामान्यनिषेधविषयत्वेपि विशेषतः परदाराभिमर्शन
निषेधादेव तस्य विगानमितिभावः॥ बलवदनिष्टसाधनताबुद्धितिरोधानफलिकांतःकरणवृत्तिरुन्माद इति मतमुक्तदोषेण दूषयति॥ ए
षापरिदृश्यमानाकाप्युद्दटदीप्तिमती कांचनलतास्वर्णवल्लीचकास्ति प्रकाशते इत्यंनविचिंत्यनज्ञात्वेत्यनुषक्तान्वयः॥ किंतु सा परमप्रेमा
स्पदीभूता मे मम राधिकैवेत्थं ज्ञात्वेत्यत्राप्यनुषंगः॥ ननु लतात्वरूपविशेषदर्शनाभावेप्यसंलापसंभावितं जाड्यमेव तथा स्यादतस्तदप्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. यदिकुतोपिकथंचिदपिदृष्टोक्तानोजल्पतिनोत्तरयतितदेतितर्हीत्यर्थः॥संमूर्छितामोहितावर्ततेभवतीत्यमेवमादिविचिंत्यनिश्वित्यस नौका
५१ श्रीकृष्णस्यालतामधीरैरधैर्यसूचकैःप्रगुणैरितियावत्दृशोर्नीरैरश्रुभिर्मुहुर्वारंवारंसिंचतिवातमधिकश्वासंव्यातनुतेप्रकटयतिक
रेणस्वीयेनभुजयोस्तलेनाध्यवसितलताप्रांतयोराधायधत्तेतिमारव्यानमुदक्षरत्वादुपेक्ष्यं॥करेणास्याप्यभुजयोर्निक्षिप्येतितुकरेणस्वक
वचनाननुगुणं॥करेणपरस्परावष्टंभवशंवदाभेदाध्यवसायगोचरीभूतेनकरयुगलेनेतियावत्॥भुजयोरंतरालेआधायनिरुध्येतिपुनर्मा
दृशाःवस्तुतस्तुकरेणेतिवातवितननानुगुणमेवेतिऋजुःपंथाःसंभाषतेप्रलपतीत्यर्थइति दूतीवाक्यं ॥अत्रनचकास्तीतिवाक्येन
विशेषदर्शनाभावउक्तःसैवास्तिमेराधिकेत्थंविचिंत्येत्येवावलताबुराधात्वप्रकारकज्ञानमात्रमुक्तंनपुनरन्यथाभावत्वेनेतिनवमनाख्योदोषउ

यथा॥नैषाकापिचकास्तिकांचनलतासैवास्तिमेराधिकादृष्टाचेन्नकुतोपिजल्पतितदासंमूर्छितावर्तते॥इत्थंहंतविचिंत्य
सिंचतिमुहुर्नीरैरधीरैर्दृशोर्वातंव्यातनुतेकरेणभुजयोराधायसंभाषते॥प्राणनिष्क्रमणंमरणं॥ द्भावनीयः॥नन्वेतद्वाक्यद्वयस
मभिव्याहाराद्भ्रांततायामेवराधाभानंपर्यवस्यतीतिचेन्नोक्तोद्घमुदाहरणताप्रतिपत्त्यर्थमित्यमाहत्याभिहितवतस्तदिष्टमेवनतावमनाख्योदोषो
वतरति॥तस्मुनरेनांकविकुलकर्णाभिसारिणींवाणींतावद्दूततरसंघट्टितोष्ठपुटकपाटनिबिडितरदयुगलार्गलमवरुंध्व॥यदितुत्वनाराधा
विचिंत्येतिसमदर्भयिष्यत्तर्हीसावपिप्रासरिष्यदिति॥अत्रप्रियावियोगविभावितोरथारोदनाद्यनुभावितउन्मादश्चर्वणाविश्रामधाम॥मर
णंलक्ष्यति॥प्राणनिष्क्रमणसमानकालिकांतःकरणवृत्तिरित्यर्थः॥नचप्राणनिष्क्रमणकालेशरीरप्राणसंयोगस्याभावेनकथंतदांतःकरण रामः
वृत्तिसंभवइतिवाच्यं॥क्वचिदेवकारणस्यकार्यसहभावेनहेतुत्वंयत्रकार्यसहभावेनान्वयव्यतिरेकौयथागौमण्यभावस्यनतुसर्वत्रैवतथा ५१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दृश्यमेवचसिद्धाभावस्याप्यनुमितौनकार्यसहभावेनहेतुत्वमितितार्किकशिरोमणिभिरप्यभ्यधायि॥अन्यथासर्वेषामेवकारणानांकार्यसह
भावेनहेतुत्वाभ्युपगमेजितंप्राभाकरैः॥सर्वत्रविनश्यदवस्थतादृशायांकारणत्वसामान्याभावस्सतेषामभिमतस्सतवाप्यभ्युपगमात्॥नन्वा
स्तुततएवासरसान्मरणप्राक्कालीनानांमूर्छामरणपदार्थतयावर्णयंति॥तन्मंद॥कंपफेनाद्यनुभावसाम्यादपस्मारेणगतार्थतापत्तेः॥योगनैश्चे
ष्ट्याद्याविल्यर्थः॥परितोस्तोक्षिप्तौचरणौयत्रकर्मणियथाभवतितथाकिंचविकीर्णाइतस्ततःपतिताबाहवोयत्रयथाभवतितथासंग्रा
मभूमौपततोलंकेशस्यरावणस्यकेशपाशंस्प्रष्टुमनिलोवायुर्भियाभयेननसमाकांक्षति॥नवांछतिउस्रकरोभानुर्वोस्रकरंकिरणंवक्त्रा

विभावानुभावौस्पष्टौ ॥यथा॥पर्यस्ताङ्घ्रिविकीर्णबाहुपततःसंग्रामभूमौभियालंकेशस्यनकेशपाशमनिलःस्प्रष्टुंसमा
कांक्षति॥उस्रंनोस्रकरःकरंकिरतिवावक्त्रारविंदेनवास्वेस्वेधाम्निमिथःकथामपिसुराःप्रव्यक्तमातन्वते॥मनोविक्षोभ
स्त्रासः॥तथाचविचारोस्यामनोविक्षोभोभीतिराकस्मिकमनोविक्षोभस्त्रासइतिविक्षोभेणैवद्वयोरेकत्वेनपरिग्रहः॥ रविंदेमुख

पद्मे॥अत्रारविंदपदेनकरकिरणयोग्यत्वमावेदितं॥नकिरतिनप्रसारयति॥नवासुरादेवाःस्वेस्वेधाम्निप्रत्येकंनिजालयेएतेनबहुभिःसंभूयक
थादूरापास्तेतिसूचितं॥मिथःपरस्परंसमदुःखतयावश्यंभाविनीमप्येतेनोदासीनेनैकेनापिकथादुर्घटैवेतिसूचितं॥कथामपितेनान्यथा
व्यापारेत्वंतपराङ्मुखतादर्शिता॥प्रव्यक्तमितिसनेनोच्चैःकथानवसरोदर्शितः॥आतन्वतेईषदपिविस्तारयंतितेनवाक्यार्थसांकेतिकैःपदैरेवव्यव
हरंतीतिसूचितं॥अत्रसंग्रामविभावितंभूप्रपतनाद्यनुभावितंमरणंचर्वणाविश्रामधाम॥त्रासंलक्षयति॥मनोविक्षोभोद्विविधः॥उत्कटोऽनुत्कटश्च
॥तत्रोत्कटोभयमित्युक्तमेव॥अनुत्कटोपिद्विविधः॥प्राक्संभावितआकस्मिकश्चेति॥तयोरन्यतरपरिग्रहेन्यतराधिक्यंस्यादित्याशंकांपरिहरति॥भी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थायिविशेषनिरूढभयव्यवहारान्यभीतिमवहारविषयत्वप्रदर्शनेनस्थायिभेदोदर्शितः॥विक्षोभेयोवंविक्षोभशब्देनैव॥द्वयोर्विचारोस्या नौका
कस्मिकयोरेकत्वेनैकधर्मोक्रांतत्वेनपरिग्रहस्यैकव्यभिचारिभावत्वं॥तथाचोत्कटान्यत्वेसतिविक्षोभशब्दवाच्यत्वंत्रासत्वमितिफलितंबोध्यं
।येनुस्थायिव्यभिचारिणोर्भेदमाह॥तथाचेतोत्याकुलत्वेपांमतेविक्षोभेणैवस्याद्यग्रिमग्रंथोविरुद्ध्येत॥नचस्थायिनामपिव्यभिचारित्वस्याग्रेव
स्यमाणत्वादत्रतत्संग्रहोग्रंथकृताप्रदर्शितइतिवाच्यं॥तथाप्यमर्षक्रोधांतभावस्याकथनान्न्यूनतायादुर्वारत्वात्॥समुद्रोत्तारणसमयेकुत्रा
पिविषयेरामवदनाद्द्रुतंहरीतिनामशृण्वानस्तेनैवेंद्रस्यशंकांवहन्नाग्निशतक्रतुविषयत्वंसंदिहानइत्यर्थः॥शतक्रतोःसकाशाच्छंकां

तत्रविभावाःघोरस्वनश्रवणघोरसत्वदर्शनादयः॥अनुभावाःस्तंभस्वेदरोमांचाश्रुपातादयः॥यथा॥शृण्वानोहरिनामरामव
दनादिंद्रस्यशंकांवहन्कुर्वन्कातरमांतरंसभगवान्मैनाकभूमीधरः॥कुंचत्पक्षतिभुग्निलश्रुतिकृतप्रस्वंगचोलावृतित्यक्त
्वाहूतिसिंधुपंककुहरेनिमंक्तुमाकांक्षति॥विचारोवितर्कः॥

भयंवहन्नितित्वपव्याख्यानंसकाशादित्यध्याहारगौरवापत्तेः॥अन्य
थेंद्रादितिपंचम्यापत्तेः॥किंचैवंवमनारव्यदोषापत्तिरितिस्मर्तव्यं॥आंतरंमनःकातरंचकितंकुर्वन्सभगवानंतर्धानशक्तियुक्तोमैनाकनामाभूमी
धरःकुंचत्पक्षतिवलितपक्षमूलंभुग्निलश्रुतिवक्रितकर्णंतेनैवकृतप्रस्वंगचोलावृतिसंपादितसर्वांगकंचुकावरणंत्यक्त्वाहूतिधृतमौन
व्रतंयथास्यात्तथासिंधुपंककुहरेसमुद्रकर्दमसुलभविवरेनिमंक्तुमंतर्धातुमाकांक्षतीच्छतीत्यर्थः॥अत्रशत्रुनामाकर्णनविभावितोंगसंकोचा
द्यनुभावितस्त्रासश्चर्वणाविश्रामधाम॥वितर्कंलक्षयति॥अन्नोहोवितर्कइतिप्राचांलक्षणंचिंतायामतिप्रसक्तं॥तस्याअपिकथमिदंघटेतेसूहात्म
कत्वादित्यनुशयेनेत्थमभिहितवंताविवक्षितार्थनिश्चयानुकूलइदमित्थंभवितुमर्हतीत्येवमाकारकऊहोविचारपदेनोक्तइतिमंतव्यं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तं विभजते॥ विचारात्मोत्कटकोटिसाधकोपन्यासरूपविचारेणात्मा स्वरूपं यस्येति व्युत्पत्त्या विचारपूर्वक इत्यर्थः॥ इदमेतद्दृशादेवं भवि
तुमर्हतीत्येवमाकारक इति तु फलितोऽर्थः॥ संशयात्मा संशयेनात्मा यस्येति व्युत्पत्त्या साधारणधर्मदर्शनजन्यसंशयपूर्वक इत्यर्थः॥ इदमि
त्थमपि भवितुमर्हत्यन्यथापि भवितुमर्हतीत्याकारक इति तु फलितोऽर्थः॥ अनध्यवसायात्माऽध्यवसायो विपरीतनिश्चयोऽनध्यवसायस्तद्धि रो
धी विशेषदर्शनमिति यावत्तेनात्मा यस्येति व्युत्पत्त्या विशेषदर्शनपूर्वक इत्यर्थः॥ इदमिदं गुणकं तथाकथं स्यादित्याकारक इति तु फलितोऽर्थः
॥ स एवायमुत्कटकोटिकपदेनोक्तो ग्रन्थकृता॥ विप्रतिपत्त्यात्मा विरुद्धस्य कोटिद्वयव्यावृत्तधर्मस्य प्रतिपत्तिर्ज्ञानं तेनात्मा यस्येति व्युत्प

विभावा विप्रतिपत्तिसंशयसाधकबाधकमानसमुद्भावनादयः॥ अनुभावाः शिरःकंपभ्रूचालनादयः॥ वितर्कश्चतुर्वि
धः॥ विचारात्मा संशयात्मानध्यवसायात्मा विप्रतिपत्त्यात्मा चेति॥ अनध्यवसाय उत्कटकोटिकः संशयः॥ यथा॥ क्वचित्पुस्त
केऽयथेत्यतः प्राक्प्रत्येकमुदाहरणानीति पाङ्क्तः पाठो दृश्यते स त्वज्ञैरेव॥

त्त्या कोटिद्वयव्यावृत्तधर्मदर्शनजन्यसंशयपूर्वक इत्यर्थः
॥ इदमेतद्दृशात्तथापि भवितुं नार्हति तद्दृशादित्थमपि भवितुं नार्हतीत्याकारक इति तु फलितोऽर्थः॥ एतेन विप्रतिपत्तेः शब्दरूपतयाऽन्तः
करणधर्मत्वाच्चतुर्थविधानं गणयितुमनुचितमिति प्रजल्पन्न प्राकृतः॥ यद्यपि संशयात्मेत्यनेन गतार्थोऽसौ भेदस्तथापि संशयवैचित्र्यसमायात
मूहवैचित्र्यमनिवार्यमित्याशयः॥ न चैवं विप्रतिपत्तिजन्यसंशयपूर्वकोहात्मकं भेदान्तरमपि दुर्वारमिति वाच्यं॥ उक्तसंशयद्वयानुसृतकोटि
द्वयसमर्थकविप्रतिपत्तेर्वैचित्र्यानाधायकत्वात्॥ उक्तभेदचतुष्कमनुक्रमेणोदाहरति॥ शांभवं शंभोर्धनुः पिनाकं तं कार्मुकं कालिदीत्यादि॥ यमु
नायां वर्तमानस्य कठिणस्य कमठस्येव कठिणं महावीरसाध्यं शक्याकर्षणमिति यावत्॥ रामो दाशरथिर्बालस्स नवोदितस्समृणालस्य बिसस्येव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ प्रतिज्ञाभंगसूचिताऽकीर्त्यनभिरूपतां दर्शयति॥ वंशइति॥ कुलं भुवः पृथिव्या अवतंसो भूषणमेतावत्कालपर्यंतमकलंकितइति भावः॥ नौका
५३ ननु विवाहे प्रतिज्ञाभंगो न दोषायेत्यत आह॥ खलाइति॥ दुष्टमतयो व्याहारे दोषोद्भावनविषये प्रखरा निपुणास्तथा च यद्यपि शुद्धं लोकवि
रुद्धं नाचरणीयमिति न्यायादनाचारिता प्रसज्येतेवेति भावः॥ लोकस्समस्तादृशो प्यनाचारो नुपादेय एव महाजनस्येत्याह॥ क्षितिभृतामि
ति॥ राज्ञां गोष्ठी सभा गरिष्ठा महती पुरस्तिष्ठती त्यनुषंगस्तस्मात्कर्तव्यापरिस्फूर्तेरेषो नुदिनमुपास्यमानो भास्करो जगत्प्रकाशकः केवलमि
त्यवधारणे मम श्रेयस्करः कल्याणप्रसूस्तिष्ठतीति स्वयंवरप्रसंगे राममवलोकयतो जनकस्य सस्वायं प्रयुक्तिरियं॥ अत्र रामो धनुर्नमयेन्न

कालिंदी विलुठत्कठोरकमठक्रूरं धनुः शांभवं रामो बालमृणालकोमलवपुर्वंशो वतंसो भुवः॥ व्याहारप्रखराः खलाः क्षिति
भृतां गोष्ठी गरिष्ठा यतस्तस्मात्केवलमेष तिष्ठति मम श्रेयस्करो भास्करः॥ यथा वा॥ सौंदर्यस्य मनोभवेन गणना रेखा किमे
षाकृता लावण्यस्य विलोकितुं त्रिजगतीमेषा किमुद्ग्रीविका॥ आनंदद्रुममंजरी नयनयोः किं वा समुज्जृंभते राधायाः किमु वा स्वभा
वसुभगा रोमालिरुन्मीलति॥ वेति सख्युर्विप्रतिपत्या विभावितो गम्यशिरःकंपाद्यनुभावितो देवताद्यनुगुण्यरूपसाधको पन्यासात्मकवि
चारपूर्वको भास्करसाहाय्याद्रामो धनुर्नमयेदित्याकारकऊहश्चर्वणाविश्राम धाम॥ मनोभवेन कामेनैषा दृश्यमाना दीर्घा सूक्ष्मा श्यामला चग
णनारेखा जगत्येकमेवेदं सौंदर्यमिति सूचिका लिपिः कृता किमिति॥ यद्वा लावण्यस्य कर्त्तुस्त्रिजगतीं विलोकितुं दर्शनायेति यावत्॥ उद्ग्रीविको
त्कंठता प्रयुक्ताभिव्यक्तिका नाडिः किमिति भावः॥ वेत्यथ वा नयनयोरानंदद्रुमस्य वर्धमानानंदस्य मंजरी पुष्पगुच्छः किं समुज्जृंभते वर्द्धते॥ वा हो रामः
स्विद्राधायाः स्वभावसुभगा निसर्गरमणीया रोमालिः किमु नयनयोरुन्मीलति भासतइति सर्वत्रान्वेति॥ अत्र बहुकोटिसाधारणधर्मदर्शनजन्यसंश ५३
कंदली६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कल्युंभितवक्तुस्तादृशसंशयपूर्वकइयंराधारोमालिरपिभवितुमर्हतिगणनारेखादिरपिभवितुमर्हतीत्याकारकऊहश्रवणाविश्राम
धाम॥यमुनायाःपाथसि॥तथात्वेनभासमानरोमालिसांतत्येवा।स्वर्णवल्लिस्तत्वेनावगताथचखंजनंतत्वेनावभासमानंचक्षुःखेलयंत्यु
सेजयंसीयंकाऽदृष्टपूर्वैवत्वंकथयकथयेत्युपहासेवीप्रातथाशारदोतिप्रसन्नःशीतभानुस्तत्वेनावभासमानोयंवायमपिकुउदयत्सभिमु
खमास्तेवास्तविकश्चंद्रएवायमितिविपर्ययमपाकरोति॥तदुपरीति॥एषःप्रत्यक्षस्तिमिराणांतत्वेनावभासमानानांविवर्त्तःपरिणतिभेदो
वाकोऽनालोचितपूर्वस्त्वंकथयेत्यत्रपंगोत्रापिबोध्यः॥अत्रपरवैमत्यादिनागम्येनविभावितःपराणुयोगेनानुभावितःखंजनात्मकविशेषद

यथावा॥कथयकथयकेयंखंजनंखेलयंतीविहरतियमुनायाःपाथसिस्वर्णवल्लिः॥अयमुदयतिकोवाशारदःशीतभानुस्त
दुपरितिमिराणामेषकोवाविवर्त्तः॥यथावा॥इयंनविलसत्सुधाकरकलाधिकाराधिकाकरंकिरणमालिनःकिमुसहेततस्या
वपुः॥ र्शनपूर्वकःखंजनाध्यवसितलोचनयुगलेयंनायिकाभवितुमर्हतीतितिमिराध्यवसितधम्मिल्लवदियंचमुखंभवितुमर्हतीतिचो
हश्रवणाविश्रामधाम॥विलसंतीविशेषेणाक्षीणलाल्लसंतीप्रकाशमानोद्भटकांतित्वात्सुधाकरकलेवामृतभरसंभृताधरबिंबाल
कैकदेशएवामृतानुस्यूतषोडशकलामूर्तैश्चंद्रादधिकायस्यांतादृशीयंराधिकानतस्यावपुःकिरणमालिनःसूर्यस्यकरंकिरणंसहेत
किंतस्मात्तराधिकानवाकनककमंजरीयतःखंजरीटंवहतितनउभयवेलक्षण्यात्स्मरमदालसागात्रगौरवभरिताकेयमुन्मीलतिदृश्यते
तत्कथयेत्यर्थः॥अत्राधिक्यरूपसाधकस्यसूर्यकरसहनरूपबाधकस्यचोपन्यासेनविभावितःपराणुयोगानुभावितोऽसाधारणधर्मद
र्शनजन्यसंशयपूर्वकइयंसूर्यकरसहनान्नराधिकाखंजरीटंवहनाच्चनकनकमंजर्यपिभवितुमर्हतीत्येवमाकारकऊहश्रवणाविश्रामधाम॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नचोभयकोटिव्यावृत्तधर्मदर्शने सति नान्यतरकोटिनिश्चयो भवितुमर्हति॥ तथा च विवक्षितार्थनिश्चयानुकूलत्वाभावात्स्फुतोहेवित नोक्ता
कं लक्षणमव्याप्तमिति वाच्यं॥ स्मरमदालसेत्यनेन गात्रगौरवादिना कथं चित्सहत इत्यर्थाविष्करणेन तत्कोटिनिश्चयानुगुण्यस्य स्फुटं प्र
तिपत्तेः॥ ननु दशावस्थासु काश्चन शारीराः काश्चन मानस्योप्यवस्थाः संति यथा व्याध्युन्मादरूपे शारीरे स्तः॥ न च तथा व्यापार उन्माद इति ल
क्षणे मानसव्यापारविवक्षया तस्याप्यंतरत्वं संभवतीति वाच्यं॥ तथा सति प्रलापपार्थक्यानुपपत्तेः॥ तस्माच्छारीरो व्यापार उन्मादो तस्य वर
स मंजर्यां कायिको वाचिक इति द्विविध एवोन्माद उक्तो न तु तार्तीयीकोप्यन्यथा विभागन्यूनतापत्तेः॥ प्रलापस्यांतरत्वादेव चन विभागाधि
क्यं॥ अन्यथा वाचिकव्यवहारस्योन्मादमध्यगणनानौचित्यात्॥ एवं व्याधिरपि शारीर एव तथैव लक्षणकथनात्॥ तत्र व्याधेर्विकार

नवाकनकमंजरीव हति स्वं जरीदं यतस्ततः स्मरमदालसाकथयकेयमुन्मीलति॥ ननु दशावस्थास्वभिलाषगुणकथा
प्रलापा व्यभिचारिभावाभ्यंतरे न गणितास्तत्किंस्वतंत्रा एव ते संतीति चेन्न॥ औत्सुक्ये भिलाषस्य वर्णनात्मकस्मृतौ गुणक
थाया उन्मादे प्रलापस्यांतर्भावात्॥ त्वाद्वैवर्ण्यसात्त्विकभाव एवांतर्भावः॥ नानाविधव्यापारात्मकोन्मादस्य च पुलकाद्यात्मनो यथा
यथं रोमांचादिषु विकारानात्मकस्य तु तस्य न कुत्रापि॥ अन्यास्तु मानस्यः॥ तासां मध्ये चिंतास्मृतिजडता व्यभिचारिषु गणिता अभिलाषगुण
कीर्तनप्रलापास्तु नेति कुत इत्याशंकते॥ समाधत्ते॥ द्वयोरपीच्छाविशेषात्मकत्वादिति भावः॥ वर्णनात्मकस्मृताविति॥ तथा च तत्त्वकथा विका
र एव न भवतीति गुणकथायास्तद्रूपत्वेन कुत्राप्यंतर्भावस्तज्जनकीभूतस्मृत्यात्मिकाया एव तस्या गुणकथारूपफलवैचित्र्यमंगीकृत्य स्मृत्य
वस्थातः पार्थक्ये तु द्वयोरेव संस्कारजन्यत्वाविशेषाद्व्यभिचारिस्मृतिलक्षणाक्रांतत्वाद्गुणकथायाः स्मृतिव्यभिचारिभावेंतर्भावः संभवत्येवेति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्थं च वर्ण्यते गुणवत्तया प्रतिपाद्यते तेनेनेति वर्णनं तच्च स्मृतिरूपमेव पर्यवस्यतीति बोध्यं ॥ उन्माद इति ॥ तथा च तदेतल्लक्षणयोग्रंथकृदु
क्तयो राचार्यव्यवहारपदे समानार्थके एव भवत इति मंतव्यं ॥ इदमुपलक्षणं ॥ व्याधावुद्वेगो निविशते खलु लक्षणलक्षितस्योद्वेगस्य व्याधिलक्षणा
क्रांतत्वात् ॥ तथा निधनं प्राणोत्क्रमणं चेन्न कुत्रापि ॥ अविकारत्वात् ॥ मरणव्यभिचारिभावलक्षणाक्रांतं चेत् ॥ तदेव तदित्यपि बोध्यं ॥ इत्थं च
यावस्था यत्र निविशते तस्या उदाहरणं तदुदाहरणमेवेति बोध्यं ॥ संख्यानियंत्रणमसृष्यन्नाह ॥ व्यभिचारिपदप्रवृत्तिनिमित्तमनेकरसा
नुगुण्यं दर्शयति ॥ एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरतस्तांबूलाहरणच्छलेन रभसाश्लेषोपि संविघ्नितः ॥ आलापोपि न मिश्रितः प
रिजनं व्यापारयंत्या तया कांतं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृत इत्यमरुकपद्यं ॥ तदर्थस्तु चतुरया तया कयाचिन्नायिकया कांतं प्रति
अत्र प्रतिभाति ॥ छलमधिकोव्यभिचारिभाव इति ॥ तांबूलाहरणच्छलेन रभसाश्लेषोपि संविघ्नित इति शृंगारे दर्शनात् ॥ रौद्रे
चेंद्रजालादयः ॥ हास्ये च व्यपदेशान्यापदेशयोर्दर्शनात् ॥ कोपई्ष्यामान उपचारतस्तत्तत्कालोचितक्रियया कृतार्थीकृतः स्फु
टोप्यस्फुटतां नीतः कोपप्रकाशे हि कोपापनोदनविदग्धेन नायकेन चाटुकारादिभिरेकत्रस्थित्या तदानर्थक्यं स्यादिति भावः ॥ एकत्र
देशे आसनसंस्थितिरूपवेशनं सा तादूरतः प्रत्युद्गमादुत्थायाभिमुखगमनात्परिहृता त्यक्ता तांबूलाहरणच्छलेन ॥ अत्र छलपदं कार्यगु
णीभूतं न तु मुख्यं तांबूलाहरणसामानाधिकरण्यानुपपत्तेरिति न वमनाख्यदोषः शंकनीयः ॥ रभसाश्लेषः प्रेमालिंगनं ॥ अपि रभिमुखगम
नेन संभावनां गमयति संविघ्नितः स्वयमेव वृथा विलागतवत्येति भावः ॥ एवं परिजनं व्यापारयंत्योपकरणाहरणादौ निरंतरं प्रेरयंत्यालापोपि
प्रश्नोपि ॥ अपिः क्रियावैदग्ध्यमाह ॥ न मिश्रितः प्रत्युत्तरित इति बोध्यः ॥ न चेदं स्वातंत्र्यमित्याह ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. वीथीभेदेमार्गविशेषे॥कणादशास्त्रपृथग्भूतेन्यायशास्त्रइतियावत्॥गणनात्सूत्रमध्येकुलस्यपृथग्गणनात्॥तथाचप्राचीननिबंधे नौका
५५ तस्यगणनाप्यस्त्येवेतिभावः॥इदमुपलक्षणं॥यदुक्तं॥नासौधर्मोयस्कुलेनानुविद्धस्तपोनकल्कोध्ययनंनकल्कःस्वाभाविकोवेदवि
धिर्नकल्कः॥प्रसह्यवित्ताहरणंनकल्कस्तान्येवभावोपहतानिकल्कइत्यादि॥तदिदंलक्षयति॥किंचित्क्रियागोपनफलकस्यान्विधानरस्य
कारणीभूतांतःकरणवृत्तिरित्यर्थः॥अवहित्थंतुनिर्वेदाद्यनुभावगोपनफलकंकुलंचतदतिरिक्तक्रियागोपनफलकमितिभेदः॥निकुंज
कुहराल्लतामंडपप्रांतेस्थित्वाक्रियमाणाराधामाधवयोरुड्डीविकाग्रीवोल्लसंनोस्मान्पातु॥कथंभूतयोस्तयोःसंकेतीकृतकाननंदत्तसंके

वीथीभेदेगणनाच्च॥संगुप्तक्रियासंपादनंकुलं॥विभावाअवमाननप्रतिपक्षकचेष्टादयः॥अनुभावावक्रोक्तिनिभृतवीक्षणप्रकृ
तिप्रच्छादनादयः॥शृंगारेयथा॥संकेतीकृतकाननंप्रविशतोरन्योन्यकौतूहलादन्यत्वप्रतिभानमारचयतोरन्योन्यमुन्नस्यतोः
॥कुंचत्कायमितस्ततःकिसलयैरात्मानमावृण्वतोराधामाधवयोर्निकुंजकुहरादुड्डीविकापातुनः॥संग्रामेयथा॥सप्तापिकू
ल्लान्कपटांबुराशीन्पुरोपकंठेपुनरीक्षमाणः॥ लंवनंप्रविशतोरेवमन्योन्यकौतूहलात्परस्परविषयककौतुकादन्यत्वप्रतिभानमित

रेतरयोरपियाथातथ्यप्रतिपत्तिर्यथानभवति॥तथाव्यवहरतोरतएवान्योन्यमुन्नस्यतोरितरेतरज्ञानभीत्यास्थगितयोरेवंकुंचत्कायवि
वलितांगयष्टिर्यथाभवतितथेतस्ततःक्वचित्क्वचिदात्मानंकिसलयैःपल्लवैरावृण्वतोराच्छादयतोरित्यर्थः॥अत्रविश्रब्धव्यवहारपरीक्षा रामः
विभावितंनिभृतवीक्षणाद्यनुभावितंकुंजप्रवेशगोपनफलकंकुलंचर्वणाविश्रामधाम॥कूलान्प्रातिभासिकसत्ताभाजःकपटांबुराशी ५५
नैंद्रजालिकसमुद्रान्पुरोपकंठेलंकासमीपेईक्षमाणःपुनरितितथैसोनुभूतहनुमत्सराक्रमोरामचंद्रःकपींद्रस्योदधिक्रमणस्यमुखेवह

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्रांबुराश्यवभासकप्रतिपत्तरास्तसकुचेष्टाविभावितंतथाहृक्पातानुभावितंस्वीयतत्त्वावगमगोपनफलकंरामचंद्रनिष्ठकुलंचर्वणावि
श्रामधाम॥ततःसिंहोथवत्सद्योयावत्तस्याविकाशिरः॥छिन्नतितावत्सुरुषःखड्गपाणिरदृश्यतेत्यादौरौद्रेपिकुलंदृश्यतेपरंतुविस्त
रभियानोदाह्रियतइत्याह॥यत्तुकथमसौसंख्यानियमः॥मात्सर्योद्वेगदंभेर्ष्याविवेकनिर्णयक्लैब्यक्षमाकुतुकोत्कंठाविनयसंशयधा
र्ष्यादीनामपितत्रतत्रोदाहरणेषुदृष्टचरत्वादिति॥तन्न॥असूयातोमात्सर्यस्यत्रासादुद्वेगस्यावहित्थाद्दंभस्यामर्षादीर्ष्यायामतेर्वि
5 वेकनिर्णययोर्दैन्यात्क्लैब्यस्यधृतेःक्षमाशास्यमायाओत्सुक्यात्कुतुकोत्कंठयोर्लज्जायाविनयस्यवितर्कात्संशयस्यचापलाद्धार्ष्टस्य
हर्शोकयोर्दुःखसुखेसखेदमायोजयामाससरामचंद्रः॥सर्वाणिव्यभिचारिस्थूलानिविस्तरभियानोदाहृतानि॥आलस्यो
ग्र्यजुगुप्साःसंभोगेवर्ज्याः॥विप्रलंभेआलस्यग्लानिनिर्वेदश्रमशंकानिद्रौत्सुक्यापस्मारसुप्तविबोधोन्मादजाड्यासूयाव्य
भिचारिणः॥हास्येवहित्थालस्यसुप्तनिद्राप्रबोधाव्य०॥ चवस्तुतःसूक्ष्मभेदेपिनांतरीयकतयातदनतिरिक्तत्वस्यैवाध्यवसायानु
निवृत्तोगौरवाद्दुरुक्तंखलतायाअनौचित्यात्॥अन्यथामतेरीर्षादंतरायालज्जायास्तदंतर्भावस्यात्तदिदंसर्वमभिसंधायैवविनयादीनाम
तावंतर्भावोग्रंथकृतोक्तः॥एषुचव्यभिचारिभावेषुमध्येकेचनकेषांचनविभावाअप्यनुभावाअपिभवंति॥यथेर्ष्यायानिर्वेदंप्रतिविभावत्वम
सूयांप्रतिचानुभावत्वं॥यथावाचिंतायानिद्रांप्रतिविभावत्वमौत्सुक्यंप्रतित्वनुभावत्वमित्याद्यन्यत्रविस्तरः॥अथरसभेदनियतान्व्यभिचारिभा
वान्दर्शयति॥विशेषविधिनिषेधयोःशेषनिषेधाभ्यनुज्ञाफलकत्वन्यायेनविवक्षितार्थप्रतिपादनंतुलाघवमभिसंधायैवेतिभावः॥अत
एवोत्तरत्रसंमुखतयैवतेप्रदर्शिताः॥विप्रलंभव्यभिचारिभावानाह॥एवमग्रेपि॥अन्ये॥हर्षोन्मादस्मृतिमत्यादयः॥रसानुकूलाःशांतरसा

[illegible]

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रसानुकूलास्तत्तद्रसानुकूलाः॥स्वयमूह्याः॥उदाहरणानुसारेणद्रष्टव्याः॥तथाचेदंप्रायोवादमात्रमितिभावः॥तदुक्तं॥प्रायेणवस्थि
तेवित्तेभावाःसंकीर्णसंभवाः॥बाहुल्येननिगद्यंतेतथाप्येतेयथास्थिताः॥१॥शंकासूयाभयंग्लानिर्व्याधिश्चिंतास्मृतिर्मतिः॥औत्सुक्यं
विस्मयोहर्षोव्रीडोन्मादोमदस्तथा॥२॥विषादोजडतानिद्रावहित्थंचापलंधृतिः॥इतिभावाःप्रयोक्तव्याःशृंगारेषुयथायथं॥३॥श्रमश्च
पलतानिद्रास्वप्नोग्लानिस्तथापिच॥शंकासूयावहित्थंचहास्येभावाभवंत्यमी॥४ ॥दैन्यंचिंतातथाग्लानिर्निर्वेदोजडताधृतिः॥व्या
धिश्चकरुणेवाच्याभावाभावविशारदैः॥५॥ईर्ष्यासूयातथागर्वउत्साहोमदएवच॥चापल्यमुग्रताचैवरौद्रेभावाःप्रकीर्तिताः॥६॥

करुणेमोहनिर्वेददैन्यजाड्यविषादभ्रमापस्मारोन्मादव्यथालस्यस्मृतिवेपथुस्तंभस्वरभेदाश्रूणिव्य०॥रौद्रेउत्साहस्मृति
स्वेदावेगामर्षरोमांचचपलतोग्रतास्वरभेदकंपाव्य०॥वीरेउत्साहधृतिमतिगर्वावेगामर्षोग्ररोमांचाव्य०॥भयानकेस्तंभस्वे
दगद्गदतारोमांचवैवर्ण्यशंकामोहावेगदैन्यचापलत्रासापस्मारप्रलयमूर्छाव्य०॥बीभत्सेऽपस्मारमोहावेगवैवर्ण्यानिव्य०
॥अद्भुतेस्तंभस्वेदगद्गदताश्रुरोमांचविभ्रमस्मयाव्य०॥अन्येचभावारसानुकूलाःस्वयमूह्याः॥स्थायिनोपिव्यभिचरंति॥हा
सःशृंगारे॥ उत्साहश्चाप्यमर्षश्चवितर्कोथमतिर्धृतिः॥क्रोधोसूयातथामोहआवेगःशोकहर्षणे॥७॥गर्वोमदस्तथोग्रत्वंभावा
वीरेभवंत्यमी॥संतापोमरणंचैवचापलंचभयानके॥८॥अपस्मारोविषादश्चभयंरोगोमतिर्मदः॥उन्मादश्चेतिविज्ञेयाभावाबीभत्स
संस्थिताः॥९॥आवेगोजडतामोहोहर्षणंविस्मयोधृतिः॥इतिभावानिबध्नंतिरसेस्मिन्नद्भुतेबुधाइति॥१०॥कश्चित्तुसंभोगवर्ज्याइत्यनेनग्रं
थेनवर्जनीयाएवव्यभिचारिणोग्रेपिदर्शिताइतिबभ्राम॥तन्मृग्यं॥अथरसविशेषेस्थायिविशेषाणामपिव्यभिचारिभावत्वमस्तीतिविवेचयितुं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४ सूत्रे व्यभिचारिपदस्यानुभावभिन्नव्यभिचारिपरत्वेनौत्सुक्यानुभावभूतचिंतात्मकव्यभिचार्युपादानेरसानभिव्यक्त्यापत्तेः सात्त्विकपदोपादानेनुतदर्थभिन्नेव्यभि
एवमग्रेपि॥ इतिश्रीजड्युपनामकगंगारामविरचितायांनौकाख्यायांरसतरंगिणीव्याख्यायांपंचमस्तरंगः॥ सपरिकरेहेतावभिहितेप्रा
प्तावसरंरसनिरूपणंप्रतिजानीते॥ विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरितिसूत्रस्यविभावानुभावव्यभिचारिणांसंयोगान्मेल
नाद्रसस्यनिष्पत्तिरभिव्यक्तिरित्यर्थकत्वेपिविभावसात्त्विकभावयोर्द्वयोरेवमेलनेपिसर्वाभिमतारसानभिव्यक्तिर्नसिद्ध्यति॥ सात्त्विकभावा
नांद्विरूपतयात्रयाणामपिमेलनस्यतत्रसिद्धेरतः सात्त्विकेतिव्यभिचार्यनुभावयोर्गोबलीवर्दन्यायेनग्रहणार्थं॥ अतएवसूत्रेव्यभिचारि

रतिः शांतकरुणहास्येषु॥ भयशोकौकरुणशृंगारयोः॥ क्रोधोवीरे॥ जुगुप्साभयानके॥ उत्साहविस्मयौसर्वरसेषु॥ इतिव्यभि
चारिभावनिरूपणंनामपंचमस्तरंगः॥ अथरसानिरूप्यंते॥ विभावानुभावसात्त्विकभावव्यभिचारिभावैरुपनीयमानः
परिपूर्णः स्थायिभावोरस्यमानोरसः॥ शब्देननिर्वेदादयएवगृह्यंतइतिसंप्रदायइतिस्मर्तव्यं॥ परिपूर्णः॥ आलंबनैरुत्पादि
तउद्दीपनैरुद्दीपितोनुभावैः प्रतीतियोग्यः कृतोव्यभिचारिभिश्चपोषितइत्यर्थः॥ स्थायिभावः॥ रामाद्यनुकार्यनिष्ठएवोपनीयमानोनटेकृ
त्रिमवेषादिनानुकार्यरामादितुल्यतानुसंधानबलादारोप्यमाणइत्यर्थः॥ रस्यमानश्चमत्कारहेतुरिदंचरसपदप्रवृत्तिनिमित्तमुक्तं॥
रसोरसपदार्थोवसेयः॥ तदुक्तमुक्तसूत्रव्याचक्षाणैर्भट्टलोल्लटप्रभृतिभिः॥ आलंबनोद्दीपनैरुत्पाद्योत्पादकभावादुद्दीप्योद्दीपकभावाच्चानु
भावैर्गम्यगमकभावाद्व्यभिचारिभिश्चपोष्यपोषकभावात्संयोगात्संबंधाद्रसस्यनिष्पत्तिरुत्पत्तिरुद्दीप्तिरनुभूतिः पुष्टिश्चरामादौ॥ नर्तकेतुत
च्चारिपदंतात्पर्यगम्यतइतिनोक्तदोषः॥ यद्यप्युपात्तेतस्मिन्ननुभावपदस्यापिसात्त्विकभिन्नेतात्पर्यंग्राह्यमेवतथापितदसत्त्वात्तथाग्रहोजायमानोपिभ्रमएवकृतइत्यतः पू
र्वाचार्यपरिशोधिततर्कात्तथावगम्यतइत्याह=४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र·त· यद्वा कृत्रिमैरपि तथात्वेनागृहीतैर्विभावादिभिः सर्वैरेव लिंगैरुपनीयमानमभिन्नं तुरगन्यायेन रामोऽयमिति बुद्धिविषयेन नटे पक्षेऽनुमीयमानो नौका
५७ त एव परिपूर्णः स्थायिभावावस्थातोऽवस्थांतरापन्नः स्थायिभावो रत्यादी रस्यमानतया चर्व्यमाणतया रसपदार्थो बोध्यः॥ तदुक्तं श्रीशंकुकैः
॥ राम एवायमित्ययोगव्यवच्छेदविषयाया अयमेव राम इत्यन्ययोगव्यवच्छेदविषयायाश्चासम्यग्बुद्धेरनंतरावतीर्णनासौ राम इति बाधा
या रामोऽयमिति मिथ्याबुद्धेर्विरुद्धोभयकोटिकाया अयं रामो न वेति संशयबुद्धे रामसादृश्यविषयाया रामसदृशोऽयमिति सादृश्यबुद्धेश्च लो
कप्रसिद्धायाः प्रवृत्तिनिवृत्त्ययोग्यतया विलक्षणया चित्रतुरगोऽयमितिवद्रामोऽयमिति बुद्ध्यास्वादितेन नटात्मनि पक्षे बाधितमपि विभा
वादित्रयात्मकं लिंगमवगम्यते॥ कथं तदवगम इति चेत्॥ नटेन कृत्रा सेयं ममांगेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः॥ मनो
रथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गतेति॥ दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च॥ अविरलविलोलजलदः का
लः समुपागतश्चायमिति चालंबनोद्दीपनयोः॥ तथा प्रागेव गुरुशिक्षामासाद्य रोमांचाद्या विभावनविषये कृतेनातिशयिताभ्यासेन रोमांचा
द्याविर्भावव्यक्तोत्कंठादेः॥ अभ्यासपाटवेनैव च तत्तत्कालोचितकटाक्षभुजाक्षेपादेश्च प्रकाशनसंभवात्॥ तेन च रत्याद्यात्मा स्थायी तत्रा
नुमीयते॥ सेयमनुमितिरेव सचमत्कारप्रतीतिरूपा चर्वणेत्युच्यते॥ चर्वणाविषयश्च स्थायी रसपदार्थः॥ चर्वणायाश्च सामाजि
कगतत्वात्तेष्वेव रसव्यवहार इति॥ इत्थं च विभावानुभावव्यभिचारिभिः संयोगादनुमानाद्रसस्य स्थायिनो निष्पत्तिरनुमितिरिति
सूत्रार्थः॥ वस्तुतः सामाजिकेषु रससंस्पर्शाभावे शतकृत्वस्तस्य समारोपेऽनुमितौ वा चमत्कारो न स्यात्। वस्तुसौंदर्यबलादेव प्रकृतविषययो
रनयोश्चमत्कारजनकत्वमिति च लोकप्रसिद्धिमवधूय कल्पनायां न सहृदयसमाश्वासः॥ असतश्चाव्यग्रयत्नाच्च सामाजिकेषु तादृशस्या राम:
प्यभिव्यक्तिरपि दुर्लभैव॥ अन्यथा निर्वासनेषु बालादिष्वपि तदभिव्यक्तिप्रसंगादित्यपरितुष्यन्विभावादिभिः संयोगाद्भोज्यभोजकभावसंब ५७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थायीत्यादिः॥ एतल्लक्षणे विभावादिसमभिव्याहारेण स्थायिभावोपादानं साधारणीकरणरूपैकप्रयोजनस्फोरणाय विभावानुभावव्यभिचारिभावैरिति॥ शब्दात्मनः काव्यस्याभिधात्मकप्राथमिकव्यापारेण स्वस्वासाधारणरूपेण निवेदितैर्भावकत्वात्मकद्वितीयीकव्यापारेण चागम्यालप्रकारकरसविरोधिज्ञानप्रतिबंधद्वारा कांतात्वादिरसानुकूलधर्मपुरस्कारेण परिस्फुरद्भिर्विभावैः संबंधिविशेषानवच्छिन्नत्वेन च तथाभूतैः स्थाय्यनुभावादिभिश्चेत्यर्थः॥ न चैतादृशव्यापाराभ्युपगमो निरर्थकः स्वात्मनि तत्तन्नायकाद्यभेदबुद्धेरेवागम्यालप्रकारकधीप्रतिबंधसंभवादिति वाच्यं॥ दुष्यंताद्यात्मकनायके धराधौरेयत्वधीरत्वादेरात्मनि चाधुनिकत्वकापुरुषत्वादेर्वैधर्म्यस्य स्फुटं प्रतिपत्तेस्तदभेदस्यैव दुरवधारणीयत्वात्॥ इत्थं साधारणीकृतेषु दुष्यंतशकुंतलादेशकालवयोवस्थादिषु सत्सु द्वैतीयी

भावविभावानुभावव्यभिचारिभावैर्मनो विश्रामो यत्र क्रियते स वा रसः॥

कव्यापारमहिमा निर्पंगुतां गते सति समुत्तिष्ठता तार्तीयीकेन भोगकृत्त्वव्यापारेण रजस्तमसोर्निगीर्णयोः सतोरुद्रिक्तसत्त्वजनितेन निजचित्स्वभावनिर्वृतिविश्रांतिलक्षणेन साक्षात्कारेण विषयीकृतो भावनैकगम्यः साधारणीकृत एव रत्यादिः स्थायी भुज्यमानो रसपदार्थः॥ किंवा निजचित्स्वभावनिर्वृतिविश्रांतिलक्षणः स्थायिभावभोगो वा सः॥ तदिदमुक्तं मनो विश्रामो यत्र क्रियते स वा रस इति॥ उक्तं च भट्टनायकैः॥ रसो न ताटस्थ्येनेत्यादि॥ तस्यार्थः॥ न नटादिगतत्वेनारोप्यते न वा रामादिगतत्वेनोत्पाद्यते इति॥ नाप्यात्मगतत्वेन व्यज्यते किंत्वभिधाख्यो व्यापारो यथा वाक्यमात्रस्य तथा काव्यनाट्ययोरेव सता भावकत्वव्यापारेण साधारणीकृतेषु विभावादिषु तृतीयेन भोगकृत्त्वव्यापारेण भाव्यमानः स्था

१ अंस्य त्रिगुणबुद्धिसाध्यनिजचित्स्वभावविश्रांतिलक्षणसाक्षात्कारविषयः स्थायी स्थायिविषयको क्तसाक्षात्कारो वा तात्पर्यविषयो भवतीति भावः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. ५८

धीसत्त्वोद्रेकजनितेनस्वप्रकाशानंदमयसंविद्विश्रांतिलक्षणेनपारमार्थिकेनभोगेनविषयीक्रियतइति॥स्थाय्यादीनांसाधारणीकरणफल
कंद्वितीयीकव्यापारमंतरेणाह॥प्रबुद्धोद्बुद्धासमभिव्यक्तेतियावत्॥स्थायिभाववासनासूक्ष्मावस्थापदव्यवहार्यानुद्बुद्धसंस्काररूपातद
वस्थःस्थायीभावइतितुपरमार्थः॥कथंप्रबोधइतितदाह॥प्रथमानुरागेवासनोत्पादकालंबनानुभवापूर्वकास्वादगोचरीभूतेरसे॥यद्य
पीदानींतनसूक्ष्मकालभेदार्जितवासनाभेदेनापिरसास्वादःसूपपदस्तथापिपद्वतरभावनाभिप्रायेणेदं॥वस्तुतस्तुस्वाभाविकवासना
शून्यकालिकानुभवमूलकस्मृतिप्रभवस्यस्थायिभावस्यवासनायाअभिव्यक्तिस्थलेपिजन्मांतरीणस्यपद्वतरवासनाकालीनस्यानुभव
स्यवासनाभिप्रायकोयंग्रंथः॥एतादृशानुभवस्यैवविषयविधयाकारणत्वादालंबनविभावइतिगीयते॥तथाचविभावानुभावव्यभिचा

प्रबुद्धस्थायिभाववासनावारसः॥प्रबोधकाविभावानुभावव्यभिचारिभावाः॥नचयूनोःप्रथमानुरागेव्याप्तिःपूर्वानुभवा
भावादितिवाच्यं॥तत्रापिजन्मांतरीयानुभवसत्त्वादिति॥ रिभिःसंयोगाद्व्यंग्यव्यंजकभावसंबंधाद्रसस्यभग्नावरणचिद्विशि

ष्टस्थायिनोनिष्पत्तिःस्वरूपेणावभासइतिसूत्रार्थः॥तदुक्तंश्रीमदाचार्यैरभिनवगुप्तपादैः॥लोकेकारणत्वादिनाव्यवहार्यैःप्रमदादि
भिःस्थायिनोरत्यादेरनुमानेऽभ्यासेनयत्साटवंजातमितिप्रवृत्तिरूपंतद्वतांसामाजिकानांवासनारूपेणांतःस्थितोरत्यादिःस्थायीकाव्येन
ग्गालंकारादिद्वारानाट्येचचतुर्विधाभिनयद्वारायथोक्तविभावनात्मकव्यापारवत्त्वादलौकिकविभावादिशब्दव्यपदेशयोग्यदशाविशि
ष्टैस्तैरेवव्यज्यते॥अतएवापटूनांबालानांनरसाभिव्यक्तिः॥किंबहुनापरापिस्वाभाविकीवासनातदभिव्यक्तौहेतुः॥यांविनाशृंगारिणाम
पिमीमांसकवैयाकरणादीनांनसा॥यदाहुः॥वासनाचेन्नहेतुःस्यात्तस्यान्मीमांसकादिष्विति॥ननुतथाप्यन्यनिष्ठैर्विभावादिभिःकथ

नौका रामः ५८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ममैवैतेशत्रोरेवैतेतटस्थस्यैवैतेइतिसंबंधिविशेषस्वीकारनियमस्यनममैवैतेनशत्रोरेवैतेनतटस्थस्यैवैतेइतिसंबंधिविशेषपरिहा
रनियमस्यचानध्यवसायात्तेषांसाधारण्येनप्रतीतेः॥तथाचामुकस्यैवेत्यवधारणंविनाप्रतीतानांतेषांस्वीयत्वासंसर्गाग्रहःसर्वसंमत
स्यदोषस्यमाहात्म्यात्संभवत्येवेतिस्वीयस्थायिभाववासनाभिव्यक्तिर्युक्तैवेतिभावः॥नन्वेवंविभावादीनांसाधारण्यावश्यकत्वेपिस्थायि
नांसाधारण्यंकथंस्यात्तदात्मासाधारणत्वात्तेषां॥नचमास्तुतेषांसाधारण्यंरसाभिव्यक्तेरसाधारण्येप्युपपत्तेरितिवाच्यं॥तथासति
सहृदयसंवादोनस्यात्॥मास्तुसंवादइतिचेत्॥एवंविधालौकिककल्पनायामनाश्वासापत्तेः॥उच्यते॥उपायानांविभावादीनामुक्तसाधा
रण्यबलाद्रसानुभवकालेस्थायिनाप्रमातृविशेषनिष्ठत्वलक्षणायाः परिमितप्रमातृतायाद्विगलनमज्ञानंतद्वशादुन्मिषितोवेद्यांत
रसंपर्कशून्योऽपरिमितोभावोयस्यतेनप्रमात्रासकलसहृदयसंवादकारिणाप्रमातृविशेषसंबंधाग्रहरूपेणसाधारण्येनस्थायीच
र्व्यते॥ननुचर्वणाविशिष्टस्थायिभावमात्रेणरसः॥रसंह्येवायंलब्ध्वानंदीभवतीत्येवमाद्ययाश्रुत्यासहृदयप्रमाणेनचानंदस्वरूपताया
स्त्वादरादितिचेत्॥स्वप्रकाशनयेवृत्तिज्ञानलक्षणस्वाकारवद्दृश्यमानचर्वणास्वरूपाभिन्नस्यात्मानंदस्यापिविषयीकरणात्॥सचच
र्व्यमाणतैकप्राणश्चर्वणानाशेनश्यन्नतएवविभावादिजीवितावधिरनित्यचर्वणःस्वस्वासाधारणरूपेणविभावानवभासासानेकरस
न्यायेनचर्व्यमाणःपुरइवपरिस्फुरन्हृदयमिवप्रविशन्सर्वांगीणमिवालिंगनन्यत्सर्वमिवतिरोदधद्ब्रह्मास्वादमिवानुभावयन्नतए
वालौकिकचमत्कारकारीश्रृंगारादिकोरसः॥सचनविभावादिकार्यः॥उत्पन्नस्यतस्यतत्कालेत्वसंभवत्सामग्रीकस्यतन्नाशकस्य
समवधानपर्यंतविभावादिचर्वणानाशेपिसत्वप्रसंगात्॥द्वित्वापेक्षाबुद्धेरिवकार्यनिमित्तकारणयोर्नाश्यनाशकभावकल्पनाया
गौरवपराहतत्वात्॥अन्यथैवोपपत्तेः॥पूर्वंस्वरूपेणासतोज्ञाप्यत्वस्याप्ययोगान्नासौज्ञाप्योपि॥विभावादिभिरेवसमुत्पाद्यज्ञाप्यत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. इत्यपिनविचाररमणीयं॥कार्यवैचित्र्येसामग्रीवैचित्र्यस्यनियामकत्वात्॥काव्यार्थस्यविभावस्यस्थायिस्वरूपाजनकत्वाच्च॥किंचस्व नौका
५९ प्रकाशनयेचाक्षुषज्ञानस्यचक्षुर्ज्ञाप्यत्वव्यावर्तनाययत्स्वाभिन्नतज्जन्यज्ञानविषयत्वरूपंतज्ज्ञाप्यत्वमुख्यमिष्टंतत्प्रकृतेनसंभवत्येव
स्वाभिन्नतज्जन्यज्ञानविषयत्वरूपंतज्ज्ञाप्यत्वंतुननिषेधामः॥अपितुविभावादिचर्वणात्मकविभावादिजन्यज्ञानाकारकात्मचैतन्यग्रा
ह्यएवासौमन्यते॥तदुक्तं॥विभावादिभिर्व्यंजितश्चर्वणीयइति॥कारकज्ञापकाभ्यामन्योहेतुर्नसिद्धइतिचेत्॥अलौकिकसिद्धेर्भूषणमेत
न्नतुदूषणं॥येतुरसेविभावादिकार्यत्वव्यवहारास्तेपिव्यंजकविभावानुभावव्यभिचारिणांचर्वणायाउत्पत्त्योत्पत्त्युपचारात्॥गुणालंका
राद्यसंभिन्नरसादिविषयलौकिकप्रमितेर्जगद्भेदविषययुंजानप्रमितेर्बाह्यार्थसंस्पर्शरहितात्ममात्रविषययुक्तप्रमितेश्चगुणालंकारसं
भिन्नरसादिमात्रविषयतयाविलक्षणायासंवित्तेर्हृद्यतयाज्ञाप्यत्वव्यवहारः॥अपितत्रसांप्रदायिकानां॥प्रागसत्त्वादिवग्राहकस्याप्यभा
वान्नमुख्यज्ञाप्यपदप्रवृत्तिनिमित्तवानेषः॥तथाहि॥यतस्तद्ग्राहकंननिर्विकल्पकंविभावादिपरामर्शस्यनिर्विकल्पकजननायोग्यत्वात्॥
नापिस्वभिन्नसविकल्पकं॥चर्व्यमाणस्यालौकिकानंदमयस्यतस्यस्वसंवेदनमात्रसिद्धत्वात्॥चर्वणादशायांज्ञानांतराभावात्॥स्वाभिन्न
सविकल्पकविषयत्वेनज्ञाप्यत्वंत्विष्टमेव॥ननुज्ञानंतावद्द्विविधं॥आत्मचैतन्यरूपंनिर्विकल्पकमेकं॥स्वभिन्नसविकल्पकंचद्वितीयं॥
तयोर्मध्येज्ञाप्येह्येकाविषयत्वेनापरविषयत्वमागच्छत्तद्वयान्यतरविषयत्वाभावेनचोभयविषयत्वमापद्यतेतच्चविरुद्धमितिचे
न्न॥तदिदंस्वाभिन्नसविकल्पकविषयत्वरूपंलोकोत्तरचमत्कारमेवरसचर्वणायामवगमयतीति॥प्रागुक्तश्रुतिस्वारस्यात्तुस्थाय्य
वच्छिन्नाभग्नावरणाचिदेवरसइतितुयुक्तमुत्पश्यामः॥सूत्रेरसस्येत्यस्यस्थाय्यवच्छिन्नचिदानंदस्येत्यर्थोन्यासैवसरणिः॥अत्रावरणाभ राम:
गोवा॥सहृदयस्यनिजसहृदयतावशोन्मिषितेनविभावादिचर्वणामहिम्नाततस्तस्याप्युपहितस्वरूपानंदाकारासमाधिनायोगिनइवांतः ५९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

करणत्वन्निर्वाच्चर्वणापदार्थः॥ इयं च विभावादिविषयसंवलितचिदानंदालंबनत्वादेव परब्रह्ममात्रास्वादात्समाधेर्विलक्षणा भाव्याचक्रा
व्यव्यापारमात्रादिति॥ नव्यास्तु विभावानुभावव्यभिचारिणां संयोगाद्भावनात्मन एव दोषाद्रसस्यानिर्वचनीयदुष्यंतादिरत्याद्यात्मनो
निष्पत्तिरिति सूत्रार्थं मत्वा काव्येनाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु व्यंजनाव्यापारेण दुष्यंतादौ शकुंतलादिरतौ गृहीता
यां समनंतरमेव तदीयसहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यंतत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने
शुक्तिकाशकलइव रजतखंडः समुत्पद्यमानोनिर्वचनीयः साक्षिभास्यः शकुंतलादिविषयकरत्यादिरेव रसः॥ ननु भद्रात्मनो दुरधिरो
हतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य॥ यस्यानुपप्लुतगतेः परवारणस्य दानांबुसेकसुभगः सततं करोभूदित्यादौ नानार्थ
स्थले शक्त्यैव प्राकरणिकार्थबोधोपपत्तौ नातिरिक्तव्यंजनाव्यापाराभ्युपगमः समुचितः॥ शक्तिनियमनपूर्वकव्यंजनोल्लासमभ्युप
गच्छद्भिरपि नानार्थस्थलेर्थद्वयप्रतीत्यंगीकारेण प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति न्यायान्नियमनोल्लासयोरेवाप्रामाणिकत्वा
त्॥ अत एव गूढश्लेषे चरमं जायमानस्य बोधस्य प्रथमं वारणाय तात्पर्यज्ञानं हेतुत्वेवाच्यं श्लोके तात्पर्यविषयार्थबोधेव्यभिचार इति
तस्यैवेयं जनिकत्वमभिप्रेत्य शक्तिजन्यत्वस्य कार्यतावच्छेदकघटनाध्रौव्यमेव श्यव्यंजनास्वीकार्येत्यपास्तं॥ अगृहीतगृहीतविस्मृतार्थांतर
शक्तिकस्य पुंसो व्यंजनोल्लासस्याप्यनभ्युपगमात्॥ तद्धेतोरेवेति न्यायाद्व्यंतरकल्पनानवकाशात्॥ गूढश्लेषे तु शक्तिग्रहस्यैव विलं
बितत्वादिति चेन्न॥ अबलानां श्रियं हृत्वा वारिवाहैः सहानिशं॥ तिष्ठंति चपला यत्र स कालः समुपस्थित इत्यादौ शक्त्यानाद्वयमपहृ
त्य जलवाहकैः पुरुषैः सह पुंश्चल्यो रमंत इत्यर्थांतरं न तावदबलावारिवाह चपलाशब्दे योगरूढ्या शक्या सेबोधयितुं मेघत्वविद्युत्त्वा
द्यघटितस्यैव तस्यार्थस्य प्रतीतेरन्यथा चमत्कारो न स्यात्॥ अत एव न योगशक्त्यापि केवलया रूढ्यर्थासंवलितार्थबोधकत्वस्य तस्यारू

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. पुंश्चलीत्वादेः सर्वथैवतदविषयत्वाच्च॥ तस्मात्॥ योगरूढस्यशब्दस्ययोगेरूढ्यानियंत्रिते॥ धियंयोगस्पृशोर्थस्ययासूतेव्यंजनैवसा॥ नौका
६० एवंस्थितेनिरुक्तनानार्थस्थलेष्वुपमायाःप्राकरणिकाप्राकरणिकार्थगतायाःप्रतिपत्तयेवश्यंवाच्यमर्थव्यंजनयेवाप्राकरणिकस्याप्य
र्थस्यशब्दव्यंजनयाप्रतिपत्तावलंक्लिष्टकल्पनयेत्याशयेनप्राचीनोक्तंनानार्थव्यंजकत्वंनदुष्यतीत्येवमाद्यन्यत्रविस्तरः॥ अयंचकार्यादोष
विशेषस्यनाश्यश्चतन्नाशस्य॥ लोकोत्तरभाविनालोकोत्तराल्हादेनभेदाग्रहात्सुखपदव्यपदेश्योभवति॥ स्वपूर्वोपस्थितरत्यादिनाचभेदाग्र
हाद्रतित्वेनैकत्वाध्यवसानाद्वाव्यंग्यश्चवर्णीयश्चोच्यते॥ अवच्छादकंदुष्यंतत्वमप्यनिर्वचनीयमेव॥ अवच्छादकत्वंचरत्यादिविशिष्टबोधेवि
शेष्यतावच्छेदकत्वं॥ एतेनदुष्यंतादिनिष्ठस्यरत्यादेरनास्वाद्यत्वान्नरसत्वं॥ स्वनिष्ठस्यतस्यशकुंतलादिभिरतत्संबंधिभिःकथमभिव्यक्तिः
स्वस्मिन्दुष्यंताद्यभेदबुद्धिस्तुबाधबुद्धिपराहतेत्यादिकमपास्तं॥ यदपिविभावादीनांसाधारण्यंप्राचीनोक्तं॥ तदपिकाव्येनतेषुशकुंतलादि
शब्दैःशकुंतलात्वादिप्रकारकबोधजनकैःप्रतिपाद्यमानेषुसत्सुदोषविशेषकल्पनंविनादुरुपपादमतोवश्यकल्प्येदोषविशेषेतेनैवस्वा
त्मनिदुष्यंताद्यभेदबुद्धिरपिसूपपदेतिकिंतेन नन्वेवंरतेरस्तुनामदुष्यंतइवसहृदयेपिसुखजनकताकरुणरसादिषुतुस्थायिनःशोका
देर्दुःखजनकतयाप्रसिद्धस्यकथमिवसहृदयहृदयाल्हादहेतुत्वं॥ प्रत्युतनायकइवसहृदयेपिदुःखजननस्यैवोचितत्वात्॥ नचसत्यस्यशोका
देर्दुःखजनकत्वंक्लृप्तंनकल्पितस्येतिनायकानामेवदुःखंनसहृदयस्येतिवाच्यं॥ रज्जुसर्पादेर्भयकंपाद्युत्पादकतापत्तेः॥ किंचसहृदयेरतेर
पिकल्पितत्वेनसुखजनकतानुपपत्तेरितिचेत्सत्यं॥ शृंगारप्रधानकाव्येभ्यइवकरुणप्रधानकाव्येभ्योपियदिकेवलाल्हादएवसहृदय
प्रमाणकस्तदाकार्यानुरोधेनकारणस्यकल्पनीयत्वाल्लोकोत्तरकाव्यव्यापारस्यैवाल्हादप्रयोजकत्वमिवदुःखप्रतिबंधकत्वमपिकल्पनी रसः
यं॥ यद्याल्हादइवदुःखमपिप्रमाणसिद्धंतदाप्रतिबंधकत्वंनकल्पनीयंस्वस्वकारणवशाच्चोभयमपिभविष्यति॥ अथतत्रकवीनांकर्तृत्वेस ६०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनिष्टसाधनत्वेननिवृत्तेरुचितत्वादितिचेत्॥इष्टस्याधिक्यादनिष्टस्यचन्यूनत्वाच्चंदनद्रवलेपनादाविवप्रवृत्तेरुपपत्तेः॥केवलाल्हा
दवादिनांतुप्रवृत्तिरप्रत्यूहैव॥अश्रुपातादयोपितत्तदानंदानुभवस्वाभाव्यान्नतुदुःखात्॥अतएवभगवद्भक्तानांभगवद्वर्णनाकर्णनाद
श्रुपातादयःसमुत्पद्यंते॥नचतत्रजात्वपिदुःखानुभवोस्ति॥नचकरुणरसादौस्वात्मनिशोकादिमद्दशरथादितादात्म्यारोपेयद्याल्हाद
स्तदास्वप्नेस्वनिपातादौचस्वात्मनितदारोपेपिस्यात्तदानुभाविकंचतत्रकेवलंदुःखमितिकाव्येपिकेवलंदुःखमेवयुक्तमितिवाच्यं॥अयंहि
लोकोत्तरस्यकाव्यव्यापारस्यमहिमायस्ययोज्याअरमणीयाअपिशोकादयःपदार्थाआल्हादमलौकिकंजनयंति॥विलक्षणोहिकमनीयका
व्यव्यापारजआस्वादःप्रमाणांतरजादनुभवात्॥तज्जत्वंचतज्जन्यभावनाजन्यकल्पितरत्यादिविषयत्वं॥तेनरसास्वादस्यकाव्यव्यापारा
जन्यत्वेपिनक्षतिः॥शकुंतलादावगम्यात्वज्ञानोत्पादस्तुस्वात्मनिदुष्यंतादयभेदबुद्ध्याप्रतिबध्यतइत्याहुः॥अनिर्वचनीयख्यातिमनभ्युप
६० गच्छतांव्यंजनाव्यापारमप्यविदुषांविदुषांतार्किकाणांमतेप्रागुक्तदोषमहिम्नास्वात्मनिदुष्यंतादितादात्म्यावगाहीशकुंतलादिविषयकर
त्यादिमद्भेदवाचिमानसःकाव्यार्थभावनाजन्माविलक्षणविषयताशालीरसपदार्थोभवति॥तत्रचविभावानुभावव्यभिचारिणांसंयोगा
ज्ज्ञानरूपाद्दोषाद्रसस्यज्ञानविशेषात्मनोनिष्पत्तिरुत्पत्तिरितिसूत्रार्थः॥सचबोधःस्वात्मनिदुष्यंतत्वधर्मितावच्छेदक— शकुंतलादिविष
यकरतिवैशिष्ट्यावगाहीशकुंतलादिविषयकरतिमान्दुष्यंतइत्याकारकएकः॥स्वात्मत्वविशिष्टेशकुंतलाविषयकरतिविशिष्टदुष्यंतता
दात्म्यावगाहीशकुंतलाविषयकरतिमद्दुष्यंतोहमित्याकारकोद्वितीयः॥स्वात्मत्वविशिष्टेदुष्यंतत्वशकुंतलाविषयकरत्योर्वैशिष्ट्यावगाह्य
हंदुष्यंतःशकुंतलाविषयकरतिमांश्चेत्याकारकस्तृतीयोपि॥तत्रचसर्वत्रैवरतेर्विशेषणतयाविशेषणज्ञानस्यविशिष्टज्ञानेहेतुत्वात्का
व्यार्थभावनाकालेशब्दादप्रतीयमानायाअपितस्याश्चेष्टादिलिंगकमनुमानंमध्येभ्युपगंतव्यमितिमंतव्यं॥स्वाप्नादिबोधेतिप्रसंगवारणाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ काव्यार्थभावनाजन्येतिबोधविशेषणं॥नन्वेवंरसंस्वदतइतिप्रयोगानुपपत्तिरास्वादपदार्थस्यबोधस्यरसाभिन्नत्वादितिचेन्न॥आस्तां नौका
६१ तन्नरतिमात्रपरोरसशब्दः॥सचरसोनलौकिकबोधात्माकिंत्वनंतःकरणाविषयोप्यलौकिकसन्निकर्षसंपन्नइतिनप्रतिसत्तामपेक्षते
॥विभावादीनांत्रयाणांमेलनात्मकसंयोगाद्रसनिष्पत्तिर्नामरसपदव्यवहारइतिसूत्रार्थमत्वातत्त्रयाणांसमुदितानांकेपिरसत्वमाम
नंति॥विभावादिषुमध्येसम्यग्योगाच्चमत्कारात्सइतिसूत्रार्थमत्वात्त्रिषुकोपिचमत्कारीचेत्सरसोनान्यथेतिबहवः॥भाव्यमानोविभाव
एवरसस्तथाविधोनुभावएवरसोव्यभिचार्येववातादृशोरसइतितुसूत्रेत्रयाणांसमुच्चियरसनिष्पादकत्वमभिहितवतोभरताचार्यस्या
नभिप्रेतत्वादनादेयं॥व्याघ्रादयोविभावाभयानकस्येववीराद्भुतरौद्राणां॥अश्रुपातादयोनुभावाःशृंगारस्येवकरुणभयानकयोः॥चिंताद

सचरसोद्विविधोलौकिकोलौकिकश्चेति ॥

योव्यभिचारिणःशृंगारस्येववीरकरुणभयानकानामितितेषांप्रत्येकंनियतरसव्यंजनानुपपत्तेश्च॥एवंस्थितेह्यसाधारणविभावाद्येकमा
त्रोपादानेपिपरयोराक्षेपोध्रुवइतिस्मर्तव्यं॥तदाल्हादाविनाभूतोबव्हीभिर्बहुभिर्बहुः॥प्रोक्तोरसोखिलोहृद्यःप्रपंचेस्तोत्यनर्गलं॥यद्यपि
नाट्येरसस्थितिंनिगदताभगवताभरताचार्येण॥काव्येप्येनामिदर्शयताश्रीरुद्रेणचनाट्यकाव्ययोरसंभवंल्लौकिकोभेदःसमुपेक्षितस्तथा
पिमुख्याभिधेयरसस्वरूपनिरूपणंप्रतिज्ञातवतःस्वस्यतुतादृशभेदोऽनुपेक्षणीयएवेत्याशयेनरसंविभजते॥प्रबुद्धस्थायिभाववासना
स्येत्यर्थः॥एतेनकारणान्यथकार्याणिसहकारीणियानिच॥रत्यादेःस्थायिनोलोकेतानिचेन्नाट्यकाव्ययोः॥विभावाअनुभावास्तत्कथ्यंतेव्यभि रामः
चारिणइतिसर्वानुमतनिबंधसूत्रेविभावानुभावव्यभिचारिपदंचालोकयतांलौकिकेरसेविभावादिशब्दाभिधेयैरनिष्पत्तिंनिजानतामतएव ६१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रसपदार्थत्वविपर्ययं मन्यमानानामाधुनिकानां लौकिके भेदे ग्रंथकृन्मात्रोत्प्रेक्षामूलकताप्रयुक्तानादरणीयताग्रंथिः शिथिलिताभव ति॥ एतदपि कल्पनामात्रमिति तु माशंकिष्ठाः॥ किंतु प्रायो नाट्यं प्रति प्रोक्ता भरताद्यै रसस्थितिः॥ यथामति मयाप्येषा काव्यं प्रति निग द्यते इति रुद्रग्रंथप्रयोगेषिष्ठाः॥ अत्र वासनात्मना स्थितस्यापि स्थायिनः सर्वस्यैव कालांतरीणस्य स्वाव्यवहितप्राक्कालीनलौकिकसन्नि कर्षजन्यत्वाद्रसपदार्थप्रविष्टस्थायिस्वरूपे तथात्वेन भेदकं किंतु रसोऽसति निदानभूतव्यंजकविभावानुभावव्यभिचारिष्वन्यतमचर्वणात्मतो लौकिकसंनिकर्षजन्यत्वं तथा॥ यत्र विभावाद्येकतरत्र लौकिकसंनिकर्षस्तद्व्यतिरिक्तोभयत्र त्वलौकिकस्तत्रापि लौकिकभेदतासिद्ध्य र्थमन्यतमत्वेन त्रयाणां निवेशः॥ यद्यपि व्यभिचारिणामांतरतया न कदापि लौकिकसंनिकर्ष इति तदुपादानमनर्थकमिति प्रतिभाति॥

लौकिकसन्निकर्षजन्मा लौकिकोऽलौकिकसंनिकर्षजन्मा त्वलौकिकः॥ लौकिकः संनिकर्षः षोढा विषयगतः॥ अलौकिकः सं निकर्षो ज्ञानं॥ तेषु चानुभूतेषु साक्षादेतज्जन्यानुभूतेषु प्राक्तनसंस्कारद्वारा ज्ञानमेव प्रत्यासत्तिः॥ तथापि स्वाभिव्यंजकविभावानु

भावलौकिकसंनिकर्षस्यैव स्वाभिव्यंजकव्यभिचार्याद्यभिव्यंजकविभावानुभावलौकिकसंनिकर्षस्यापि लौकिकभेदतानियामकत्वमेव यु क्तं न तु तत्रालौकिकभेदत्वमित्याविष्कर्तुं तदुपादानमिति मंतव्यं॥ इत्थं च विभावमात्रस्य संयोगसंनिकर्षमात्रग्राह्यत्वेपि गुणक्रियातद्ग तवैजात्यादिघटितमूर्तिकानामनुभावानामिंद्रियषट्केनापि यथायथं ग्रहसंभवात्तार्किकसंप्रदर्शितसन्निकर्षभेदषट्केनाभ्यस्य रसस्यैव र सस्यापि भेदषट्कं समायातीत्यभिप्रायेणाह॥ सामान्यलक्षणायोगजयोस्तत्र प्रसिद्धयोरपि प्रकृतानुपयोगादाह॥ ज्ञानमिति॥ ज्ञानमेवेत्य र्थः॥ स्वाश्रिके भेदे ज्ञानात्मनः सन्निकर्षस्यासंभवमाशंक्याह॥ तेष्विति॥ विभावादिष्वित्यर्थः॥ इयं च सति सप्तमी॥ साक्षात्॥ विभावानुभावव्यभि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. ६२

इदं च ज्ञानमेव प्रत्यासत्तिरित्यग्रे तनेनान्वितं॥ एतज्जन्मानुभूतेष्वपीति॥ स्वाप्निकादिपदार्थेष्वपीत्यर्थः॥ संस्कारद्वारा तादृशचर्वणाया अव नौका
हितप्राक्कालिकः जन्मांतरीयानुभवजन्यसंस्कारप्रत्यासत्याप्रत्यासन्नमित्यर्थः॥ ज्ञानमेवेति॥ जन्मांतरीयानुभवो भवत्येव प्रत्यासत्तिरिति भा
वः॥ अलौकिकं विभजते॥ उपनयस्य सर्वत्राविशेषेपि सामग्रीवैचित्र्यसंपादकत्वप्रमनोरथयोर्विभाजकतास्फुटमभिहितेवेति न तीयस्य वि
षयं दर्शयति॥ काव्यनाट्ययोस्तु न परस्परं सामग्रीवैचित्र्यसंपादकत्वमेकप्रमाणत्वादिति भावः॥ यद्यपि काव्य इत्येव सुवचं तथापि प्रसं
गादुक्तिभंग्या काव्यलक्षणमप्युक्तं भवतीतीत्थमभिहितं॥ तथाहि॥ काव्यभूतौ यौ पदपदार्थौ तयोश्चमत्कार इत्युक्त्या चमत्कारिणौ पदपदा
र्थौ काव्यमित्यभिहितं कद्भिहित इत्युक्तत्वात्तु तात्पर्यविरुद्ध एवार्थः शब्दादवगम्यत इति बोध्यं॥ इत्थमपि विशेष्यविशेषणभावव्यत्यासः

अलौकिकोरसस्त्रिधा॥ स्वाप्निको मानोरथिक औपनायकश्चेति॥ औपनायकश्च काव्यपदपदार्थचमत्कारे॥

किमर्थमिति चेत्॥ चमत्कारे लोकोत्तरत्वरूपमुख्यत्वप्रतिपत्यानुगुण्याय॥ एतस्मायेव हेतवे कर्णवलस्यालौकिकत्वप्रतिपिपादयि
षयात्र भवद्भिर्बादरायणचरणैः पदपरिमिताभूः स्वनीकृतेति विवक्षितेसशैलवनकाननोत्कृष्टेति कर्णवर्णनपरपद्येप्यभिहितं॥ अन्य
थात्रापि पीठारूढस्य पीठोत्कर्षणवत्कृत्यसाध्यताप्रतिपत्याकालुष्यापत्तेः॥ तदुक्तं मम्मटभट्टैः॥ तददोषौ शब्दार्थौ सगुणावनलंकृती पु
नः क्वापि॥ अस्यार्थः॥ अदोषौ दोषशून्यौ सगुणौ गुणवंतौ माधुर्यौजःप्रसादभेदभिन्नगुणवद्रसव्यंजकाविति यावत्॥ क्व पुनरिति॥ क्वचि
दित्यर्थः॥ अभिमुखात्मकरसभेदसत्वइति यावत्॥ अनलंकृती॥ नञोल्पार्थत्वादल्पत्वस्य चास्फुटत्व एव पर्यवसानादस्फुटालं
कारवंतावपीत्यर्थः॥ अपि नायत्र नाभिमुखौ रसस्तादृशौ तु स्फुटालंकारौ पदपदार्थौ संगृह्येते॥ इत्थं चानलंकृती पुनः क्वापीत्यनेनाभि

रामः ६२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काव्यमितिज्ञेयमिति॥ तत्रचदोषगुणालंकाराणामननुगमेपिलोकोत्तराह्लादरूपचमत्कारजनकतावच्छेदकत्वेनानुगतीकृतानां
तेषांसर्वेषामत्रान्तर्भावः॥ तथाचैतस्यापिप्रदर्शितार्थएवपर्यवसानांतेचदोषगुणालंकाररसास्वादप्रतिबन्धकत्वकाव्यशोभासंपाद
कत्वकाव्योत्कर्षाधायकत्वरूपाबहुविधाःप्रत्येकंमम्मटभट्टादिभिर्वितत्यप्रदर्शिताविस्तरभियानदर्श्यन्ते॥ अतएवज्योत्स्नाभि
सारिकयाकृष्णाभिसारिकयाविरहिण्यावासमुदीरितेऽभिसरणविधितन्निषेधजीवनकष्टातिशयतात्पर्यकेविधोर्मंडलमुद्यतमित्या
दिनिरलंकारादावपिकाव्यत्वसिद्धिः निरुक्तानुगतरूपाक्रान्तस्यरसस्यनिष्पत्तौसमर्थस्यविभावस्यप्रतिपादकत्वात्॥ लोकोत्तरत्वंचाह्ला
दे सकलसहृदयसंविदेकगोचरोजातिविशेषः॥ नन्वेवमननुगतगुणालंकारादिजन्यतावच्छेदकत्वंतस्यानसंभवतीतिचेन्न॥ तदे
तज्जातिव्याप्याजातयः संत्येवताएवसकलानुभवसाक्षिकस्तज्जन्यतावच्छेदिकाइत्येतावतापितद्व्याप्यतादृशजात्यवच्छिन्नजन्य
तानिरूपितजनकतावच्छेदकत्वेनानुगमस्यनिर्व्यलीकत्वात्॥ एतेनचमत्कारजनकतावच्छेदकधर्मस्वरूपकाव्यत्वग्रहंविनाचम
त्कारजनकताग्रहोऽशक्यस्तज्जनकताग्रहंविनातद्घटितकाव्यत्वग्रहोपितथेतिपरस्पराश्रयः॥ नचविभावादिमत्त्वमेवचमत्कारज
नकतावच्छेदकमितिवाच्यं॥ तथापितानिचेन्नाट्यकाव्ययोरिक्षुकत्वाद्भिवत्वग्रहात्काव्यत्वग्रहाधीनादेवजनकताग्रहः॥ जनकता
ग्रहेचतदवच्छेदकत्वस्वरूपकाव्यत्वग्रहइतिह्यन्तरितचक्रकस्यदुर्वारत्वादितिदूषणमलग्नकंवेदितव्यं॥ विच्छित्तिविशेषजीवातुगु
णालंकारादिप्रभेदानामेवप्रातिस्विकरूपेणजनकतावच्छेदकत्वात्॥ उक्तानुगतरूपेणचतेषामेवकाव्यत्वरूपत्वाच्च॥ नहिप्रातिस्वि
करूपानुगतरूपयोः परस्परसापेक्षग्रहकत्वमितिकुतोन्योन्याश्रयादिः॥ एवंस्थितेकाव्यलक्षणेकाव्यत्वंशब्दार्थयोर्व्यासक्तंप्रत्येकप
र्याप्तंवेतिविप्रतिपत्तौदण्डिप्रभृतयोवर्णयन्ति॥ शरीरंतावदिष्टार्थव्यवच्छिन्नापदावलीति॥ इत्थमेवहितददोषौशब्दार्थौविसत्रार्थविशे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र·त· षविशिष्टशब्दस्यविशेष्यतात्मकमुख्यतयाभ्यर्हितत्वेनपूर्वनिपातोभ्यर्हितंपूर्वमितिस्मृतेः॥अन्यथाजात्यदंतत्वेनार्थशब्दस्यैवपूर्वनि नौका
६३ पातापत्तेः॥नचैवंगुणप्रधानभावेद्विवचनानुपपत्तिरितिवाच्यं॥आधानेदंपत्योरिवतदुपपत्तेः॥गुणप्रधानभावेपिजायापतीअग्निमादे
धीयातामित्यत्रतद्दर्शनात्॥नचतत्रयत्कर्तव्यंतदनयासहेत्यप्रधानतृतीयानिर्देशरूपबाधकबलात्तथाभ्युपगतं॥इहतुद्वयोस्तथात्वे
नकिंचिद्बाधकमितिवाच्यं॥काव्यत्वजातेर्व्यासज्यवृत्तित्वाभ्युपगमगौरवस्यैवतथात्वादर्थस्यसिद्धत्वेनलोकोत्तरवर्णनानिपुणकविकर्मका
व्यमितिसमाख्याविरोधाच्च॥मिश्रास्तु॥काव्यपदप्रवृत्तिनिमित्तंहिकाव्यत्वं॥तच्चान्वयव्यतिरेकाभ्यांरसएवेतिनातिरिक्तजातौमानं॥तथाच
बाधकाभावाद्द्विवचनस्यौत्सर्गिकस्वभावहानेर्मानाभावः॥नचसमाख्याविरोधोमूर्धाभिषिक्तंबाधकमितिवाच्यं॥अर्थस्यापिविभावादिरू
पत्वेनविभावपदप्रवृत्तिनिमित्तभावनायाःकापिकारणेकविकृतिविषयत्वस्यवक्तुंशक्यत्वात्॥तस्मादुभयत्रैवकाव्यत्वमित्याहुः॥नव्यास्तु॥
लोकोत्तराल्हादजनकज्ञानगोचरार्थप्रतिपादकशब्दत्वंकाव्यत्वं॥लोकोत्तरत्वंचचमत्कारत्वापरपर्यायोजातिविशेषः॥पुनःपुन
रनुसंधानात्मकभावनाजन्यतावच्छेदकोप्येषप्रत्यक्षसिद्धः॥तथाविधतदादिसर्वनाम्नितदेतल्लक्षणातिव्याप्तिर्दुर्वारैवेतिचेत्॥यस्य
योज्यतादृशार्थविषयभावनात्वंचमत्कृतिजनकतावच्छेदकंतत्त्वमित्यर्थात्॥एवमपियत्वतत्त्वाननुगमएवेतिचेत्॥स्वविशिष्टजनक
तावच्छेदकार्थप्रतिपादकत्वसंबंधेनतादृशजातिमत्त्वमनुगतमेवहि॥शब्दार्थयुगलंतुनकाव्यशब्दवाच्यंमानाभावात्॥काव्यमुच्चैःपठ्य
तेकाव्यादर्थोवगम्यतेकाव्यंश्रुतमर्थोनज्ञातइत्यादिविश्वजनीनव्यवहारतःशब्दविशेषस्यैवकाव्यपदार्थत्वप्रतिपत्तेः॥व्यवहारःशब्दमा
त्रेलक्षणयोपपादनीयइतिचेत्॥स्यादेवंयदिकाव्यपदार्थतयापराभिमतेशब्दार्थयुगलेकाव्यशब्दशक्तेःप्रमापकंदृढतरंकिमपिप्रमाणं रामः
स्यात्॥तदेवतुनपश्यामः॥विमतवाक्यंत्वश्रद्धेयमेव॥इत्थंचासतिकाव्यशब्दस्यशब्दार्थयुगलेशक्तिग्राहकेप्रमाणेप्रागुक्तव्यवहारतः ६३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शब्दविशेषेसिद्धेतींशक्तिंकोनामनिवारयितुमीष्टे॥नचैवंतददोषौशब्दार्थावितिमंमटग्रंथोविरुद्ध्यतइतिवाच्यं॥ऋगताविति
धातोरौणादिकेथप्रत्ययेनिष्पन्नस्यार्थशब्दस्यार्यमाणमात्रपरतयोज्ञायमानइत्यर्थकत्वात्॥कृतैकशेषयोःशब्दपदार्थपदयोःक
र्मधारयसमासेद्विवचनबलाद्रमणीयार्थप्रतिपादकतावच्छेदकानुपूर्वीविशिष्टौशब्दौकाव्यमित्यस्यैवतदर्थत्वात्॥नचैवमर्थशब्द
स्यपूर्वनिपातापत्तिरितिवाच्यं॥विशेषणंविशेष्येणबहुलमितिबहुलग्रहणात्॥कथमन्यथैकवीरेत्यादयःप्रयोगाः॥नचपूर्वकालैकस
र्वजरत्पुराणनवकेवलाःसमानाधिकरणेनेत्यनेनैकवीरेतिसिद्ध्येदितिवाच्यं॥पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्चे
त्यस्यपरतयातद्बाधकत्वात्॥नचैवमसाधुःशब्दोदुर्लभइतिवाच्यं॥यतोष्टाध्यायीलक्षणलक्ष्यतयासंदिह्यमानाअपिशिष्टैरुपदिष्टा
एवसाधवोन्येचभूयांसस्तेसुलभाअसाधवः॥केतेशिष्टाइतिचेत्॥शृणु॥येष्टाध्यायीलक्षणलक्षितत्वेननिर्णीतान्बहुतरान्नैसर्गिकास्त
त्प्रयुंजानाव्याकरणानभिज्ञाअपियंकंचनागतिकगतिकलक्षणेतरयावल्लक्षणालक्ष्यमपिप्रयुंजतेतेत्रभवंतःशिष्टाइति॥तत्रैवंतावद
ध्यवसीयतेयदसौशब्दोनिरुक्तलक्षणलक्ष्यइति॥तदिदंपृषोदरादीनीतिसूत्रभाष्येमहताप्रबंधेननिरूपितं॥तत्किंमंमटभट्टैःकाव्य
पभाषितंयेनशिष्टानभवेयुरित्यलमाग्रहेणेतिप्राहुः॥अत्रब्रूमः॥चमत्कृतंवक्तीतिप्रयोगस्यचमत्कारप्रयोजकंवक्तीत्यर्थकतयापीहोपा
धिरित्यस्येहोपाध्यमाप्यत्वमित्यर्थकतयैवोपपत्तेःस्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकत्वस्यविशिष्टबुद्ध्यनियामकस्यसंबंधत्वेमान
भावात्स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतावच्छेदकानुपूर्वीविशिष्टशब्दस्यकाव्यत्वंवाच्यंतत्रार्थप्रतिपादकतावच्छेदकानुपूर्व्युप
लक्षणंविशेषणंवाद्येवर्णानांनित्यत्वेनान्यादृशानुपूर्वीविशिष्टानामपियद्वाकदाचित्तादृशानुपूर्वीविशिष्टत्वाल्लोकप्रसिद्धपाठानांसर्वा
नांसमुदायेतिव्याप्तिरितिविशेषणतापक्षएवादर्तव्यस्तथाचकाव्यत्वघटकीभूताःसर्वएवपदार्थास्तत्रतत्रविशेषणतयैवनिविशंतेन्यथा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. क्तप्रायदोषापत्तेस्तस्माद्विशेषणोत्रकाव्यत्वंविनाविशेषणविशिष्टविशेष्येप्यसंभवत्तत्सर्वैर्थैवतेषुसिद्ध्यति॥पदपदार्थद्वयमात्रोपादा नौका
६४ नंतुकाव्यशरीरप्रविष्टविशिष्टार्थप्रतिपादकतावच्छेदकयोजितवाक्यनिष्ठानुपूर्व्युपस्थापककाव्यशरीरप्रविष्टशब्दनिष्ठानुपूर्वीवै
जात्यंविभिन्नकाव्यताव्यवहारप्रयोजकंनतुशब्दस्यार्थस्यद्वयोरनयोश्शब्दानुपूर्वीव्यक्तेर्वाभेदस्तथैतर्हिसर्वमेवकाव्यंयथोक्तव्यवहा
रविषयःस्यात्॥अर्थविशेषप्रतिपादकतावच्छेदकानुपूर्वीवैजात्यस्यतथात्वेपिसभंगश्लेषकाव्यभेदव्यवहारापत्तेरित्यर्थस्फोरणायेति
॥तस्यचकारणंकविगताकेवलाप्रतिभा॥साचकाव्यघटनानुकूलपदपदार्थोपस्थितिः॥तद्गतंचप्रतिभात्वंकाव्यकारणतावच्छेदकतया
सिद्धोजातिविशेषः॥चाक्षुषत्वादिनासांकर्येप्यखंडोपाधेर्निराबाधत्वात्॥तादृशप्रतिभात्वव्याप्यंचधर्मद्वयं॥एकंदेवतामहापुरुषप्रसा
दजन्यादृष्टस्यैकंचविलक्षणव्युत्पत्तिकाव्यकरणाभ्यासयोर्जन्यतावच्छेदकं॥नतुत्रयमेवमिलितंप्रतिभासामान्येहेतुः॥बालादेस्तौविनापि
केवलान्महापुरुषप्रसादादपिप्रतिभोत्पत्तेर्दृष्टत्वात्॥नचतयोस्तत्रजन्मांतरीणयोःकल्पनमितिवाच्यं॥गौरवात्॥मानाभावात्॥कार्यस्यान्य
थाप्युपपत्तेश्च॥लोकेहिबलवताप्रमाणेनागमादिनासतिकारणताविनिर्णयेपश्चादुपस्थितस्यव्यभिचारस्यवारणायजन्मांतरीयमन्यथानु
पपत्त्याकारणंधर्मादिकल्प्यते॥अन्यथात्तुव्यभिचारोपस्थित्यापूर्ववृत्तकारणताविनिर्णयेभ्रमत्वप्रतिपत्तिरेवजायते॥नापिकेवलमदृष्टमेवकार
णमित्यपिवदितुंशक्यं॥कियंतंचित्कालंकाव्यंकर्त्तुमशक्नुवतःकथमपिसंजातयोर्व्युत्पत्त्यभ्यासयोःसतोःप्रतिभायाःप्रादुर्भावस्यदर्शनात्॥त
त्रादृष्टस्वीकारेत्तुताभ्यांप्रागपितस्याःप्रसक्तेः॥नचप्राक्प्रतिभाप्रतिबंधकमदृष्टांतरमस्तीतिवाच्यं॥तादृशानेकस्थलगतादृष्टद्वयकल्प
नापेक्षयाक्लृप्तव्युत्पत्त्यभ्यासयोरेवप्रतिभाहेतुत्वकल्पनेलाघवात्॥तस्मात्प्रागुक्तसरणिरेवज्यायसी॥प्रतिभात्वंचकवितायाःकार रामः
णतावच्छेदकमितिप्रागुक्तप्रतिभागतवैलक्षण्यमेववाविलक्षणकाव्यस्यैतिवानव्यभिचारः॥नचसतोरपिव्युत्पत्त्यभ्यासयोर्यत्रनप्र ६५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिभोत्पत्तिस्तत्रान्वयव्यभिचार इति वाच्यं॥तत्र तयोस्तादृशवैलक्षण्ये मानाभावेन कारणतावच्छेदकानवच्छिन्नत्वात्॥पापविशेषस्य प्रति
बंधकत्वकल्पनान्न दोषः॥प्रतिबंधकाभावस्य च कारणता समुदितशक्त्यादित्रयहेतुतावादिनः शक्तिमात्रहेतुतावादिनश्चाविशि
ष्टा॥प्रतिवादिनां मंत्रादिभिः कृते कतिपयदिवसव्यापिनि वाक्स्तंभे विहितानेकप्रबंधस्यापि कवेः काव्यानुदयस्य दर्शनात्॥तदिदं
काव्यं चतुर्विधं॥उत्तमोत्तममुत्तमं मध्यममधमं चेति॥यत्र शब्दार्थौ गुणीभावितात्मानौ लोकोत्तराल्हादकारिणमर्थमभिव्यक्तस्तदाद्यं
॥परांगस्य वाच्यसिद्ध्यंगस्यापि व्यंग्यस्य चमत्कारकारितयातिप्रसंगवारणाय गुणीभावितात्मानाविति शब्दार्थापेक्षया व्यंग्यप्राधान्याभि
प्रायकं॥अतिगूढव्यंग्यनिरासाय लोकोत्तराल्हादकारिणमिति॥यत्र व्यंग्यमप्रधानमेव दुर्दैववशतो दासमनुभवद्राजकलत्रमिव चमत्का
64 रकारणं तदुत्तमं॥वाच्यापेक्षयाप्रधानीभूतं व्यंग्यांतरापेक्षया च गुणीभूतं यद्व्यंग्यं तदाद्यध्वनावतिव्याप्तिवारणायावधारणं॥लीनव्यंग्यवा
च्यचित्रातिप्रसंगवारणाय चमत्कारेति॥यत्र व्यंग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तन्मध्यमं॥यत्रार्थचमत्कृत्युपस्कृता शब्द
चमत्कृतिः प्रधानं तदधमं॥समप्रधानशब्दार्थचमत्कारे मध्यमेतिव्याप्तिवारणायोपस्कृतांतं शब्दचमत्कृतिविशेषणं॥एवमेव यद्यपि
यत्रार्थचमत्कारासमानाधिकरणा शब्दचमत्कृतिस्तदधमाधमं काव्यं काव्यविधासु गणयितुं सांप्रतं॥यथा मम॥कोकिलाकलकलकेकलि
कालेलोलकेकिकुलकेलिकलाके॥काकुलालककककाकुकुलालैः किंकुलाकिललल्लोककलिलीलामिति॥यदि चात्र कुलटारभोवसंतका
लाद्युद्दीपितो विपरीतसुरताख्यः शृंगारोपि सहृदयमात्रसाक्षिकः सन्शब्दचमत्कृतौ गुणः कलिलीलापदमपि कथंचित्तद्गुणमेवेत्या
ग्रह्यस्तदधममेवेत्युच्यते तदापि तारतारतरैरेतैरुत्तरोत्तरतो रुतैः॥रतानां तित्तिरीरैराति तीरे तीरे नरोतरा वितितिर्यग्वतांतार्थं कंपद्यमेवमे
कास्वरपद्याद्यावृत्तिपद्मबंधादि महाकविनिबद्धं तथा दृश्यं॥तथापि रमणीयार्थप्रतिपादकशब्दत्वरूपकाव्यसामान्यलक्षणायोगाद्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. वस्तुतः काव्यत्वाभावेन प्राचीनपरंपरामात्रमनुरुंधानैर्महाकविभिस्तत्र तत्र काव्ये निबद्धमपि नैवानौचित्यकृदिति मंतव्यं ॥ अत्र शब्दार्थयोश्च नौका
६५ मत्कारभेदेन द्वयोरपि द्वयोरेकभेदत्वांगीकारे व्यंग्यप्राधान्याप्राधान्यकृतमपि भेदद्वयमीषदंतरमेकभेदतामुपयातीति द्विविधमेव का
व्यं भवेदिति त्रैविध्यप्रदर्शनं राज्ञामाज्ञामात्रमिति विभावनीयं ॥ तत्राद्यप्रभेदात्मकास्य प्रभेदस्य ध्वनेः सामान्यतः केचन भेदा उच्यंते ॥ ध्व
निस्तावद्द्विविधः ॥ अभिधामूलो लक्षणामूलश्च ॥ तत्राद्यस्त्रिविधः ॥ रसवस्त्वलंकारभेदात् ॥ रसध्वनिरित्यलक्ष्यक्रमोपलक्षणाद्रसभावतदा
भासभावशांतिभावोदयभावसंधिभावशबलतानां ग्रहणं ॥ द्वितीयश्च द्विविधोऽर्थांतरसंक्रमितवाच्योऽत्यंततिरस्कृतवाच्यश्च पुनरुक्तत्वप

नालोच ॥ परं तु द्वयोरप्यानंदरूपता ॥ ननु मानोरथिको रसो न प्रसिद्ध इति चेत्सत्यं ॥ अस्माकं तु मनोरथोपरचितप्रासादवापी
तटक्रीडाकाननकेलिकौतुकजुषामायुः परिक्षीयत इत्यादौ मानोरथिकशृंगारस्य श्रवणात् ॥ शास्त्रेषु स्वस्य त्रैविध्यगणना
च ॥ रसेन विना च सुखानुत्पत्तेरिति ॥ तत्र विशेषाः ॥ यदाहु भरतः ॥ शृंगारहास्यकरुणरौद्रवीरभयानकाः ॥ योगाभ्यां शक्यस्यैव रूपां

तरेण प्रतिपादने आद्यः ॥ विरोधतदतिरिक्तसंबंधाभ्यां शक्यसंबंधिनो शक्यस्य प्रतिपादने त्वंत्यः ॥ एवं पंचविधे ध्वनौ परमरमणीयतया सक
लमूर्धन्यो रसध्वनिरिति रस एव सप्रपंचं ग्रंथकृता निरूपित इत्यलमतिविस्तरेण ॥ नाट्यं नाम आहार्याद्यभिनयचतुष्टयं ॥ स्वाप्निकमानोरथि
कयोर्दुःखाद्यात्मकत्वेऽपि काव्यनाट्ययोरेकरूप एव रस इत्याह ॥ अस्माकमिति ॥ धन्यानां गिरिकंदरे निवसतां ज्योतिः परं ध्यायतामा
नंदाश्रुजलं पिबंति शकुना निःशंकमंकेशया इति पूर्वार्द्धं ॥ श्लोकार्थः स्पष्टः ॥ विप्रतिपन्नं प्रत्यर्थं तत्संख्यामाचष्टे ॥ अद्भुत एवैको रस इति नारायण रस.
प्रभृतयः ॥ शृंगार एव रस इत्यपि केचिदालंकारिकाः ॥ ते द्वादशेति चाप्याधुनिककवयः ॥ तत्सर्वमयुक्तमिति दर्शयिष्यन्विवक्षितार्थं दर्शयति ॥ वीभ ६५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथाचकाव्येप्येतावंतद्वयंविवादमित्यभिप्रायः॥सकलाधिदेवतंजगदंतरात्मा॥ननुकिंनामविस्रोशृंगारदेवतात्वं॥शृणु॥निखिला
श्रितरत्यालंबनत्वेसतिदेवतात्वंतत्त्वमित्येके॥निखिलविषयरत्याश्रयत्वेसतिदेवतात्वंतत्त्वमित्यन्ये॥तत्तत्स्थायिमयप्रकृतिकत्वेस
तिदेवतात्वंतत्तत्त्वमितिबहवः॥द्वादशरसवादिमतमपाकर्त्तुंशंकते॥एतेषांप्रतिनियतस्थायिभावानाह॥समाधत्ते॥मुख्यरसाभावे
रतेर्व्यभिचारितापसंगतेवेतिभक्तास्थकृति॥उत्तरयति॥वात्सल्यइति॥इयंचसतिसप्तमी॥एवमग्रेपिकरुणइति॥पुष्यतीतिशेषः॥एवम

बीभत्साद्भुतसंज्ञौचनात्येचाष्टौरसाःस्मृताः॥सकलाधिदैवतंविस्रुःसचशृंगारस्यापिदैवतं॥तेनसकलाकांक्षाविषयत्वेनाराध्य
तयाचप्रथमंशृंगारोपन्यासः॥ननुवात्सल्यंलौल्यंभक्तिःकार्पण्यंवाकथंनरसः॥आर्द्रताभिलाषश्रद्धास्पृहाणांस्थायिभावानांतत्र
सत्वादितिचेन्न॥तेषांव्यभिचारिरत्यात्मकत्वात्॥ननुकस्यरसस्यतेव्यभिचारिभावाभवेयुरितिचेत्सत्यं॥वात्सल्येकरुणएवरसो
लौल्येहास्योभक्तौशांतःकार्पण्येपिहास्यएव॥नन्वेवंपरत्रक्लृप्तत्वादत्रव्यभिचारित्वेनावश्यकत्वाद्धर्मिकल्पनातोधर्मकल्पना
यालघुत्वाच्चव्यभिचारिणीरतिरेवास्तुकिंकरुणेनेतिचेन्न॥रतेःशोकद्वतिशोककारणतायांरतेरुपस्थयात्॥किंचरतेःकस्यरसस्य
व्यभिचारित्वं॥नशृंगारहास्यरौद्रवीराणां॥युवमिथुनपरस्परप्रीतिहासक्रोधानंदानांतत्राभावात्॥नवाबीभत्सस्याजुगुप्साया
स्तत्राभावात्॥ ग्रेपि॥तथापिसंख्यानियमस्त्वदुक्तस्त्वसंगतएवेतिशंकते॥परत्रशृंगारेअत्रकरुणे॥धर्मिकल्पनातःप्रधानरसांतरकल्प
नातः॥धर्मकल्पनायाःगुणतयावश्यकल्प्यरतिमात्रकल्पनायाः॥लघुत्वादेकमात्रविषयत्वात्॥उपस्थयादिति॥तथाचकरुणचर्वणापर्यंतंरते
स्त्वान्नरत्याशोकोगतार्थइतिभावः॥करुणंविनारतेर्व्यभिचारितापिनोपपद्यतइत्याह॥आनंदानामित्युत्साहानामित्यर्थः॥क्वचित्तथैवपाठः॥तत्त

र.त. उपसंहरति॥यद्यपिहास्येप्येवमेवकरणन्यायोतिदेष्टुंशक्यस्तथाप्यधिकंवक्तुंस्वयमाशंकते॥अधिकाशंकाभूमिकामारचयति॥सांकर्यंमिथोभूयः टीका
९९ सहचारः॥ननुरतिकरुणयोरेकतरव्यभिचारवद्रतिहास्ययोरेकतरव्यभिचारस्याप्यभावेकथंपार्थक्यमित्याशंकते॥स्थायिभावभेदेरससांकर्यं
नदोषायेत्यभिप्रेत्यसमाधत्ते॥येनःप्रत्ययेनाभिव्यक्तिरित्यर्थः॥अभिप्रायंविशदयति॥उक्तन्यायमन्यत्रातिदिशति॥एवंरसभेदंविनारतेर्व्यभि
चारित्वानिर्वचनं॥ऊह्यमिति॥रतेरिवविस्मयस्याप्यस्थिरत्वादन्येषामसंभवादितिभावः॥स्थाय्यसाधारण्यंप्रकृतेपीतिशंकते॥तथाचनत

नाप्यद्भुतस्य॥विस्मयस्यतत्रास्थिरत्वात्॥तस्माच्छोकस्यस्थायितयाशोकस्थायिभावकःकरुणाख्योतिरिक्तोरसइति॥ननुरतिरे
वास्तुकिंहास्येनेतिचेत्कस्यासौव्यभिचारिणीकरुणरौद्रवीरभयानकबीभत्सानांतत्रानवकाशात्॥नाप्यद्भुतस्य॥विस्मयस्यत
त्रास्थिरत्वात्॥नशृंगारस्य॥रतेःस्थायित्वाभावात्॥परंतुरत्यासहहास्यस्यसांकर्यं॥ननुरतिहास्ययोरसंकीर्णस्थलाभावात्पृथक्त्वंक
थंस्यादितिचेन्न॥हेतोरसाधारण्यात्॥असाधारण्यमत्रस्थायित्वं॥यथारतिसांकर्येपिस्थायिशोकादसाधारणात्कारणात्करु
णोभिद्यतेतथातत्सांकर्येपिस्थायिहासभावादसाधारणात्कारणाद्धास्योभिद्यते॥शांतेप्येवमूह्यं॥नचवात्सल्यादावप्यसा
धारणहेतवआर्द्रतादयःसंत्येवेतितेषामपिरसत्वापत्तिरितिवाच्यं॥आर्द्रतादीनामपिरतित्वात्॥तस्मात्तत्रासाधारण्येपिशृंगा
ररसत्वापत्तिः॥ स्याद्वात्सल्यस्थायित्वमितिभावः॥अत्रविप्रतिपन्नंप्रत्याह॥नचस्त्रीपुंसविषयत्वाभावेकथंशृंगाररसत्वापत्तिरितिवा
च्यं॥रतिसंभूतस्त्रीपुंसविषयकशोकप्रकृतिकतयावश्यकत्व्यकरुणपोषकरतित्वेनैवोपपत्तौरसांतरेमानाभावादित्याशयः॥ननु रामः
तत्रैवरतिप्रकृतिकत्वंतत्संभूतशोकप्रकृतिकत्वंवेत्यत्रविनिगमनाविरहइतिचेत्॥रसांतरेविजातीयप्रकृतिकत्वेसंभवतिरसांतरप्रक ९९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद्धि रुद्रानुभावैस्तद्धि जातीयप्रकृतिकत्वस्याध्यवसायाच्चेति॥ तदिदमुक्तमुपस्थयादिति॥ स्वरूपसतोरुत्साहक्रोधयोर्विनाभावादेकतरस्व्यभिचारित्वमेवयुक्तमित्याशंकते॥ समाधत्ते॥ वीरेक्रोधस्य व्यभिचारित्वेपि रौद्रेस्थायित्वात्॥ उत्साहस्य रौद्रेव्यभिचारित्वेपि वीरेस्थायित्वात्॥ विनिर्गंतुमशक्यत्वाच्च द्वयोरप्यविप्रतिपन्नत्वमित्याह॥ स्थाय्यवच्छिन्नानंदस्यानंदावच्छिन्नस्थायिनो वा रसपदार्थत्वयोक्तत्वात्तदनुसारेण शृंगारं लक्षयति॥ युवा च युवतिश्च युवानौ तयोरिति पूनस्तिरितिसूत्रविहितप्रत्ययांतेन सहैकशेषः॥ अन्यथा तल्लक्षणमात्रकृतविशेषाभावेनैकशेषाप्रसक्तेः॥ परस्परं परिपूर्णः परस्परयथोचितविभावानुभावव्यभिचारिनिष्पन्नरत्यवच्छिन्नः॥ प्रमोद आनंदः॥ सम्यगिति॥ औचि

ननूत्साहक्रोधानुभयन्नतस्माद्वीररौद्रयोरन्यतर एव रसो वर्ततामिति चेन्न॥ स्थायिभेदेन भेदात्॥ उत्साहवासनावीरेनतु रौद्रे॥ क्रोधवासनारौद्रेनतुवीर इति॥ यूनोः परस्परं परिपूर्णः प्रमोदः॥ सम्यक्परिपूर्णरतिभावो वा शृंगारः॥ ॥यूनोरेकस्य प्रमोदस्त्योराधिक्यन्यूनतायां व्यतिरेके वा परिपूर्तेरभावाद्रसाभास इति॥ स च द्विविधः॥ संभोगो विप्रलंभश्चेति॥ तत्र दर्शनस्पर्शनसंलापादिभिरितरेतरमनुभूयमानं सुखं॥ परस्परसंयोगेन उत्पद्यमान आनंदो वा संभोगः॥ संयोगो बहिरिंद्रियसंबंधः॥ सेनेत्यर्थः

परिपूर्णो विभावानुभावव्यभिचारिभिर्भग्नावरणचिद्विशिष्टः॥ रतिभाव इति स्थायिमध्यं॥ उभयत्राप्यौचित्यघटनाप्रयोजनं दर्शयति॥ यूनोर्मध्ये॥ तं विभजते॥ संभोगं लक्षयति॥ तयोर्मध्ये॥ अत्र दर्शनादीनामन्यतमत्वेन प्रवेशापेक्षया लाघवादाह॥ बहिरिति॥ एतेनानाश्लिष्टयोरपि संभोगव्यवहारश्लिष्टासंगिनोरपि विप्रलंभव्यवहारश्च सूपपद इति सूचितं॥ बहिरिंद्रियसंबंधमात्रस्यापि संभोगत्वे तदेकतराभिमानभूम्ना विप्रलंभव्यवहारो दुर्घट इति विशेष्यं॥ वस्तुतस्तु फलोपहिताफलोपधायकसामग्रीसमवहिता वा रतिः किं वा द्विविधरत्यवच्छिन्नश्चिदानंदो द्वि

विधः संभोग इति लक्षणवाक्यद्[illegible]स्थं ॥

र.त. इत्थंचोदाहरणभेदाद्नुसरणमेतत्तात्पर्यकमपीतिसारं॥यद्यप्यमूर्तत्वाद्रसेवर्णसंभावनानास्ति॥तथापितत्तद्देवताभिरभेदाध्यवसायाद्व नोक्ता
६७ र्णव्यवहारःकाव्यविदामितिमंतव्यं॥यद्यपिमधुसूदनस्यचाटुवचनानिप्रियवाक्यानिस्तोभेनप्रलयस्वरभंगादिसात्त्विकभावसंपातेनपराहृ
तानिप्रतिबद्धानिबभूवुः॥क्वचित्स्तंभेनेतिपाठः सतुप्रागुक्तलक्षणलक्षितेस्तंभेवचनप्रतिबंधकत्वस्यानुभवबाधितत्वात्प्रामादिकएव॥प
द्विचतत्पाठप्रामाण्येप्याग्रहस्तदाक्रियासामान्यप्रतिबंधकत्वस्यस्तंभलक्षणत्वाभिप्रायेणयोजनीयः॥तच्चोक्तमधस्तात्॥किंचपाणिःपयो
धरगतःसन्नस्यचपरकीयांतःकरणपरीक्षामात्रार्थकमार्तिकगुटिकाप्रक्षेपसमशीलांगाकृष्टिप्रतिपत्तिमात्रपरत्वान्ननायकारब्धत्वशं
काकालुष्यमावहेथाः॥कथंवान्यथोत्तरार्द्धस्यावधारणपूर्वार्द्धस्यजाड्यंपराहतिंवासार्थकयेः॥तथाचात्रत्यगतानग्रेतनस्थकृशब्दाभ्यांभूत

अस्यदैवतंविष्णुर्वर्णःश्यामः॥यथास्तोभेनचाटुवचनानिपराहतानिपाणिःपयोधरगतोजडतांजगाम॥लक्ष्म्याःपरंतुपृथुवे
पथुरेवनीवींविस्रंसयन्सुहृदभून्मधुसूदनस्य॥यथावानिद्राणेक्षणमुन्नमय्यवदनंकांतेकुचांतःस्पृशिलस्तव्यस्तदुकूलद
र्शितवलिप्रव्यक्तनाभिश्रियः॥

वर्तमानार्थकगौणप्रत्ययप्रत्ययांताभ्यामनिच्छेच्छापूर्वकत्वव्यक्त्यातदिच्छापूर्वकत्वप्रकारकान्यदीयनि
श्चयविशेष्यप्रथमव्यापारकत्वंतदारब्धत्वमितिसूचितं॥जडतांजाड्यंजगामप्रापपरंतुलक्ष्म्याःपृथुवेपथुरेवासहायःकंपोनीवींम टीका
त्रापिलक्ष्म्याइत्यनुषज्यतेविस्रंसयन्मोचयन्सुहृदत्रापिमधुसूदनस्येत्यनुषज्यतेतत्कार्यकारीतिभावः॥अभूज्ज्ञातइत्यर्थः॥एतेनानौचि
त्यपरिहारेणनायिकारब्धंसंभोगमुदाहर्तुंस्वाभिधानसौष्ठवमादर्शितं॥नायिकारब्धसंभोगमुदाहृत्यनायकारब्धमप्येनमुदाहरति॥ रामः
निद्राणेनिद्रामुकुलितेईक्षणेचक्षुषीयस्यतथाराधायावदनमुन्नमय्योच्चैःकृत्वाकांतेश्रीकृष्णेकुचांतःस्पृशिस्तनांतरालनिहिताग्रहस्ते ६७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आदौहस्तंशिथिलभूतंपश्चाद्वस्त्रंगलितंयद्दुकूलंतेनदर्शितायावलेस्त्रिवलेःप्रव्यक्तायाःप्रकटायानाभेश्वश्रीर्यस्यास्तादृश्याराधायादृे
तिईषत्कंपयानकमलपत्रपुटगर्वांसहिस्तुभिमंदवड्डलैरितियावद्दृक्कोणस्यतरंगितैरपांगपातैःकर्तृभिःस्मरःकामोदीर्घायुरेवातिभूमिं
गतएवविरचितःकृतइत्सर्थः॥यद्यप्येवमुभयारब्धोपिसंभवति॥यथाममः॥धनुर्लतेवाभिमुखीभवंतीगुणात्मतंतोरिवमौलिभाजः॥
स्वयंप्रियस्याधरमापिबंतीस्वकंचयापाययतेंगनासेत्यादावेकतरारब्धत्वस्यानध्यवसायात्तथापीत्यमनेकविधोप्येषएकएवगण्यतइ
त्याह॥नायकयोरितिप्रमान्विायेस्तेकशेषः॥यद्यपिनायिकायाएवावस्थाभेदेनभेदोननायकस्यान्यथाखंडितादिभेदजीवातुपरसंभोग

राधायादरघूर्णदुसलदुलद्द्रोणीमदद्रोहिभिर्दृक्कोणस्यतरंगितैर्विरचितोदीर्घायुरेवस्मरः॥देशानांसमयानांनायिकानांचभे
देननायकयोरवस्थाभेदेनचबहवोभेदास्तेचरसमंजर्यांविशेषतोदर्शिताइहपुनर्विस्तरभियानप्रदर्श्यंतइति॥अथहावा
निरूप्यंते॥तत्रभरतः॥लीलाविलासोविच्छित्तिर्विभ्रमःकिलकिंचितं॥मोट्टायितंकुट्टमितंविब्बोकोललितंतथा॥विहृतंचेति
विज्ञेयादशहावास्तुयोषितां॥नारीणांशृंगारचेष्टाहावः॥सचस्वभावजोनारीणां॥ विन्हितत्वस्यापिनायिकायामुद्भावनेतितरामनौ
चित्येनरसाभासापत्तिरित्यादिरसमंजर्यांप्रपंचितं॥तथाप्यत्रावस्थापदेनाजहत्स्वार्थलक्षणयानायकभेदनियामकस्वभावएवोपलक्ष्यतांनैता
वताकिंचिदपचीयतेग्रंथकृतः॥अत्रैवप्रसंगाद्धावान्निरूपयितुंप्रतिजानीते॥तात्रुद्दिशति॥योषितामित्यादिलक्ष्यनिर्देशः॥सामान्यतोलक्षय
ति॥नारीसंबंधीत्यर्थः॥शृंगारचेष्टेति॥संभोगशृंगारानुगुणोव्यापारविशेषइत्यर्थः॥आनुगुण्यंचपौर्वापर्येणसंबंधित्वं॥आनुगुण्येनव्यवह्रीय
माणत्वंवेत्यन्यदेतत्॥नारीस्वभावविशेषनियतइत्यर्थः॥ननुनारीजातिनियतइतिभावः॥तथाचनारीस्वभावजन्यत्वेसतिशृंगारानुगुणचेष्टात्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ उत्तरयति॥औपाधिकाउद्दीपकनिष्ठोत्कर्षरूपोपाधिसत्तानियतसत्ताकाः॥स्वभावजाउद्दीपकस्वरूपमात्रसत्तानियतसत्ताकाः॥आशय नोक्ता
६८ मविद्वान्नांकुते॥एवंमन्यतेचेदित्यर्थः॥कथमिति॥स्वभावस्यचिरंतनत्वादितिभावः॥आशयमुद्घाट्यसमाधत्ते॥उद्दीपकस्वरूपमात्रेत्यर्थः
॥पुरुषाणांचोद्दीपकातिशयान्वयव्यतिरेकाभ्यांनावितिशेषः॥तान्विभजते॥शारीराणिशरीरमात्राश्रितानि॥आंतराणिमनोमात्राश्रिता
नि॥उभयसंकीर्णमिति॥श्रमस्यशारीरत्वादभिलाषस्यांतरत्वाद्गर्वस्मितहर्षभयक्रोधानांस्वरूपतस्तथात्वेआंतरत्वात्फलतस्तथात्वेशारीर

ननुबिब्बोकविलासविच्छित्तिविभ्रमाःपुरुषाणामपिसंभवंतीतिचेत्सत्यं॥तेषांत्वौपाधिकाःस्वभावजाःस्त्रीणामेव॥नन्वेवंयदिता
संसदैवतेकथंनभवंतीतिचेत्सत्यं॥उद्दीपकान्वयव्यतिरेकाभ्यांनायिकानांहावाविर्भावतिरोभावाविति॥लीलाविलासविच्छित्ति
विभ्रमललितानिशारीराणि॥मोट्टायितकुट्टमितबिब्बोकविहृतान्यांतराणिकिलकिंचितमुभयसंकीर्णमिति॥प्रियभूषणवचना
यनुकृतिर्लीला॥तत्रविभावःसखीकौतुककलापः॥अनुभावःप्रियपरिहासः॥यथा॥चंडांशौचरमाद्रिंतुबिनिमग्नेजिज्ञासितुंसु
भुवांस्यंचत्कौतुकयातयाविरचितेवंशीरवेराधया॥एषस्फूर्जतिकस्यनिःस्वनइतिक्रोधाद्व्रजन्कानननंराधावीक्ष्यलताप्रता
नपिहितांस्मेरोहरिःपातुनः॥ त्वात्तदेतदन्यतमघटितसमुदायात्मककिलकिंचितस्योभयसंकीर्णत्वमित्याशयः॥तत्रप्रथमोद्दि
ष्टत्वाल्लीलांलक्षयति॥विभावउद्दीपकमनुभावस्तत्स्वरूपस्तदेश्यमेवमग्रेपिसर्वत्रबोध्यं॥चंद्रांशौतिग्मरोचिषिचरमाद्रिंतुबिन्यस्तवत्यातेसति
सुभ्रुवांनायिकानांमनोंतःकरणवृत्तिंजिज्ञासितुंपरीक्षितुंत्वच्चत्कौतुकयासंजातकौतुकयातयाप्रौढयाराधयावंशीरवेमुरलीनादेविरचितेकृतेसति रस॰
एषकस्यनिःस्वनःकेनकृतोमुरलीनादइतिक्रोधादमर्षेणकाननंराधाधिष्ठितंव्रजन्गच्छन्लताप्रतानपिहितांवितनलताछन्नांराधांवीक्ष्यस्मेरोहस ६८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कूजंतीशब्दायमानाकांचीमेखलायत्रदरमीषत्स्फुरंतीवलिस्त्रिवलिर्यत्रनटंतीचंचलाभ्रूवल्लीवल्लीसदृशीभ्रूर्यत्रवेल्लद्दुलाद्दुपुःशरी
रंयत्रवल्गंतीउद्वेल्लंतीकुंडलकांतिःकर्णभूषणशोभायत्रसाचिवक्रंवलितानुकृताग्रीवायत्रकर्मणियथाभवतितथावचनंलयस्तयावर
तनोःसुंदर्याःप्रातरिति॥प्रातःकालेनर्तितानिवायुचलितानि॥एतेनक्रियाविशेषणनिर्दिष्टार्थंबिंबभूततास्मिन्नावेदिता॥तानिया
निपुंडरीकाणिसितोत्पलानितेनमुखप्रसादोव्यंग्यस्तेषांपरिषदःसभायाःपांडित्यस्यशोभायाःपाटच्चरीसमपहर्त्रीदृष्टिर्यंप्रतियमुद्दिश्य

गमननयनवदनभ्रूप्रभृतीनांयःकश्चिदुत्पद्यतेविशेषःसविलासः॥अत्रविभावाः॥प्रियदर्शनस्मरणादयः॥अनुभावाः॥अभि
लाषवैदग्ध्यप्रकाशनादयः॥यथा॥कूजत्कांचिदरस्फुरद्वलिनटद्भ्रूवल्लिवेल्लद्वपुर्वल्गत्कुंडलकांतिसाचिवलितग्रीवंलयस्या
वचः॥प्रातर्नर्तितपुंडरीकपरिषत्पांडित्यपाटच्चरीदृष्टिर्यंप्रतिजायतेवरतनोर्वक्त्रासशक्राधिकः॥कतिपयभूषान्यासोविच्छित्तिः
॥तत्रविभावाः॥सौकुमार्यप्रियसौभाग्यसौंदर्यगर्वक्रोधक्लेशादयः॥अनुभावागर्वमानक्लेशप्रकाशादयः॥यथा॥केयूरंनकरेपदे
नकटकंमौलौनमालापुनःकस्तूरीतिलकंतथापितनुतेसंसारसारांश्रियं॥सर्वाधिकयमलेखिभालफलकेयद्वेधसासुभ्रुवोजा
नीमःकिमुतत्रमन्मथमहीपालेनमुद्राकृता॥ वक्त्राजायतेसशक्राधिकोनायासेनस्वर्गफलाभिमुख्यादित्यर्थः॥विच्छित्तिंलक्षयति॥
यद्यपिकेयूरंबाहुभूषणंकरेनकृतंपदेकटकंपुनरप्यर्थेनमौलौमस्तकेमालाननतथापिकस्तूरीतिलकंललाटइत्यर्थात्संसारसारांसर्वाति
शयितांश्रियंशोभांतनुते॥तत्रोत्प्रेक्षते॥वेधसाब्रह्मणासुभ्रुवोस्याइत्यध्याहार्यंललाटफलकेयदितिक्रियाविशेषणंसर्वाधिकंललनाचूडाम
णित्वमलेखितत्रलेखेमन्मथमहीपालेनकामदेवेनेयमित्यध्याहार्यंकस्तूरीतिलकरूपामुद्रायायाथार्थ्यप्रतिपत्तयेकृताकिम्मितिवयंजानीमोध्रुवंनि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ केलिविधौक्रीडाप्रारंभेपूर्वापरीभूतावयवप्रचितावयविनीतियावत्॥स्यक्तेवसितेपीतांबरस्यश्रीकृष्णस्यांशुकंपरिधानीयंनिजांशुकधियास्व नौका
६२ परिधानीयबुद्ध्यापरिधायप्रावृत्यसत्वरशयनादंतःपुरपर्यंकादुत्थायप्रातरुषसिबहिर्व्रजेस्यागच्छंत्याःपद्मायारुक्मिण्याःसकाशादादातुम
र्थात्स्वीयंगृहीतुंवसनांचलमर्थात्तत्रस्थितंतदीयंपरिधानीयंचपलयन्निदंत्वदीयमितिदर्शयन्तावतानालोचयंत्यांतस्यांकोपंदृशादर्शयन्ना
कस्मिककोपनिदानगवेषणेनापीयमवबुद्ध्येतेतिमत्वामिथ्यैवलोचनाकोचनाद्याविकुर्वन्वाचालुत्रगद्गदास्वरयाकौतुकमाचरन्लोकोपहासा

वागंगभूषणानांस्थानविपर्यासोविभ्रमः॥तत्रविभावाः॥धनमदरागौत्कस्त्यादयः॥अनुभावाःप्रियसख्याद्युपहासादयः॥यथा॥
स्यक्तेकेलिविधौनिजांशुकधियापीतांबरस्यांशुकंपद्मायाःपरिधायसत्वरशयनात्प्रातःप्रयांत्याबहिः॥आदातुंवसनांचलंचपलय
न्कोपंदृशादर्शयन्वाचाकौतुकमाचरन्स्मितसुधास्निग्धोहरिःपातुनः॥श्रमाभिलाषगर्वस्मितहर्षभयक्रोधानांसंकरःकिलकिं
चितं॥तदाह॥श्रमाभिलाषगर्वाणांस्मितहर्षभयक्रुधां॥असकृत्संकरःप्राज्ञैर्विज्ञेयंकिलकिंचितमिति॥अत्रविभावाः॥नवयौव
नोद्रेकचांचल्यादयः॥अनुभावाःकर्तव्यानिर्धारणादयः॥यथा॥कोदंडमारोहतिचंडिमानंमधुव्रतःकांक्षतिशोणिमानं॥

सद्योभवन्
लोकास्तामेवमुपहसिष्यंतीतिसूचयन्नितियावत्स्मितसुधास्निग्धोहास्यरससंभृतांतःकरणोहरिर्नोस्मान्पात्रक्षत्वित्यर्थः॥किलकिंचि
तंलक्षयति॥श्रमोगात्रगौरवादिरभिलाषइच्छागर्वस्मितहर्षभयक्रोधाःस्वस्वप्रकरणेलक्षितामुख्यावातेषामनुभावागौणाएववातेषां
संकरोन्यतमसामानाधिकरण्यं॥द्वयोरेवसामानाधिकरण्येपिनतथाव्यवहारइतिवक्तुंतत्रसंमतिमाह॥अनुभावविवक्षयोदाहरति रामः
॥कोदंडंतत्त्वेनाध्यवसितंभ्रुकुटियुगलंचंडिमानंकौटिल्यमारोहतिभजते॥एतेनगर्वानुभावउक्तः॥मधुव्रतस्तत्त्वेनाध्यवसितंचक्षुःशो ६९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एतेनक्रोधानुभावउक्तः॥पद्मंतत्त्वेनाध्यवसितंवक्त्रंसुधांप्रसादंवर्षतिप्रकटयति॥एतेनहासानुभावउक्तः॥कीदृशंपद्मंवेपमानंप्रकंप
मानं॥एतेनभयानुभावउक्तः॥स्वर्णाचलस्तत्त्वेनाध्यवसितंकुचमंडलंखिद्यति॥एतेनहर्षानुभावउक्तः॥अत्रकिंनिदानंकोहेतुरिति
कामयमानस्यतथाभूतांनायिकांप्रत्युक्तिः॥सतिसंभवेसर्वेषामपिसाकल्यंतथेतिवक्तुंमुख्यविवक्षयोदाहरणांतरमाह॥क्रोधावि
नाभावाद्गारतयाध्यवसितलोचनसमुद्भूताःसमुदयन्तकालाविर्भूतोयःसंत्रासोभयंसएवशैलस्तेनार्दितामध्येरुद्धाव्रीडाभिर्हे
र्षैर्व्यंग्यव्यंजकयोरैक्यारोपात्परिमर्दिताःस्पृष्टाःस्मितसुधाधाराभिरुद्वर्तिताःस्नेहरसैरभिलाषैःस्नातामनोभवकलामालाभिःकामो

पद्मंसुधांवर्षतिवेपमानंस्वर्णाचलःखिद्यतिकिंनिदानं॥यथावा॥क्रोधागारसमुत्थिताःसमुदयत्संत्रासशैलार्दिताव्रीडाभिः
परिमर्दिताःस्मितसुधाधाराभिरुद्वर्तिताः॥स्नाताःस्नेहरसैर्मनोभवकलामालाभिराभूषितायायासुमेयिशैलराजदुहि
तुःस्फीताःकटाक्षछटाः॥वार्तावेमुख्येसतिनिभृतभूयोदर्शनस्पृहामोट्टायितं॥अत्रविभावाःसपत्नीत्रासलज्जादयोनुभा
वामनःप्रेमसंकेतनिवेदनादयः॥यथानस्नेहस्यकथारसंकथमपिश्रोतुंसमुत्कंठतेराधाकिंतुविकीर्णरत्नकपटादागत्यसौधा

द्दीपनचतुररचनापरंपराभिर्गर्वातिशयाद्वाभूषिताःस्फीताःश्रमभराच्छैलराजदुहितुर्हिमालयसुतायाःपार्वत्याःकटाक्षछटाअपांगपत
लानिमिषियायासुःपत्यासुःपायासुरितिपाठेशुभावहानिभूयासुरितिकपटवटुवेषजिहासालरितरुद्रस्योक्तिः॥मोट्टायितंलसयति
॥वागादिव्यापारविषयकद्वेषवलेसतीत्यर्थः॥निभृतेति॥इतरापरिचितेत्यर्थः॥दर्शनेति॥दृग्व्यापारइत्यर्थः॥राधास्नेहस्यप्रेम्णःकथा
रसंरस्यमानांकथाशब्दस्वाभाव्यात्तुतात्पर्यविरुद्धविशेष्यविशेषणभावावगमःसख्यादिभिर्निवेदितामितस्ततःकथमपिसखीदासिष्ये

हुहिः॥

सत्यपिश्रोतुमाकर्णयितुंनसमुत्कंठतेनेकृति॥
एतेनद्वेषोत्रावेदितः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र·त· विकीर्णस्यगलितस्यरत्नस्यमुद्रादिखचितस्यकपदाद्याजात्॥एतेनसंगुप्तिःसूचिता॥सौधान्तरगृहात्बहिरेत्यनर्त्यंतीनेत्रपुटीयत्रस्फुरंती नौका
७० कुचघटीयत्रस्वेदेनोल्लसंतीलस्यास्वेदयुक्तेतियावद्दोस्तटीबाहुप्रांतोयत्रविशेषेणासमंताद्दूलंतीभ्रुकुटीयत्रस्खलंतीकटिपटीयत्र
कर्मणियथाभवतितथाकृत्सांतिकेपुनःकृत्स्नसमीपेतुभ्राम्यतिव्यावर्ततइत्यर्थः॥कुट्टमितंलक्षयति॥दुःखचेष्टाएतच्चेष्टयास्यदुःखाव
गमोस्त्वितीच्छेत्यर्थादांतरत्वमायाति॥इच्छाविशेषपरिचयायतुचेष्टारूपतेवाहस्योक्तेतिध्येयं॥एवमन्यत्रापियथानुभवमूह्यं॥वीटिका
मोचनेसुतनोःपाणीरोद्धुंप्रचलतिपरंतुचिराच्चिरकालमसौरोद्धुंप्रवृत्तांगुलिर्निश्चलानिरोधसमव्यापारशून्यापयोधरस्पर्शेभ्रूविक्षेपःसुत

नृत्यन्नेत्रपुटिस्फुरत्कुचघटिस्वेदोल्लसद्दोस्तटिव्यावल्लद्भ्रुकुटिस्खलत्पटिपुनःकृत्सांतिकेभ्राम्यति॥सुखेदुःखचेष्टाकुट्टमितं॥
अत्रविभावारागोत्कस्यदशनकरजक्षतकुंतलाधरग्रहादयः॥अनुभावाःकपटकायसंकोचकपटसीत्कारादयः॥यथा॥रोद्धुंपाणिः
प्रचलतिचिरादंगुलिर्निश्चलासोभ्रूविक्षेपोभवतिकुटिलोनेत्रमंतःप्रसन्नं॥गाढाश्लेषेभवतिसुतनोरर्द्धमात्रोनकारःकंपोमूर्ध्नः
प्रसरतिमुखंसंमुखंनप्रयाति॥गर्वाभिमानसंभूतोविकारोनादरात्माविब्बोकः॥अत्रविभावायौवनमदधनमदकुलमदप्रियापराधाद

नोरित्यत्राप्यनुषज्यतेभ्रून्यासःकुटिलोवक्रोभवतिनेत्रमंतःप्रसन्नमांतरसुखाभिव्यंजकप्रसादयुक्तंगाढाश्लेषेसुतनोर्नकारोर्द्धमात्रोलघुप्रय
त्नोजयतिविलक्षणोभवतिस्वाभाव्यादुदेतिनत्विच्छापूर्वकयत्नादित्याशयः॥जयतीतिस्थानेभवतीतिप्रक्रमानुरोधीपाठः॥तत्रनकारोभवति
यर्द्धलघुमात्रइतियोजनात्॥आमंत्रणेमूर्ध्नःकंपःप्रसरतिमुखंतुसंमुखंनप्रयातिसंमुखावलोकनेतुनायकोद्योगपूर्वमेवप्रतिषेधउदियात्सरा
ग्रमुखतायांतुफलितेतदुद्योगेजातिस्वाभाव्यायातोपिप्रतिषेधोऽकिंचित्करएवसंपद्यतइतीष्टसिद्धिरप्रत्यूहैवेत्यर्थः॥विब्बोकंलक्षयति॥अनादरात्मा रामः
७०

कातरो भयचकितो दृष्टिपातो यस्यैवंभूतः प्राणेश्वरः कृतांजलिर्बद्धकरपुटः सन्नस्याः पार्श्वं पृष्ठतः समीपं न तु संमुखं तदुपाजगाम एषा पुनरेषा तु सखीमुखे स्थितां कुंडलरत्नरेखां ताटंकरखचितवैडूर्यादिकांतिं प्रेक्षितुं द्रष्टुमाचकांक्षेत्यर्थः॥ ललितं लक्षयति॥ सकलांगानां समीचीनतया विन्यासः प्रसाधनमित्यर्थः॥ धन्यासि या कथयसि प्रियसंगमेपि विश्रब्धचाटुकशतानि रतांतरेषु॥ नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामीति रसकथापरासु सखीषु मध्ये रतिकालिकं स्वप्रियालापं कथयंतीं कांचित्प्रहसंत्याः कस्याश्चिदुक्तौ धन्यासीति सोल्लुंठवाक्यात्स्वीयमानस्य परोपहासलक्षणस्य स्मितस्याधिक्यमाशंक्य निराचष्टे॥ आदिना क्रियाविदग्धायाश्चेष्टावि

अनुभावा अवहित्थ्यदुर्वचनदुःप्रेक्षणादयः॥ यथा॥ कृतांजलिः कातरदृष्टिपातः प्राणेश्वरः पार्श्वमुपाजगाम॥ सखीमुखे कुंडलरत्नरेखामेषा पुनः प्रेक्षितुमाचकांक्ष॥ सकलांगसमीचीनविन्यासो ललितं॥ अत्रैव स्मितादयोंतर्भवंति॥ तत्र विभावाः॥ मनःप्रसादप्रियतमदृढानुरागधीरत्वादयः॥ अनुभावाः प्रियवशीकरणलोकानुरागचमत्कारादयः॥ यथा॥ कलक्वणितमेखलं चपलचारुनेत्रांचलं प्रसन्नमुखमंडलं श्रवणसंचरत्कुंडलं॥ स्फुरत्पुलकबंधुरं लपितशोभमानाधरं वि हस्य रतिमंदिरं व्रजति कस्य शातोदरी॥

शेषपरिग्रहः॥ शातोदरी कृशमध्या विहस्य तृणमिव स्त्रैणमवगणय्य कस्य महामहिमसुकृतस्य रतिमंदिरं क्रीडागृहं कलक्वणिता मधुरध्वनियुता मेखला कटिभूषणं यत्र चपलं चंचलमत एव चारु रमणीयं नेत्रांचलं पक्ष्म यत्र प्रसन्नमांतरसुखानुभावभूतप्रसादसहितं मुखमंडलं मंडलाकारं मुखं यत्र श्रवणयोः संचरती कुंडले ताटंके यत्र स्फुरंतः प्रकाशमानाः पुलकास्तदाद्याः परमसूक्ष्मा अपि विकारा यस्य तादृशं बंधुरं निम्नोन्नतं नाभिस्तनप्रधानमवयवचक्रं यत्र लपितेन भाषणेन शोभमानोधरो यत्र कर्मणि यथा भ॥

रतिं तथा व्रजति गच्छतीत्यर्थः॥ विहृतं लक्षयति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ अभिलाषस्यापरिपूर्त्तिर्विषयासंस्पर्शस्तथा चाभिलाषफलोपधायकसामग्रीकालीनस्वप्रयत्नसंघटिततादृशसामग्रीविघटनं विहतमि नौका
७१ तिफलितं॥ तन्नेदं बाध्यं॥ तादृशविघटनरूपफलोपधायकप्रयत्नो विहृतं विघटनं लज्जाभाव इति॥ व्याजात्परकीयस्य लज्जायाः स्व
कीयस्याभिलषितस्य विघटनमिति विशेषमभिप्रेत्याह॥ चंद्रचूडे शिवे तिलकं पत्ररचनां कपोले गल्लयोर्विधातुं कर्त्तुमभिलषति वांछति
सत्युदयन्त्यां तःकोपस्तद्वत्या॥ एतेन विलंबासहिष्णोरकांडकोपः कंपसहायकमाचरतीति दर्शितं॥ फणिपतेर्वलयीकृतमणिधराद्य
द्भयकूटं मिथ्याभूतं भयं तस्मादंगहस्तादिउत्कंपयंत्या उत्कृष्टकंपशालिन्या चरंत्या भवान्या प्रचलं कंपभाग्यद्वसनमंचलं तत्संभूतैर्वातैः केलिदी

प्रियसंनिधावप्यभिलाषापरिपूर्त्तिर्विहृतं॥ व्याजलज्जादयो विभावाः॥ अनुभावा अन्यथाचेष्टितान्यथाव्यवहारादयः॥ व्याजाद्य
था॥ अभिलषति कपोले चंद्रचूडे विधातुं तिलकमुदयदंतःकोपभाजा भवान्या॥ फणिपतिभयकूटादंगमुत्कंपयंत्या प्रचल
वसनवातैर्विघ्निताः केलिदीपाः॥ लज्जातो यथा॥ आनंदभाजोयदुनंदनस्य करावरोधनकरेण कुर्याः॥ सखीं लपंतीमिति सं
जघान चकोरनेत्रा चुलुकोदकेन॥ यूनोरन्यान्यमुदितानां पंचेंद्रियाणां संबंधाभावः॥

पाः क्रीडार्थं स्थापिता दीपा विघ्निता निर्वापिता इ
त्यर्थः॥ चकोरनेत्रा कोपकषायिता सीत्यर्थे शक्तिमूलध्वनेर्ध्वा॥ सखीं सहचरीं चुलुकोदकेन मुखसंमार्जनार्थमुपात्तेन संजघान निषिषेचेत्य टी॰
र्थः॥ कथंभूतां सखीमानंदभाज उत्कंठितस्य यदुनंदनस्य श्रीकृष्णस्य करावरोधं कंचुलिकादिनिर्मोकप्रवृत्तपाणिप्रतिबंधं करेण स्वीयेन टी॰
न कुर्याइत्येवंरूपं लपंतीं शिक्षयंतीमित्यर्थः॥ अत्र प्रियकथाशुश्रूषं तस्यैव कृया चिल्लज्जापारवश्याच्चुलुकोदकनिषेकेण प्रियकथारूपस्वेष्टस्यै राम॰
व विघटनं कृतमिति पूर्वस्माद्विशेषः॥ सपरिकरं संभोगं लक्षयित्वा विप्रलंभं लक्षयति॥ अन्योन्यमिति प्रमोदे संबंधाभावे चान्वेति॥ मुदितानां ७१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आंतररतिभावव्यभिचारिणोहर्षादेरनुभावैःसंयतानामित्यर्थः॥संबंधाभावइति॥रतिंविनाताद‍ृशाभावोतिप्रसक्तःकरुणइतिमुदितेत्यु
क्तं॥संभोगव्यावृत्तयेसंबंधाभावइति॥पंचेतितुरतिपरिपोषाभिप्रायं॥तथाचवियोगकालावच्छिन्नापरिपूर्णारतिर्विप्रलंभइतिफलितं॥
परिपोषाभावेतुशृंगारसामान्यलक्षणाभावान्नविप्रलंभोपीतिमंतव्यं॥ननुदोषदुष्टेंद्रियसंबंधकालेपिपरस्परंसाक्षात्काराभावेनविप्रयु
क्तत्वंसर्वमतसिद्धंतत्संपत्तयेचफलोपहितत्वंसंबंधविशेषणमावश्यकं॥ततोवरंस्वविषयसिद्ध्यनुपहितत्वमेवपरिपूर्णारतिवि
शेषणमित्यभिप्रेत्यलक्षणांतरमाह॥इच्छाविषयासंबंधइच्छैयेवार्थाल्लभ्यतइतिभवदुक्तमेवलक्षणपर्यवसितमितिभावः॥ष्कुल

अभीष्टाप्राप्तिर्वाविप्रलंभः॥नचमानात्मकेविप्रलंभेव्याप्तिरितिवाच्यं॥मुदितपंचेंद्रियसंबंधाभावरूपस्यविशिष्टाभावस्यत
त्रापिसत्वात्॥तदानींयूनोरिंद्रियाणांमुदितत्वाभावात्॥ननुयाप्रियमभिसरतिसाविप्रयुक्ताभवेदितिचेत्॥सत्यं॥साविप्रयु
क्तैव॥अचिरदर्शनप्रत्याशानुवृत्तप्रमोदेनविरहधर्मस्याश्रुपातादेरसंभवइति॥ तोमुदितपदव्यावृत्तिंदर्शयितुंशंकते॥समाधत्ते

नन्विंद्रियसंबंधरूपप्रतियोगिमतिक्रम्यतदभावोऽभावप्रतियोगिनोःपरस्परंविरोधादित्याशंक्याह॥तथाचनकेवलंप्रतियोगिनासहाभाव
स्यविरोधः॥किंतुप्रतियोगितावच्छेदकावच्छिन्नेनैवेत्याशयः॥यत्तुविशेष्यस्याप्रतियोगित्वमुत्पादनायविशेष्यवतिविशिष्टाभावस्यविशे
षणाभावस्वरूपताभिप्रायवर्णनं॥तत्तुच्छं॥मुदितत्वाभावस्यविशिष्टाभावेहेतूपदर्शनविरोधात्॥नन्वभिसारिकानविप्रयुक्ताविप्रलंभकार्यै
स्याश्रुपातादेरभावात्तथाचतत्रातिव्याप्तिरित्याशंकते॥समाधत्ते॥एवकारेणमुदितत्वमात्रोपादानेतत्रातिव्याप्तिरिंद्रियसंबंधाभावोपादा
ने॥अस्तिह्यस्याचित्तासंगइतितद्वारणमितिमतमयुक्तमसंभवापत्तेरितिसूचितं॥नन्वेवंकुतोनाश्रुपातादिस्तस्याइत्यतआह॥विशेषानुप

र०न विशेषानुपलंभेपिकारणवैचित्र्यमात्रेणविभिन्नभेदत्वेऽन्येपिबहवोभेदाःसंभवंतीतिवक्तुमुपक्रमते॥देशांतरगमनंनस्वरूपसदेव वि नौका
९२ प्रलंभहेतुःकिंतुतज्ज्ञानसामान्यंतथाचदेशांतरगमनाभावेपितज्ज्ञानहेतुकंविप्रलंभमुदाहरति॥प्रियतमेनायकेप्रस्थानायप्रस्था
नंकर्तुंकृतोद्यमेआरब्धोद्योगेसतिवामभ्रुवोनायिकायाःदोःकंकणेन॥यद्यपिकंकणंकरभूषणमितिकोशाद्दोःपदानर्थक्यंप्रतिभाति
तथापिहृष्ट्यविशेषणवाचकपदसमभिव्याहारेविशिष्टवाचकंपदंविशेष्यमात्रमभिधत्तइतिकाव्यविदांसमयात्कंकणपदंभूषणमा
त्रपरंद्रष्टव्यं॥च्युतंगलितंधैर्येणस्खलितंत्वरापसरणान्मदेनगलितंनेत्रांभसानिःसृतंस्थानोपप्लवशंकयापियियासुनागंतुमिच्छुनाजीवे

सचविप्रलंभःपंचधा॥देशांतरगमनात्॥गुरुनिदेशात्॥अभिलाषात्॥ईर्ष्यायाः॥शापाच्चेति॥समयाहैवाद्धिङ्वरादित्यादयो
ज्ञेयाः॥देशांतरगमनाद्यथा॥प्रस्थानायकृतोद्यमेप्रियतमेदोःकंकणेनच्युतंधैर्येणस्खलितंमदेनगलितंनेत्रांभसानिः
सृतं॥जीवेनापियियासुनाशिवशिवप्रारंभिवामभ्रुवःकंपांदोलितकिंकिणीकलरवव्याजेनवैण्यस्मृतिः॥यथावातातच
रणानां॥वीणामंकेकथमपिसखीप्रार्थनाभिर्निधायस्वैरंस्वैरंसरसिजदृशागातुमारब्धमेव॥ नायिकंपेत्यादिकंपेनासमंतादोलि

ताश्चालितायाःकिंकिण्यःक्षुद्रघंटिकास्तासांयःकलरवोव्यक्तमधुरध्वनिस्तद्व्याजेनवैण्यस्मृतिःप्रस्थानेवैण्यस्मृतेर्मांगलिकत्वयोक्तत्वात्
द्यथा॥वैण्यंदृष्टुंहेहयमज्ज्ञेनंचशाकुंतलेयंभरतंनलंच॥रामंचयोवैस्मरतिप्रयाणेतस्यार्थसिद्धिःपुनरागमश्चेति॥शिवशिवेतिनिर्वेदे॥प्रारंभि
सार्थदासिण्याद्गंतुमावश्यकत्वेपिपुनरागमनेच्छयैवंविधंमंगलमाचीर्णमित्यर्थः॥स्वरूपसद्देशांतरगमनहेतुकमपिविप्रलंभमुदाहरति॥स रामः
रसिजदृशाजलाविनाभूतलोचनयाकयाचिन्नायिकयासखीप्रार्थनाभिःप्रियसखीविज्ञापनाभिःकथमपिबलात्कारेणवीणामंकेनिधायस्वैरंस्वैर ९२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मभिनिविष्टस्त्वाकुंठेन गातुमारब्धमेव मूर्छनामूर्छां किमप्यलं तं विरहे णाक्षीणा तएव दीना तुकं प्यांगवल्लीयस्यास्ता मेनामेव तंत्रीबुध्या वीणाभ्रमेण बहुशोधिकं स्पृशति विप्रलंभोद्दीपनादेतच्चित्रं मूर्छनापदार्थस्य शब्दधर्मस्य वीणायामेवाभिव्यक्तेरुचितत्वादित्यर्थः॥ हे नाथ गुरोः पित्रादेस्त्वया निर्यातोसि परं त्वमीक्रूरा ग्रहादुष्टग्रहकार्यकारिणः कथं त्वया न विचारिताः कमनर्थमुत्पादयिष्यंतीति गणकं प्रति पृष्टाः॥ अमी के तानाह॥ चूततरुराम्रो भास्वान्नवपल्लवैर्दीप्तिमान्सूर्यश्च॥ मनसिजः कामो गुरुर्महान्बृहस्पतिश्च॥ कोप्यनिर्वचनीयप्रभाव एष पुरोवर्ती भृंगस्तमभ्राध्यसंपादकत्वाद्राहुश्च॥ गंधवहो वायुर्मंद एतेनोद्दीपकता वेदिता शनिश्च॥ मलयजश्चंदनं सितो जात्या शुद्धः शुक्रश्च॥ माधवो वसंतो दोषाणां

तंत्रीबुद्ध्या किमपि विरहक्षीणदीनांगवल्ली मेनामेव स्पृशति बहुशो मूर्छना चित्रमेतत्॥ गुरुनिदेशाद्यथा॥ भास्वांश्चूततरुर्गुरुर्मनसिजः कोप्येष भृंगस्तमो मंदो गंधवहः सितो मलयजो दोषाकरो माधवः॥ अंगारो नवपल्लवः परभृतो विज्ञो गुरोराज्ञयानिर्यातोसि विचारिताः कथममी क्रूरास्त्वया न ग्रहाः॥ अभिलाषाद्यथा॥ आगाराभिमुखं मुखं रचयतोर्वक्रीकृतग्रीवयोर्यत्स्तं चोलमजानतोः क्वचिदपि व्याजासु नस्तिष्ठतोः॥

परपीडनादिरूपाणामाकरः स्थानं चंद्रश्च॥ नवपल्लवोंगारो दाहकत्वान्मंगलश्च॥ परभृतः कोकिलो विज्ञो विशेषाभिज्ञः स्वरूपतो रुतुदस्य कुहितिभणितस्य विरहिजनसंतापकारि चंद्रावसानपर्यवसायितयाभिलषितस्यामावास्यादिरूपार्थस्य प्रतिपादनमुखेनेष्टचिंतकत्वस्य स्वस्मिन्प्रख्यापनाद्बुधश्चेत्यर्थः॥ क्वचिदेव देवायतनादौ प्रवृत्तयोः सूरागयोः संमर्दवशादचिरं विश्लिष्टयोर्द्वारभेदेन बहिर्निःसृतयोरन्योन्यमार्गावलोकनासक्तयोः कयोश्चिन्नायकयोर्मनोरथवर्णनमिदं॥ अग्रेगमनाशंकया पुरो गच्छतोरप्यंतरा देवायतन एव समुदयसंभावनयागाराभिमुखं मुखं वदनं रचयतोरत एव वक्रीकृतग्रीवयोस्तेनैव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰ल॰ व्यस्तंव्यस्तस्ततयापिधेयापिधानास्त्रंसंचोलसंगावरणवस्त्रमजानतोः क्वचिदस्थानेपिव्याजात्पुनर्निमिषेणेवतिष्ठतोर्मार्गंगंतव्यमध्वानंवि नौका
७३ स्मरतोः क्वचित्क्वचिदपियत्रकुत्रापिविषयेस्यक्ताक्षरंलुप्तवर्णंजल्पतोरावयोर्यत्साचिवक्रंप्रेक्षितंमध्येमार्गेदैवसंघटितंप्रेमभरपूरितंच
सुषानिभृतपरस्परावेक्षणमभवत्तद्भूयःपुनरपिवयमाशास्महे आवामाशास्वहे इत्यर्थः॥ यथाहंत्वयितथात्वंमयीतिप्रकाशास्ति किंविलंब
सेइतिद्वयोरप्याशयस्यप्रतिपादयितुंयुक्तत्वात् अस्मदोद्वयोश्चेत्यनेनद्वित्वविवक्षायामप्यस्मदोबहुवचनानुशासनात्॥ यद्यप्येकत्व
विवक्षासाधारणमेवतदनुशासनंतथापिरसाभासापत्यानेकत्वमपिप्रकृतेविवक्षामर्हतीतिध्येयं॥ अभिनवचक्षूरागस्यजनयान्नाप्रसंगए
वसग्रुस्यत्तेर्वर्णनस्यकविकुलक्षुण्णत्वादन्यादृशव्याख्यानेत्वागाराभिमुखंसमुखंरचयतोरित्यस्यक्वचिदपिव्याजात्पुनस्तिष्ठतोरित्यस्यचसामंज

मार्गेविस्मरतोःक्वचित्क्वचिदपित्यक्ताक्षरंजल्पतोःसाचिप्रेक्षितमावयोर्यदभवद्भूयस्तदाशास्महे॥ ईर्ष्यातोयथा॥ प्राणेशस्य
प्रभवतिमनःप्रेमहेमप्रसूनंचेतश्चूतंदृगपिकमलंजीवनंबंधुजीवं॥ आशासूत्रेग्रथितमखिलंवेधसातस्यभंगेस्यादेतेषाम
पिनिपतनंचंडिमानंविमुंच॥ शापाद्वेष्या॥ अन्यत्रयदिनिर्गंतुमिच्छानिर्गच्छदूरतः॥

स्याभावादिति॥ हे चंड्यत्यंतकोपनेमानमाग्रहं
विमुंचेतिसख्याउक्तिर्वेधसाब्रह्मणाखिलंसर्वमेतदाशासूत्रेप्रभवतिसमर्थेग्रथितंप्रोतमस्याशानियतसत्ताकंभवतीतिभावः॥ तदेवा
हतस्येति॥ तस्याशासूत्रस्यभंगेनाशेसत्येतेषामपिनिपतनंनिपातःस्यात्॥ एतत्किंतदाह॥ प्राणेशस्येति॥ पार्यंतिकप्रेमालंबनस्यमनःप्रे
मांतरस्नेहोहेमप्रसूनंस्वर्णपुष्पमत्यंतसंरक्षणीयत्वाच्चेतोंतःकरणंचूतमाम्रपुष्पंप्रियागंध्यनेकविधमनोरथशालित्वात्॥ दृगपिकमलंपा रामः
थःपूरनिमग्नत्वाज्जीवनंबंधुजीवमस्थिरप्रसादत्वादित्यर्थः॥ निर्गंतुंपुनर्बहिर्यातुंजीवितुमितियावत्॥ इच्छा॥ यदीति॥ अस्तितर्हीतिशेषः॥ ७३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दूरतोनायिकामदृष्ट्वैव निर्गच्छ परावर्तस्व॥ अन्यत्र॥ पक्षांतरे प्रियां प्रत्यभिसरणइतियावत्॥ प्रियेति॥ प्रियायायो विरहस्त्वदीयविश्लेष स्तेन जातोयस्तापः प्रज्वलनंतेन॥ अस्माकं प्रतापनमात्रस्य मोपितस्यास्तापस्त्वन्मुखावलोकनमात्रेणैधः प्रवर्द्धितस्तां प्रदग्धुस्समतइत्या शयः॥ शापदग्धः शापेनेवदग्धोभस्मसाद्भविष्यसितथासंभाव्यसे प्रियासंभोगेयथामहापुरुषशापेनभस्मीभूतमात्मानंसंभावयसितथा हमपिप्रियानैकट्यमात्रेणशापमूलत्वदीयविरहानलेनतथाभूतंत्वांसंभावयामीत्यर्थः॥ एतेनयद्यपिविरहपदबोधितेप्रकृतनायिका विरहेशापहेतुकत्वाभावेपिशापसंभावनासंभावितेन्यनायिकाविरहेतथात्वमविकलमितिभवत्येवोदाहरणं॥ नथाप्यन्यत्रेत्यादिनावि भावतावच्छेदकरूपेणविभावस्याप्रतिपादनेनवियोगस्यभविष्यसीत्यनेनसंभाव्यमानहेतुकत्वप्रतिपादनेनचबुद्ध्यनारोहादतएवचास्य

प्रियाविरहतापेनशापदग्धोभविष्यसि॥ समयाद्यया॥ विश्लेषजीवनव्रीडापीडाविधुरमानसा॥ तस्यै प्रातः प्रियंप्रेक्ष्यचक्रीव क्रीकृतानना॥

नुभावादेरासेपस्याप्यसंभवाच्चानुदाहरणत्वमाशंकमानाः पराम्ताः॥ वियोगेपिजीवनसंभूतव्रीडाजनितपीडयावि धुरमधीरंमानसंयस्याः साविश्लेषजीवनाभ्यांव्रीडापीडाभ्यामितिव्याख्यानंतुविश्लेषपीडायावक्रीकृतेत्यस्याननुगुणत्वादुपेक्ष्यं॥ त्व याविनानजीवामीतिप्रतिज्ञातवतीकाचित्कामिनीप्रियंविधावश्युदितेसमागमिष्यामीतिदत्तसंकेतं॥ प्रातः॥ चंद्रोदयएवद्रुतंधावित या॥ यामिविधावभ्युदितेपुनरेष्यामीतियदुदितंभवता॥ जानासुदंतमात्रंनेदंतत्त्वेनजानानीत्यादिवाक्येनपरावर्तितंप्रातरागतं॥ एतेन संकेतवैफल्यमुक्तं॥ प्रेक्ष्यविफलितसंकेतंमत्वाचक्रीवक्रीकृताननेत्येकंपदं॥ चक्रीवचक्रवाकीव॥ एतेनयथाचक्रवाकीकपंजरेबलात्सं घटितंप्रियंप्रातःप्रेक्ष्यमुखमात्रंवक्रीकृत्यतिष्ठतितथेत्यर्थः सूचितः॥ वक्रीकृतमवक्रंवक्रंसंपद्यतेतथाकृतमाननंयपातथाभूतातस्यै।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ एतेनसमयात्कालविशेषादित्यर्थयित्वाचक्रवाकीवृत्तांताभिप्रायेणोदाहरणंमन्यमानानांतिर्यग्विरहवर्णनानौचित्यात्मामनस्तापोवि नौका
७४ लीयतइतिमंतव्यं॥जीवनेसतिविश्लेषोविश्लेषेचसतिजीवनमप्यनयोर्द्वयोर्यूनांमध्येहमेवनत्वन्यन्निदर्शनमुदाहरणमितिरामस्यो
क्तिः॥यूनांदार्ष्टांतिकभूतानामितित्वत्युत्पन्नप्रलापितमनादेयं॥तथासतिबहुवचनप्रतिपादितबहुत्वान्वययोग्यानांबहूनांविवक्षि
तत्वात्पूर्वपूर्वेषामुत्तरोत्तरोदाहरणत्वप्रतीत्याहमेवेत्यवधारणासंगतेः॥इतरासाधारण्यप्रतिपिपादयिषाविरोधाद्दुलः सूर्यश्चंद्रः शी
तइतिवदप्रष्टार्थत्वापत्तेश्च॥लंकानगरेकेलीगृहेवागृहैकदेशेवामणिमंदिरेवागृहस्यसर्वभागेवाप्रज्वालितोहुताशोग्निःशशामकि

दैवाद्यथा॥जीवनेसतिविश्लेषोविश्लेषेसतिजीवनं॥द्वयोरप्यनयोर्यूनामहमेवनिदर्शनं॥विद्वुराद्यथा॥केलीगृहेवामणि
मंदिरेवाशशामलंकानगरेहुताशः॥इतस्ततःप्रस्थितयोर्नयूनोर्वियोगजन्माविरामवन्हिः॥इतिरसनिरूपणोषष्ठस्तरंगः॥
हासस्यपरिपोषोहास्यः॥वर्णोस्यशुक्लः॥दैवतंप्रमथः॥सचद्विविधः॥स्वनिष्ठःपरनिष्ठश्चेति॥ यन्नाचित्कालेनशांतोबभूवेतस्ततो

यथानिर्गमंप्रस्थितयोःपलायितयोर्यूनोःपुमान्स्त्रियेत्येकशेषः॥वियोगजन्माविरहोद्दीपितोवन्हिर्वन्हिस्तुनविरामभयातिपातेनचिराद
प्यपरावर्तनादितिभावः॥ इतिश्रीजडरूपनामकगंगारामविरचितायांनौकाख्यायांरसतरंगिणीव्याख्यायांषष्ठस्तरंगः॥ ॥हास्यंलक्षयति
॥अस्यवर्णंदर्शयति॥दैवतंदर्शयति॥एवमग्रेपि॥तंविभजते॥स्वनिष्ठइति॥स्वसमानाधिकरणविभावज्ञानमात्रापेक्षइत्यर्थः॥व्यधिकरण
स्यापिविभावस्यज्ञानंसमानाधिकरणमेवेतिनकोपिदोषः॥परनिष्ठेतिप्रसंगवारणायमात्रेति॥अतएवनशृंगारद्वैविध्यसंभवइतिबोध्यं॥तदुक्तं रामः
॥आत्मस्थोद्भूतरूपत्वात्कोविभावेक्षणमात्रइति॥परनिष्ठइति॥अनुभावपर्यंतज्ञानद्वारास्वव्यधिकरणविभावज्ञानसापेक्षस्वसमानाधिकरण ७४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वनिष्ठेतिप्रसंगवारणायसापेक्षांतं॥अतएवनरौद्रद्वैविध्यसंभवइतिबोध्यं॥तदुक्तं॥हसंतमपरंदृष्ट्वाविभावंचोपजायते॥योसौहास्य
रसस्तज्ज्ञैःपरस्थःपरिकीर्तितइति॥तावपिस्वनिष्ठपरनिष्ठावपि॥इतीति॥मिलित्वेतिशेषः॥एवमग्रेपि॥उत्तमानांस्वनिष्ठःपरनिष्ठश्च
हास्यःस्मितहसितभेदेनद्विविधः॥एवंमध्यमानांस्वनिष्ठःपरनिष्ठश्चहास्योविहसितोपहसितभेदेनद्विविधः॥एवमधमानांस्वनिष्ठःपर
निष्ठश्चहास्योपहसितातिहसितभेदेनद्विविधइतिद्वादशविधोहास्यइतिवक्तुमुपक्रमते॥अत्रद्वावप्यपिशब्दौपरस्परनिरपेक्षत्वलक्षणं

तावप्युत्तममध्यमाधमभेदात्त्रिधेतिषड्विधः॥स्वनिष्ठोपिषड्विधःपरनिष्ठोपिषड्विधइतिद्वादशविधोहास्यः॥तथाहि॥उत्त
मानांस्वनिष्ठेपरनिष्ठेचस्मितहसिते॥मध्यमानांस्वनिष्ठेपरनिष्ठेचविहसितोपहसिते॥अधमानांस्वनिष्ठेपरनिष्ठेचाप
हसितातिहसिते॥उत्तमानामीषद्विकसितकपोलमव्यक्तदशनमपांगसुष्ठुवीक्षणंस्मितं॥उत्फुल्लकपोलंकिंचिल्लक्षित
दशनंहसितं॥मध्यमानांसमयोचितमुत्तमस्वनमाकुंचितमुखमाविर्भूतवदनरागंविहसितं॥उत्फुल्लनासापुटंकुटिलवी
क्षितंकुंचितग्रीवंस्फुटस्वनमुपहसितं॥अधमानामुद्धतमुद्यदश्रुकंपितमौलिस्फुटतरस्वनमपहसितं॥ प्राधान्यंसूचयतस्तदे

वोपपादयति॥स्मितंलक्षयति॥तदुक्तं॥ईषत्फुल्लकपोलाभ्यांकटाक्षैरप्यनुल्बणैः॥अदृश्यदशनोहास्योमधुरःस्मितमुच्यतइति॥हसितं
लक्षयति॥तदुक्तं॥वक्त्रनेत्रकपोलैश्चेदुत्फुल्लैरुपलक्षितः॥किंचिल्लक्षितदंतश्चहास्योहसितमिष्यतइति॥विहसितंलक्षयति॥तदुक्तं॥
सशब्दंमधुरंकालगतंवदनरागकृत्॥आकुंचिताक्षिवदनंविदुर्विहसितंबुधाइति॥उपहसितंलक्षयति॥तदुक्तं॥निकुंचितांसशीर्षश्चजिह्मदृष्टि
विलोकनः॥उत्फुल्लनासिकोहास्योनाम्नोपहसितंमतइति॥अपहसितंलक्षयति॥तदुक्तं॥अस्थानजःसाश्रुदृष्टिराकंपस्कंधमूर्धजः॥शार्ङ्गदेवेनगदि

वोहास्योपहसिताख्यइति॥अतिहसितंलक्षयति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ तदुक्तं॥स्थूलकर्णकटुध्मानोवाप्यपूरस्तुतेक्षणः॥क्रोधपगूढपार्श्वेश्चहासोतिहसितंमतइति॥पद्मभूर्ब्रह्मालेखनीमितइतउभयोरपिपार्श्वयो नौका
७५ र्विलोकयन्कुत्रकुत्रनजगामकिंकिंनददर्शश्रवणसीम्निलंभितामवतंसीकृतांतांपुनःप्राप्यसन्नतमुखंसन्नतंकपोलविकासप्रतिबंधकचेष्टाव
दाननंयस्यतथा॥सन्नतमुखइतिप्रथमांतपाठेत्वध्याहृतपूर्वक्रियाकर्तृविशेषणसमर्पकमेतत्स्मितंदधावित्यर्थः॥अत्रलंजकतावच्छेदक
वैजात्यान्युद्भिरंत्यपिस्मितादिपदानिनव्यंग्यतावच्छेदकानिवमंति॥तथातथाविधलेखनीब्रह्मगतहास्यालंबनंनचासौसाश्रयइत्युदाहर
णसंगतिः॥सोयंवैलवंव्योमगतंएख्युद्धारेनिभिद्येनागगनतलदृश्यंरदाग्रंव्योमांकुरमुदीक्ष्यतथासंभाव्यविलोर्यद्धास्यमुग्रद्युस्यप्रतिब

अत्युद्धतंबहलाश्रुस्फुटतमस्वनमाश्लिष्टपार्श्वेजनमारभ्यकुरतालमतिहसितं॥स्वनिष्ठंस्मितंयथा॥लेखनीमितइतोविलो
कयन्कुत्रकुत्रनजगामपद्मभूः॥तांपुनःश्रवणसीम्निलंभितांप्राप्यसन्नतमुखःस्मितंदधौ॥स्वनिष्ठंहसितंयथा॥व्योमांकुरं
व्योमगतंरदाग्रमुग्रद्युतिस्वीयमुदीक्ष्यविस्मोः॥यदासहास्यंकिमुतस्यबोधावद्यापिफेनस्तवकायमानं॥परनिष्ठंस्मितंहसितंच
यथा॥हरवृषभमुखेसखेलमायोजयतिसुवर्णसवर्णकांतिपर्णं॥दृशिभुजगपतेःशिशुःषडास्यःकलयतिकज्जलमंतिकेभवा

द्वृदृशनव्यक्त्यासतस्ययोधौसीरार्णवेद्यापीदानीमपिफेनस्तवकायमानंपुंजीभूतफेनरूपतयापरिदृश्यमानंकिम्वित्यर्थः॥एकोस्त्वेवपरनिष्ठ
मेतद्वेदद्वयमुदाहरति॥षडास्यःशिशुःस्वामिकार्तिकोहरवृषभमुखेनंद्यास्येसुवर्णेत्यादिसुवर्णेनसवर्णासमानवर्णाकांतिर्यस्यतत्पर्णंभवा
न्याअंतिकेसमक्षंसखेलंसकौतुकंयथास्यात्तथायोजयस्युपनयति॥भुजगपतेःशेषस्यदृशिकज्जलंकलयत्यत्रापिसखेलमित्यनुषज्जते॥ते रामः
नतत्क्षणलक्षितत्वावगमः॥दत्तइत्यर्थः॥अत्रपर्णव्यापारेणहसंतंषडास्यंदृष्ट्वाभवान्याःस्मितमभूदंजनव्यापारेणहसंतंतंदृष्ट्वातुतस्याःस्मि ७५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परनिष्ठोदाहरणेनैवस्वनिष्ठउदाहृतोभवतिस्वाश्रयालंबनत्वस्यतल्लक्षणत्वादित्याशयेनतमेवभेदमुदाहरति॥तरुण्योनिशासुतैलस्य
धियागृहीतैर्मशीजलैर्लिप्तमुखारविंदंगोपंप्रभातेस्खलदश्रुनीरंनिष्पतद्बाष्पजलमधीरंनादंप्रव्यक्तकंठध्वनिंचयथाभवतितथाजहसुर्हे
सितवत्यइत्यर्थः॥अत्रबहुवचनात्परनिष्ठता॥मयायआग्रहआरब्धइतितात्पर्यकंपद्यंयोनिरोधइतिपदघटितंवाक्यंपठन्बुधोयोनेरोधइ
तिजुगुप्सितार्थप्रतिपादकंमलाशंबदित्यादिनिरंतरश्वासभरोच्छूननासापुटेनतटस्थेनतेनाप्युपहस्यतइत्यर्थः॥वारवधूर्वेश्यारतो
त्सवेकेलिवेलायांकंठावलग्नंवल्लभयज्ञसूत्रमुपवीतं॥अत्रचालंबनोद्दीपनाश्रयाणांत्रयाणामपिप्रतीतिरितिविशेषंध्वनयितुंक्रि

5 परनिष्ठंविहसितंयथा॥निशासुतैलस्यधियागृहीतैर्मशीजलैर्लिप्तमुखारविंदं॥गोपंप्रभातेस्खलदश्रुनीरमधीरनादंजह
सुस्तरुण्यः॥परनिष्ठमुपहसितंयथा॥योनिरोधोमयारब्धइतिपद्यंपठन्बुधः॥श्वासदुत्फुल्लनासेनतटस्थेनोपहस्यते॥पर
निष्ठमपहसितंयथा॥रतोत्सवेवल्लभयज्ञसूत्रंकंठावलग्नंपरिमोचयंती॥द्विजांगनादीर्घतरंश्वसंतीतारस्वनंवारवधूर्जहा
स॥परनिष्ठमतिहसितंयथा॥चोरःकामरिपोर्गृहेनिशिगतःशूलंकपालंहरन्बीजंधूर्तफलस्यतंडुलधियानीत्वापुनर्भुक्तवान्॥
आवल्गन्प्रचलन्स्खलन्परिपतन्मुह्यन्विघूर्णन्हसन्नट्टाट्टध्वनिमुक्तमौलिकुसुमंसर्वैश्चयाहस्यते॥ यांविशिनष्टि॥दीर्घतरमिति॥श्व
संतींहसंतीमितियावत्परिमोचयंतींकांचिद्द्विजांगनांब्राह्मणवधूंदृष्ट्वेतिशेषस्तारस्वनमुच्चैर्घोषंयथातथाजहासहसतिस्मेत्यर्थः॥सर्वैश्चया
स्मरोभिर्निशिकामरिपोःशिवस्यगृहंगतःशूलंकपालंचहरन्धूर्तफलस्यधत्तूरस्यबीजंतंडुलधियानीत्वापुनस्तथैवभुक्तवान्॥अतएवव्यावल्गन्नु
च्छलितःसन्प्रचलन्धावन्स्खलन्नुद्धूचरणःसन्परिपतंल्लुठन्मुह्यन्विस्मृतारंभःसन्विघूर्णन्विचित्तोभवन्हसन्निरालंबहासंकुर्वन्नट्टोरोट्टाट्टध्वनिनि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ मुक्तकंठंमुक्तमौलिकुसुमंनिपतच्छिरोगुंफितपृथ्वंच यथास्यात्तथाहस्तेहासासदीक्षियतइत्यर्थः॥अत्रलेकत्वाविवक्षयाप्राग्वदेवदृष्टृ नौका
७६ रूपास्येपाद्युत्तरवदेववापरनिष्ठत्वमवगंतव्यं॥करुणलक्षयति॥परिपोषोभग्नावरणचिदेशिष्टंतत्रविनिगमनाविरहाच्छोकावच्छिन्न
भग्नावरणचिदपिकरुणत्वे शोकासाधारणकार्यीभूतसर्वेंद्रियक्षमस्याप्यवच्छेदकत्वंविनिगमकाभावेनानीयमानमनिवार्यमित्यनंतरःक्र
रणवृत्तेरपितथात्वमभिधत्ते॥अतएवक्लेशाद्याकारोत्रास्वरसूचकः॥एतदभिप्रायेणैवचासादुत्तरलक्षणेविप्रलंभातिप्रसंगमपसार्य
प्रथमलक्षणप्रविष्टशोकपदमनंतरंव्याख्यातं॥एवमेवचोत्तरत्रापिवैकल्पिकपक्षांतरसमुपन्यासोव्याख्येयः॥तंविभजते॥अत्रबंधनाद्यु

शोकस्यपरिपोषःकरुणः॥आशाविच्छेदेसतिसर्वेंद्रियक्षोभोवा॥नचविप्रलंभेतिव्याप्तिः॥तत्रेष्टाशायाःसत्वात्॥तद्विच्छेदेतुस
विप्रलंभःकरुणएव॥शोकोदुःखं॥वर्णोस्यकपोतचिह्नितः॥दैवतंवरुणः॥सचस्वनिष्ठःपरनिष्ठश्च॥स्वशापबंधनक्लेशानि
ष्टैर्विभावैःस्वनिष्ठः॥परेष्टनाशशापबंधनक्लेशादीनांदर्शनस्मरणैर्विभावैःपरनिष्ठः॥स्वनिष्ठोयथा॥तवनाथशरःशरासनंतव
देहेनसहैवभस्मसात्॥अहमस्मिततःप्रतीयतेतवनास्मीतिकिमुच्यतामितः॥

पाधीनांशोकविभावत्वेस्वसमानाश्रयालंबनत्वंस्वनि
ष्ठत्वंस्वव्यधिकरणालंबनत्वंचपरनिष्ठत्वं॥बंधनकर्मीभूतवाद्युपधेयानांतथात्वमितिसिद्धांतेतुस्वाश्रयालंबनत्वंस्वाश्रयान्यालंबनत्वंचपरनिष्ठ
त्वंवाच्यं॥नचैवंबंधनाद्युसनादितिभरताचार्योक्तिविरुद्धतइतिवाच्यं॥बध्यमानस्यापिबंधनंविनानकरुणविभावत्वमित्यर्थेध्वननायैवत्त
शोक्तेरेवंसर्वत्रविभावेरीतिरनुसर्तव्यातदुक्तंमम्मटभट्टैः॥व्याघ्रादयोविभावाइतीत्यभिप्रेत्याह॥हेनाथतववास्तविकत्वंसंबंधभाक्शरः रामः
शरासनंवातवदेहेनसहैवयौगपद्यायोगव्यवच्छेदएवकारार्थः॥भस्मसाद्भस्मीभूतमभूत्॥अहमस्मिनतुभस्मीभूतानतोभस्मीभावाभावा ७६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वनाखिलत्वदीयसंबंधभाङ्भवामीति प्रतीयते आक्षिप्यते इत एवंविधनिश्चयानंतरं किमुच्यतां मां विहाय कथं परलोकपथिको भूरिति
किं वक्तव्यमित्यर्थः॥ वनमालस्यानुयांतं बाष्पवारि त्यजंतं मृदितेत्यादि म्लानसरोजमालाकृशांगं ममालोच्य दिनमपि श्वेतनसंताप
कैमुत्यमाह॥ रवीति सौरप्रचंडातपलक्षणं तापमार्तिज्वरमंतमध्येन्हइत्यर्थात्प्रसूते प्रकटयति वस्तुतस्त्वंतः पदसमभिव्याहृततापप
दमेव ज्वररूपकपरमित्यलं क्लिष्टकल्पनया॥ रजनिरपि च तारकेति तारकालक्षणान्बाष्पबिंदून्धत्ते पुष्णातीत्यर्थः॥ रौद्रं लक्षयति॥ प्रागुक्त
युक्त्यालक्षणांतरमाह॥ व्याख्यातत्वमेतत्॥ ननु देवतयाभेदाध्यवसायात्तदीयवर्णे नरसेवर्णाध्यवसायइति प्रागुक्तं रुद्रस्य चक्रपूर्धव

परनिष्ठो यथा॥ अनुवनमनुयांतं बाष्पवारि त्यजंतं मृदितकमलदामक्षाममालोच्य रामं॥ दिनमपि रविरोचिस्तापमंतः प्रसूते
रजनिरपि च धत्ते तारका बाष्पबिंदून्॥ परिपूर्णः क्रोधो रौद्रः॥ सर्वेंद्रियाणां मोहसंवा॥ वर्णोस्य रक्तो दैवतं रुद्रः॥ यथा॥ चंडां
शुः किं न चक्रं भुजगपतिरसौ वर्तते नैव नपाशः कुंताः किं दंति दंता न च गिरिरशनिः किं न शस्त्रैः किमन्यैः॥ लोवर्णः स्मर्यते तत्कथं

रौद्रस्य रक्तो वर्ण इति चेत्सत्यं॥ यादृशांतःकरणवृत्तिकाले यो देवतायाः वर्णोनुभूयते तेन वर्णेन रसस्य वर्णवत्ताध्यवसीयते तथा च क्रोधाविष्ट
स्य रुद्रस्यापि वर्णो रक्तो भवतीति सकलानुभवसंवादिप्रमाणमूलककल्पनाया अपि प्रामाण्यात्॥ स्मर्यते च कोपेन चास्या वदनं मषीवर्णमभूत्त
देति क्रोधसमावेशो वदनलौहित्यं देवताया अपि मषीपुंजेति भाषितेति नानुपपत्तिगंधोपि॥ चंडांशुः सूर्यश्चक्रं किं नेत्येवं रूपया काकेदमेव सु
लभं चक्रमिति विपरीतार्थो गम्यते एवमग्रेपि॥ असौ धराधारो भुजगपतिः शेषः पाशो वा न वर्तते दंतिदंताः कुंताश्च कुंतायुधानि न गिरिरशनिः
किं नान्यैरेतद्व्यतिरिक्तैः शस्त्रैः किमलमहं भीमो नन्यसाधारणकर्मा तस्य एव भीमवाक्यमिति नोपन्यस्तमिति संप्रदायः दुष्टेति दुर्जनस्य दुर्योधन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समारणार्थं सम्यगुन्नतीकृतो दंडो यन्न तादृशो बाहुप्रकांडो भुजरूपावयवो यस्य तादृशः प्रत्यावृत्तेति पुनरुद्दीप्तः प्रकोपस्तत्र प्रलयकालि
कानिर्यस्य तादृशः कस्यापि वश्योधीनो नास्मीत्यर्थः॥ ननु व्यंग्यस्य क्रोधस्य प्रकोपपदेन वाच्यीकरणदोषात्कथमसौ दाहरणमेतदिति
चेन्निरवधानोसि॥ रसदोषेपि रसानपायादित्युक्तत्वादुदाहरणतायाअक्षतेः॥ तथापि निखिलव्यंजकसमधानमात्रादेव समुल्लसंत्यां
व्यंजनायां पुनर्व्यंग्यस्य वाच्यीकरणं कापेयकत्स्यंतदिमं दोषमसहमान उदाहरणांतरमाह॥ त्र्यंक्रीडेत्यादि क्रीडायै शरैः क्रीडितुं तुंगाउच्च
तरायेतुरंगा अश्वास्तेषां टापाः शफास्तेषां पटलीभिः खर्वीकृता लघूकृताः सुवर्णाद्रि इति यावत् उर्वीधरानगास्तेषां श्रेण्या स्फूर्जिताभिः प्रादुर्भू
ताभिर्धूलिधारणीभिः रेणुपंक्तिरूपैस्तमस्तोमैरंधकारपटलैरवलीढं जगत्समंतसैन्यादिबद्धेति॥ भोगीश्वराणां देर्घ्यमभ्यंतो येह स्ति

भीमोहं दुष्टदुर्योधननिधनसमुद्दंडबाहुप्रकांडः प्रत्यावृत्तप्रकोपप्रलयदहलवहो नास्मि कस्यापि वश्यः॥ यथा वा॥ क्रीडातुंग
तुरंगटापपटलीखर्वीकृतोर्वीधरश्रेणीस्फूर्जितधूलिधारणितमःस्तोमावलीढं जगत्॥ बद्धस्यद्धेकरींद्रवृंदचरणव्याभुग्नभो
गीश्वरस्य व्यग्रोदग्रफणाग्ररत्नरुचिभिर्विद्योतयामो वयं॥ परिपूर्ण उत्साहः॥ सर्वेद्रियाणां प्रहर्षो वा वीरः वर्णोस्य गौरः दैवतं शक्रः॥

समुदायस्य चरणादीर्घदीर्घा इति यावत्॥ यत्तु बद्धस्पर्धानां रिपूणां करींद्रा इति व्याख्यानं॥ तत्स्रक्रमभंगाद्भोगीश्वरनमनानुगुणत्वानायक
प्रतिनायकयोः संपत्युत्कर्षापकर्षयोरभिमतमतिप्रतिद्वंद्विमतिकारकत्वाच्चोपेक्ष्यं॥ तैर्व्याभुग्नानां भारभरान्नम्रीकृतानां भोगीश्वराणां
धराधारभूतानां व्यग्राभिश्चलिताभिरुदग्राणामुत्कृष्टानां फणारत्नानां रुचिभिः पर्वतचूर्णनसंजातविवरनिःसृताभिरिति गूढाभिसंधिः
॥ विद्योतयामः प्रकाशयाम इत्यर्थः॥ अत्र चक्रवेरन्यस्य सवाबुद्धिस्थत्वाभावाच्चूर्णिकाकृताकृतवद्भवनीतिबोध्यं॥ वीरं लक्षयति॥ उक्तयुक्त्या लक्षणां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्साहवैलक्षण्यं कारणवैलक्षण्याधीनमिति तदाह॥ तमेव विशेषं दर्शयति॥ एवं बहुतरनिबंधनिरीक्षणादिप्रभवविलक्षणोत्साह परियोषाद्यात्मकं पांडित्यादिवीराअप्यतिरिच्यंतामिति चेदतिरिच्यंत एव ते इति पुनः सप्रपंचमुपपादितप्रायमधस्तात्॥ एतेषामुदा हरणानां गवादिध्वनित्वमभ्युपगच्छद्भिः कथंकारं युद्धादिवीराणां सर्वरसानामेव वा तेषां तत्तद्व्यभिचारिध्वनित्वं नाभ्युपेयते॥ स्थायि प्र तीतिस्तु समानयोगक्षेमैवेति नायं पंथाः॥ दशमुखे रावणे संग्रामांगणं युद्धभूमावागते स्थिते सति सौमित्रिणा विस्मितं॥ अद्यैव कृतकृत्यो भविष्यामि इति हर्षात्॥ सुग्रीवेण विचिंतितं॥ कथमहमेवैनं निहत्य श्रीरामस्यानृणी भविष्यामीति चिंताविषयः॥ हनुमता व्यालोलं राम

सच त्रिधा युद्धवीर दानवीर दयावीर भेदात्॥ इयांस्तु विशेषः॥ सचोत्साहो युद्धवीरे प्रतापाध्यवसायादिप्रभवः दानवीरे दा नसामर्थ्यादिप्रभवः दयावीरे आर्द्रतादिप्रभवः॥ युद्धवीरो यथा॥ संग्रामांगणमागते दशमुखे सौमित्रिणा विस्मितं सुग्रीवेण विचिंतितं हनुमता व्यालोलमालोकितं॥ श्रीरामेण परं तु पीनपुलकस्फूर्जत्कपोलश्रिया सांद्रानंदरसालसा निदधिरे बाणा सने दृष्टयः॥ दानवीरो यथा॥ अभ्यागच्छति मंदिरं द्विजकुले खंडाय खंडांबुधिं सारा ब्धिं लवणाय दुग्धजलधिं दुग्धाय चेद्दास्यति॥

वणयोर्द्वयोरपि युगपच्चक्षुः संचारं यथा स्यात्तथालोकितं॥ श्रीरामेणाज्ञप्ते चेदेनं बध्वा पातयिष्यामीत्यालोकनाशयः॥ श्रीरामेण तु बाणासने दृष्ट यः परं निदधिरे स्थापिताः॥ कीदृशेन रामेण पीनेत्यादि॥ उत्साहकार्यांगपुष्टिभाक्॥ तथा पुलकैः स्फूर्जंतौ कपोलश्रीर्यस्य तेनेत्यर्थः॥ किंभूता दृष्ट यः सांद्रेति निबिडानंदात्मके नरसेनालसा इत्यर्थः॥ अत्रेदं कवेरुक्तिसौष्ठवं॥ यत्पूर्वार्द्धे व्यालोलादिपदसमभिव्याहारेण हनुमदादिनिष्ठापरिपु र्णोत्साहस्तथोत्तरार्द्धे तु परिपूर्णो सौ प्रतीयते इति स्थायिभावसंकीर्णरसोदाहरणमेतद्रसोदाहरणस्थायिभावोदाहरणयोर्विशेषावगतये समुपन्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ यद्वा ब्राह्मणकार्यं संपादयितुं वपुः शरीरं यस्य तादृशाय परमपुरुषायेति यावत्॥ तस्मै रामाय नमोस्तु तस्मै कस्मै दिव्यापगा गंगा इति भियेव दी नै॰क॰
१८ दीनासती यस्यांघ्रिं न जहाति न त्यजति॥ इतीति किं॥ द्विजकुलार्थिसार्थं मंदिरं निजसदनमभ्यागच्छत्यतिथितां गते सति रामश्चेत्तवंडा यस्य
ड्संपादयितुं खंडांबुधिं खंडसमुद्रं तथा लवणायसारांभ्भिं सारार्णवं दुग्धाय दुग्धजलधिं दुग्धसागरं दास्यति विप्रसात्करिष्यति न हिं मम
विरहः प्रियविश्लेषादुर्वारोप्रतीकारो भवेदितीत्यर्थः॥ परदूषणकथारसिका अर्वाञ्चस्तु रामविषयकविगतरतिभावांगतयैव दानवीरः प्र
मीयते इति कथं रसोदाहरणमेतदिति॥ तद्भ्रमसाभिधानं॥ यतो वांतरवाक्यार्थबोधपूर्वकोत्रश्लोके महावाक्यार्थबोधो विवक्षितः॥ न हि
न हिं पदघटितोत्तरवाक्यार्थबोधस्तर्हिं पदार्थबोधं विना भवति॥ न वा तर्हिं पदार्थबोधः पूर्ववाक्यार्थबोधं विनैव भवितुमीष्टे॥ प्रकारांतरेण

दुर्वारो विरहो भवेदिति भियादीनेव दिव्यापगा यस्यांघ्रिं न जहाति विप्रवपुषे रामाय तस्मै नमः॥ दयावीरो यथा॥ दयाबीजं हरेर्नै
त्रमंकुरस्तत्र भास्करः॥ ततः समुच्छ्रिता वेतौ पल्लवौ रामलक्ष्मणौ॥ गुरुशिक्षादिना तर्हिं पदार्थबोधांगीकारे पूर्ववाक्यवैयर्थ्यापत्तेः॥

अत एव शब्दालोके वाक्यार्थकर्मके कुत्वकादौ चावांतरवाक्यार्थबोधनियमो महावाक्यार्थबोधे समर्थितः पक्षधरमिश्रैः॥ तदेवं पूर्वोत्तरवाक्या
र्थबोधयोः पौर्वापर्ये जागरूके प्रधानतया पूर्ववाक्यार्थप्रतीतिदशायामुदाहरणे श्रोतृबुद्ध्यारूढे पाश्चात्यांगभावो किं विकर इत्याशयात्
॥ हरेर्विलोचनेत्रं दयायाबीजं असाधारणंकारणं॥ अत्र दयापदश्रवणेक्त्वा विशेषातिरिक्त एवव्यंग्य तथाभूतदयावीरोत्साह गमकोरसणादिरू
पव्यापारो दयापदार्थ इत्याशयान्नवमनारम्यो दोषः॥ तत्र बीजंकुरो भास्करोऽजायत ततोंकुरादेतौ रामलक्ष्मणौ पल्लवावभूतामित्यर्थः॥ अत्रेदृश राम॰
पल्लवारोपात्रगुणात्रभावात्रभावितो गम्य जगद्विभावितो गम्योत्साहचिंतादि संचारितो दयावीरोत्साहो व्यंग्य इत्युदाहरणसंगतिरित्याहुस्तां ताव १८

CC-0: Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा स्वस्कृतरससमीमांसायां॥ हुंवारवं गुरो गौः प्ररूढसिंहां दिलीप आवेक्ष्य॥ आनर्तितभुप्रदकः स्वयमप्यतर्क्यपिंड इव॥ नचासौदा
नवीर इति सांप्रतं॥ विनिमयेह्यस्मिन्दानतासंभवात्॥ भयानकं लक्षयति॥ लक्षणांतरमाह॥ विभज्यते॥ अत्रापि प्राग्वदेव स्वसमाना
धिकरणविभावालंबनत्वं स्वाश्रयालंबनत्वं वा स्वनिष्ठत्वमित्याशयेनाह॥ स्वनिष्ठादित्यादिः॥ शिशुवपुर्देवः श्रीकृष्णः गोपीत्यादिगोपांग
नानां क्षीरसंभृतघटीसंबंधि विलुंठनफलकस्वीयव्यापारविषयककथाभिज्ञयोः पित्रोर्नंदयशोदयोः कर्तरि षष्ठी ताडनान्वितं स्वार्थं
मभिधत्ते ताडनस्य शंकासंभावनं तेन ज्वरं प्रकाश्य गात्रप्रकंपादिनाभिनीयसायंतमसि प्रसर्पति सति गृहं समागच्छति॥ तमभिनय

भयस्य परिपोषः॥ सर्वेंद्रियाणां विक्षोभो वा भयानकः॥ वर्णोस्य श्यामः॥ दैवतं यमः॥ स च स्वनिष्ठः परनिष्ठश्च॥ अपराधस्व
निष्ठो यथा॥ गोपीक्षीरघटीविलुंठनविधिव्यापारवार्ताविदोः पित्रोस्ताडनशंकया शिशुवपुर्देवः प्रकाश्य ज्वरं॥ रोमांचस्वय
न्दृशौ मुकुलयन्नङ्गं मुहुः कंपयन् नीलकुंवेस्तमसि प्रसर्पति गृहं सायं समागच्छति॥ परनिष्ठो यथा॥ गंगायाः सलिले निमज्ज
ति जटाजूटे परिभ्राम्यति भ्रश्यत्यक्षिहुताशने फणिफणाभोगे कचिल्लीयते॥ मेव विशेषणचतुष्टयेनाह॥ रोमांचमिति॥ विवरसी

करणसंभूतशीतात्प्रथुं धैर्यं रचयन्ज्वरसंभूततया बोधयन्दृशौ मुकुलयन् ज्वरस्यासह्यवेदनत्वमुद्भावयन्नङ्गं मुहुः कंपयन्निभृतप्रयत्नसाध्यं
कंपं ज्वरसाध्यतया प्रतिपादयन्नेतदनुगुणतयैव सति सप्रयत्नमुपन्यस्तं सीत्कुर्वन्नुच्छ्वासेनापूरयन्नित्यर्थः॥ स्वव्यधिकरणविभावालंब ॥ रसमं
नत्वं स्वाश्रयान्यालंबनत्वं वा परनिष्ठत्वमित्याशयेनाह॥ परनिष्ठको यथेत्यादिः॥ बालः कलावशिश्रुस्तुपारद्युतिर्हिमांशुराहोरस्य मुदी
स्य किं कीदृक्साहसं नक्रुरुते नानुतिष्ठति॥ न साहसमनारुह्य नरो भद्राणि पश्यति॥ साहसे च समारूढे यदि जीवति पश्यतीति शास्त्रादिति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गंगायामुनद्याः सलिले निमज्जति जटाजूटे हरस्येत्युपज्यते॥ एवमग्रेपि॥ परिभ्राम्यति॥ अक्षिहुताशनेभयतिस्खलति फणिफ
णाभोगेकचिदंतर्गतेलीयतेंतर्भवतिकुब्जीभूयशरीरंप्रवेशानुगुणीकृत्यहरस्यकर्णसुषिरंविवरंनिर्गंतुमुत्कंठतइत्यर्थः॥ परकृता
दित्यादिः॥ दशमुखेदशभिर्मुखैर्नादंकुर्वाणेसतिसुरैर्देवैःकंपितंदिङ्नागैरैरावतादौश्चकिलंहरेस्सूर्यस्यहयैस्सप्तसंख्याकैरपि॥ अत्रके
चित्॥ एकोअश्वोवहतिसप्तनामेतिश्रुतेर्बहुवचनाद्रपपत्तिरिति॥ तत्रब्रूमः॥ एकस्मिन्नश्वेसप्तपदरूढिप्रतिपादिकासाश्रुतिर्नाश्वैक
त्वमवधारयति॥ सप्तयुंजंतीतिश्रुतेः॥ परस्परभेदप्रसक्तगतिवैरूप्यपरिहारार्थंवैकत्वमुत्कीर्तितमिति॥ अतएवरथसप्तयःसप्तेति

कुब्जीभूयहरस्यकर्णसुषिरंनिर्गंतुमुत्कंठतेराहोरास्यमुदीस्यकिंनकुरुतेबालस्तुषारद्युतिः॥ विकृतनिनदास्यनिष्ठाय
श्या॥ कुर्वाणेदशभिर्मुखैर्दशमुखेनादंसुरैःकंपितंदिङ्नागैश्चकितंहरेरपिहयैरुत्सुकमाधावितं॥ सुग्रीवस्तुसगच्छलज्जल
निधिव्यालोलवीचिभ्रमिभ्रश्यत्सेतुविशंकयाहनुमतोवक्त्रेदृशौसंदधे॥ सप्तसप्तिपदंविवृण्वतेबहवःश्रुत्यर्थदर्शिनः॥ उत्तुच्छं

ऊर्ध्वप्लुतंयस्मिन्कर्मणियथाभवतितथेतिस्वभावोक्तिःसमंतादुद्धावितंसुग्रीवःपुनःसमुच्छलतोतिक्षुब्धस्यजलनिधेर्व्यालोलावेगवत्तराद्
तियावत्वीचयोलहर्योभ्रमयआवर्ताश्चताभिर्भ्रश्यतःसेतोर्विशंकयासेतुभ्रंशाशंकयेतियावत्हनुमतोवक्त्रेदृशौसंदधेयोजयामासेत्यर्थः
॥ केचित्त्वत्रसुग्रीवेपोत्यग्रेचसंदधेइत्यत्रयोजितेइतिपाठंकल्पयित्वाप्रक्रमभंगमुद्दिधीर्षति॥ तन्न॥ भावकर्मप्रत्ययकृतस्यास्यतावताप्य
नुद्धारात्॥ वयंतुब्रूमः॥ पूर्वार्द्धेआकस्मिकत्रासउत्तरार्धेसंभावनापूर्वकंतिङर्थेप्रयत्नप्रतिचिकीर्षितंभयमित्यनयोर्विशेषावगतयेसम
र्थःप्रक्रमभंगोंगीकृतोनदूषणमिति॥ एतेनसुग्रीवस्येतिसुग्रीवेणस्यैववातएवाग्रेकर्तृकरणासत्तायाभेदेनव्यवस्थितस्यवक्त्रेदृशासंस्थित

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विशेषणनिरभिप्रायत्वे प्रसक्तस्यापुष्टार्थत्वदोषस्य तत्साभिप्रायत्वमात्रेण परिहारवद्यथाश्रुतपाठे प्रसक्तस्यास्य तस्मिन्नेव निरुक्ततात्पर्यग्रा
हकत्वमात्रेण परिहारेपि सामंजस्यसंभवात्॥ बीभत्सं लक्षयति॥ लक्षणांतरमाह॥ विभजते॥ स्वसमानाधिकरणविभावालंबनत्वं स्वाश्र
यालंबनत्वं वा स्वनिष्ठत्वं स्वव्यधिकरणविभावालंबनत्वं स्वाश्रयान्यालंबनत्वं वा परनिष्ठत्वं प्राग्वदिहापि बोध्यं॥ भार्गवोवद्देतिस्मद्वीशीला
नां शत्रुवर्गाणां रुधिरसंभूतायाः स्रोतस्विन्या नद्याः स्रोतसि प्रवाहे भ्रश्यति पतत्सु द्रुमतिमुह्यति॥ अथेति किंचेत्यर्थः॥ स्खलति स्खलितं
धत्ते॥ कीदृशो भार्गवो रणेति॥ संग्रामात्तुगुणक्रोधव्यग्र इत्यर्थः॥ कथंभूते स्रोतसि कालीत्यादि॥ योगिनीविशेषयोः कुतूहलेन कौतुकेन पर
जुगुप्सायाः परिपोषो बीभत्सः॥ सर्वेंद्रियाणां संकोचो वा॥ वर्णोस्य नीलो देवतं महाकालः॥ स च स्वनिष्ठः परनिष्ठश्चेति॥ स्वनिष्ठो यथा
॥ कालीकुंडलिनीकुतूहलमिषः प्रारब्धथूथूत्कृतिन्यंचुद्द्विविचलद्दिहायसि वलझ्झिझ्झीनिपातस्पृशि॥ वद्धस्पर्द्धविपक्षपक्षरु
धिरस्रोतस्विनीस्रोतसि भ्रश्यत्सुद्रुमतिस्खलत्यथ रणक्रोधाकुलो भार्गवः॥ परनिष्ठो यथा॥ कृत्रंकुंभींद्रकर्णैर्विरचय तत्रुतं चाम
रं व्यालपुच्छैर्मालां मुंडैः प्रचंडैः सृजगजजघनैर्मंडपं योजयस्व॥ ७ सरंभारब्धाया थूथूत्कृतिर्निष्ठीवनशब्दानुकरणमेतत्संफू
त्कृतीति काचित्कः पाठो युक्ततरस्तयान्यंचसोयावीचयस्तासु चलद्विहायो गगनतारास्तास्थ्या यत्र तादृशि॥ पुनः कीदृशे तस्मिन्॥ व
लदिति॥ वलतीनां झिल्लीनां निपातः परिपतनं तद्भाजीत्यर्थः॥ कुंडलिन्याः प्रेतमुख्यायास्तनयेत्यादि॥ तनयस्य पुत्रस्य यः परिणयो
विवाहस्तदीयप्रारंभाज्जन्म यस्य तादृशः प्रेतेत्यादि प्रेतेषु रङ्काजरठाया अंगनाः स्त्रियस्तासां प्रायेणैवंविधे कार्ये प्रारंभो णां प्रगल्भते
ति दृष्टत्वादंगनाग्रहणं इत्येवं विधआलापउद्दीपोवभूवजातः॥ द्दतीति किं॥ कुंभींद्रकर्णैर्विस्ततलाव्कुत्रं विरचय॥ लग्नकालसंनि
धापाद्यस्य यस्यैव शीघ्रं पद्यत्कार्यं निर्माणेनैप्रपपत्ते नतेनैवत तत्कार्यं कर्तव्यं न तु प्रतिनियतं केन चित्किंचिदितित्वराविशेषसूचकार्थेयो।

यद्यपि भेद्यलिंगः शठे व्यालः पुंसि श्वापदसर्पयोरिति कोशाद्व्यालशब्दः श्वापदसामान्यवाचीतथापि प्रकृते कुंभींद्रकर्णैरिति विशेषण समभिव्याहारादश्वरूपविशेषपरो दृष्टव्यः॥ क्वचित्तु वाजिपुंजैरित्येवपाठः॥ चामरेतन्नुतं॥ द्विकर्तृकस्योभयतश्चमरोद्दूननस्यैकपदार्थ तावगतये द्विवचनांतक्रियापदसमभिव्याहारेणैकवचनांतकर्मपदं॥ प्रचंडैरुग्रदर्शनैर्मुंडैर्मालां सृजगजजघनैरुच्चैस्तरलां नमंडपं संस्थान विशेषं योजयस्व॥ अंत्रैर्नीराजनायाविधिं बधूवरोद्देश्यकक्रियाविशेषात्मकलोकाचारं कलयेतीत्यर्थः॥ अत्र रसाश्रयोद्दृष्टापुरुष आस्वेष्यद्व्य ग्रव्यक्तो भविष्यति॥ अद्भुतं लक्षयति॥ लक्षणांतरमाह॥ तं विभजते॥ स्वसमानाधिकरणविभावालंबनत्वं स्वाश्रयालंबनत्वं वा स्वनिष्ठत्वं॥ स्वव्य

अंत्रैर्नीराजनायाः कलयविधिमिति प्रेतवृद्धांगनानामालापः कुंडलिन्यास्तनयपरिणयारंभजन्माबभूव॥ विस्मयस्य सम्यक्सम

धिकरणविभावालंबनत्वं स्वाश्रयान्यालंबनत्वं वा परनिष्ठत्वमिति बुद्ध्योक्तमेवात्रापि

ढिरद्भुतः॥ सर्वेंद्रियाणां तादस्थ्यं वा॥ वर्णोस्य पीतो देवतं ब्रह्मा॥ स च स्वनिष्ठः परनिष्ठश्च॥ स्वनिष्ठो यथा॥ लीलानिबद्धपाथोधि
हेलाहतदशाननः॥ स रामः सीतयाश्लिष्टमात्मानं बह्वमन्यत॥ परनिष्ठो यथा॥ त्यक्ता जीर्णदुकूलवद्वसुमतीबद्धांबुधिर्बिंदुवद्धा
णाग्रेण जरत्कपोतकइवव्यापादितो रावणः॥

बोध्यं॥ स रामः सीतयाश्लिष्टमात्मानं बह्वमन्यत सकः॥ यो लीलानिबद्धपाथोधिः पुनः सकः॥ यो हेलाहतदशाननः॥ पूर्वार्द्धे द्वितीयांतपाठे तु सप्रसिद्धो रामो लीलानिबद्धपाथोधिमपि हेलाहतदशाननमपि चात्मानं सीतयाश्लिष्टं बह्वमन्यतेति विधिविशेषणीभूत सीतेत्यादेरुद्देश्य तावच्छेदकतया पूर्वार्द्धोपात्तविशेषणद्वयं योजनीयं तथा च यथा सीताश्लेषेण विस्मितो भूत्तथा न केनापीति भावः॥ पाठद्वयेपि पर्यवसति॥ एवं रघुनंदनस्य चरितं श्रुत्वा कोवा जनो न रोमांचति॥ रोम्णामंचनं रोमांचः सोस्यास्तीति यद्वा रोमाण्यंचतीति किंवांचतीत्यंचो रोम्णामंच इति रोमांच रामः ८०

शब्दनिष्पत्तावाचारक्विपिरोमांचतीतिरूपनिष्पत्तेः संजातपुलकोनभवतीत्यर्थः॥ एवंकिंतदाहस्यकेति॥ जीर्णदुकूलवन्ममतानाना
लिंगितत्वाहूसुमतीत्युक्ताबुधिबिंदुवदनायासबंधनाढ्ढः कृतसेतुः बाणाग्रेणजरत्कपोतकइवदुर्बलत्वाद्द्रावणोत्पादितः काप्य
परिमितसंपच्छालिन्यपिलंकामुद्रेवाल्पत्वाभिमानाद्विभीषणायविभीषणमाश्वासयितुंसहसाप्रथमदर्शनएवहस्तेर्पितानतुप्रति
ज्ञामात्रमित्यादीत्यर्थः॥ अद्भुताएवाद्भुतरसाभिव्यंजकाएव॥ एषकोलावतारोवराहतनुर्हरिः सतांसाधूनांहितायभूयात्॥ कएषः भूस्यु
द्धारप्रसंगेसिंधोर्मज्जनाज्जातंक्लेशमपास्ययस्यदशनप्रांतेदंताग्रेस्थितायाभुवः॥ अत्रताराकर्तृकहारसदृशाचाराद्गुणपत्यस्थितोबोधपि
लंकाकापिविभीषणायसहसामुद्रेवहस्तेर्पिताश्रुत्वैवंरघुनंदनस्यचरितंकोवानरोमांचति॥ अत्युक्तिभ्रमोक्तिचित्रोक्तिविरो
धाभासप्रभृतयोद्भुताएव॥ अत्युक्तिर्यथा॥ भूयादेषसतांहितायभगवान्कोलावतारोहरिः सिंधोःक्लेशमपास्ययस्यदशनप्रांते
स्थितायाभुवः॥ ताराहारतिवारिदस्तिलकतिस्वर्वाहिनीमाल्यतिक्रीडादर्पणतिस्पपतिरहर्देवश्चताटंकति॥ यथावा॥ दिव्य
हरेर्मुखकुहरेविस्तीर्णपर्णातिव्योम॥ चूर्णतिचंद्रः क्रमुकतिकनकगिरिः खदिरसारतिखरांशुः॥
तुंक्लेशमपास्यस्थितायाइत्युक्तं॥ अ
न्यथास्थितायास्तत्क्लेशायाइत्येवावस्यत॥ तेनभगवत्संश्रयणमात्रस्यसकलक्लेशापासनफलोपधायकत्वरूपेकार्यकारणव्यतिक्रमस्यअंगयेभग
वत्संसाहाय्यमाचरतीतिबोध्यं॥ ताराएनक्षत्रमालाहारस्युज्वलमणिहारवदाचरतिवारिदोमेघस्तिलकतितिलकरूपोभवतिस्वर्वाहिनीगंगामा
ल्यतिस्रक्त्वात्पुष्पमालारूपाभवतिसपापतिश्चंद्रः क्रीडादर्पणतिलीलामुकुरायते॥ अहर्देवः सूर्यस्ताटंकतिस्वर्णवर्णत्वादित्यर्थः॥ अत्युच्चैरुद्धरणाभिप्रा
यमद्भुतातथ्यवर्णनमिदंतत्ररतिभावांगतायामपरितुष्यन्नाविस्तुः पृथिवीपतिरित्यनुसारेणदीपस्यव्यवहारोचितंप्रसंगात्परसरंविसृष्टयित्व्योरत्रणग॥

उत्तरगांभूषणविन्यासंदर्शयितुमुदाहरणांतरमाह॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰त॰ ८१ दिव्यहरेःक्रोडावतारस्यविस्तीर्णमुखकुहरेमुखरंध्रेव्योमपर्णातिनागवल्लीदलीयस्यस्वल्पपरिमाणवत्तयाप्रतीयमानत्वाच्चंद्रश्चूर्णीतिचूर्णस्या नौका
नाभिषिक्तंभवतिपर्णैकदेशंगुष्ठसंघटितचूर्णसंस्थानतुल्यार्धपरिमाणवत्तयाप्रकाशमानत्वात्॥कनकगिरिःक्रमुकमितिघोंटायुतेतत्तु
ल्यपरिमाणताध्यवसायात्खरांशुःसूर्यःखदिरसारतिमुखांतर्गतजगद्रंजकत्वादित्यर्थः॥हेरंबस्यगणपतेःदंतेतिदंतस्यशिखरमिवशि
खरमग्रभागस्तस्य॥एतेनदंतस्यपर्वतसारताप्रकाशिता॥अतएवदंतएवशिखरमितिव्याख्याशिखरसारताप्रख्यापिकाप्युपेक्षिता॥व्या
पारउत्कीर्णनानुकूलस्तत्रयोलीलारसःप्रीत्यतिशयःसपुनातुमनोगोचरीभूयपवित्रीकरोतु॥कथंभूतस्यहेरंबस्यपंकेति॥पंकेमुख्यत्समुद्र

भ्रमोक्तिर्यथा॥तीव्रैस्तिग्मरुचः करैःपरिचितांसेक्तुंकपोलस्थलींनीराणांनिकरंकरेणहरतातुच्छीकृतेवारिधौ॥मैनाकंसमु
द्रीस्यपंकयतितंशालूकशंकाजुषोहेरंबस्यपुनातुदंतशिखरव्यापारलीलारसः॥यथावा॥अंतःक्रोधाग्निजाग्रत्कपटनरहरि
स्फारनिश्वासवातव्याधूतावारिवाहाःकुलधरणिभृतःसानुषुप्रस्खलंतः॥ कर्दमेपतितंमैनाकंमैनाकनामकंहिमालयतनय

मुद्रीस्यशालूकेति॥शालूकंकंदविशेषस्तस्यशंकासंशयस्तंजुषतेधत्तेतस्येत्यर्थः॥कस्मिन्सतितीव्रैरतिशयेनोत्सैस्तिग्मरुचःखरांशोःकरैः
किरणैःपरिचितांसंबद्धांतप्तामितियावत्कपोलस्थलींगंडस्थलींसेक्तुंनीराणांनिकरंहरताकरेणशुंडादंडेननीरधौसमुद्रेतुच्छीकृतेशुष्की
कृतेसतीत्यर्थः॥एकत्रैवविषयेकर्तृभेदेननानाधर्मारोपरूपांभ्रांतिविच्छित्तिविशेषमाहोदाहरति॥मनःसंस्थितक्रोधरूपेणाग्निनाजाग्र
तःप्रादुर्भूतायेकपटनरहरेर्धृतावतारस्यनृसिंहस्यस्फारबहुलीभूतानिश्वासवातास्तैर्व्याधूताःक्षिप्ताःकुलधरणिभृतःकुलाचलस्यसानु राम:
षुशिखरेषुप्रस्खलंतोवारिवाहामेघादिग्नागैर्दिग्गजैर्नागवद्व्याहस्तिभ्रांत्यावनहरिणकुलैःशाद्वलानांनडशाद्वलच्छहरित्तृणाढ्यस्थलीनां ८१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शंकयाकिरातैर्म्लेच्छैरुत्साभिभूतैरित्ययावच्छायाभ्रांत्यास्वर्वधूभिरप्सरोगणैः क्षितिवसनधियासमुपास्यमानकृत्तिवासोवधूम्नावीक्षिताः॥
तेषां तेषां प्रबलाभिलाषस्येव प्रबलद्वेषस्यापि संस्कारोद्बोधकत्वात्तत्तदभिलाषादिस्तत्तदारोपे हेतुरिति हृदयं॥ गिरिस्तत्त्वेनाध्यवसितं
कुचमंडलं मौक्तिकावलिस्तत्त्वेनाध्यवसितास्वेदबिंदुरचनावमत्युद्गिरति॥ अलिद्वयं तत्त्वेनाध्यवसितं लोचनयुगलं स्थावरं निश्चेष्टं॥ शरत्
तुहिनदीधितिरुद्भटप्रकाशात्तत्त्वेमाध्यवसितं मुखं व्यजनमारुतं मध्ये मध्ये स्तंभनात्तत्त्वेनाध्यवसितं श्वासं वांछति संधत्ते॥ मान्मथं कामस्य धनुस्तत्त्वेनाध्यवसितं भ्रुकुटियुगं स्वपिति तातटस्थ्यं भजते॥ अंधंतमोऽतिनैल्यात्तत्त्वेनाध्यवसितः केशपाशः शिथिलबंधगलितबंधनं

दिङ्नागैर्नागवधूम्नावनहरिणकुलैः शंकयाशाद्वलानां छायाभ्रांत्याकिरातैः क्षितिवसनधियावीक्षिताः स्वर्वधूभिः॥ चित्रोक्ति
यथा॥ गिरिर्वमतिमौक्तिकावलिमलिद्वयं स्थावरं शरत्तुहिनदीधितिर्व्यजनमारुतं वांछति॥ धनुः स्वपिति मान्मथं शिथिल
बंधमंधंतमोनमोमनसिजायनेकिमपिकौतुकं तन्वते॥ लाक्षणिकमखिलं चित्रोक्तिरेव॥ भवतीति किमपि स्वस्यानुभवैकवेद्यं

कौतुकं चमत्कारं तन्वते ते मनसिजायनमोनन्यसाधारणकलापात्रत्वादित्यर्थः॥ सारोपलक्षणापि चित्रोक्त्यंतर्गतैव नातिरिक्तेत्या
ह॥ सारोपसाध्यवसानभेदभिन्नलक्षणासंबंधिपदघटितवाक्यसामान्यमित्यर्थः॥ यथा मम॥ कुचकनकगिरिप्रांतः स्वेदांभोमौक्तिका
क्रांतः॥ तव निधुवनपांडित्यं पिशुनयितुमयं विपर्ययो जातः॥ यथा वा ममैव॥ अपि नीलांशुकवृंतनिर्मलदंतांशुकेसराकीर्णे॥ लोलाक्षि
भृंगशालिनि कांते वासंतिकासिकस्यापि॥ आगन्तयानत्रुगुणतेवात्रसामान्यधर्मप्रयोगो ह्युपमितसमासबाधकोऽस्तीति पूर्वस्माद्विशेषः॥ ए
वमुपमितसमासेन्वयसामंजस्येप्युक्तलक्षणादृश्यते॥ यथा मम॥ वलिनिःश्रेणिस्तनयुगचक्रे रोमालिशैवाले॥ नयनयुगलारविंदे कामिनि सरसी॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हेमुकुंदत्वंकोप्यसौसर्वलोकप्रसिद्धप्रभावोनंदकःखड्गःकंससंपदोऽनंदकोनाशकइतिशब्दच्छलात्प्रतीयमानविरोधसमाधानशिरस्को
विरोधाभासः॥अत्रनिंदकइतिपाठकल्पनाकुकल्पनैवेतिप्रतिभाति॥वास्तविकस्यैवापाततोपिविरोधस्फुरणस्याभावेनानुदाहरणत्वप्रसं
गात्॥हेमुकुंदत्वंकुंडलीकर्णभूषणभागसिसामीप्यंभजसेकालियंकालियनामानंकुंडलिनंकृतःकिमुद्दिश्यदूरतोनयसितदि
त्येवंरूपजिज्ञासाविषयरूपंप्रयोजनंनिवेदयकथयेत्यर्थः॥कुंडलिसामान्यापाकरणसमुद्देश्यकेनामुनाव्यापारेणकुंडलिसामान्या
पाकरणस्यतवसामीप्येऽसंभवादितिविरोधोव्यालसामान्यापाकरणसंभवादाभासरूपइति॥परंतुद्वयोरप्यानंदरूपत्वेतिप्रागुक्तंन
त्रानंदमयशृंगारादिप्रधानकाव्यनाट्ययोःसहृदयानांप्रवृत्तिसंभवेपिदुःखमयकरुणादिप्रधानयोस्तयोःकथंतेषांप्रवृत्तिरितिविशेषतः

विरोधाभासोयथा॥कोप्यसौत्वमुकुंदनंदकोऽनंदकोभवतिकंससंपदः॥कुंडलीलमसिकालियंकुतोदूरतोनयसितन्निवे
दय॥नाट्येचसर्वेरसाआनंदरूपाअद्भुताख्याःपरनिष्ठाएव॥ शंकामपाकरोति॥चकारःकाव्यसमुच्चायकः॥यद्यपिप्राग्द्वयोरि
तिवक्तुंयुक्तं॥अन्यथाकाव्येचेत्येवकिंनकृतमितिनियोगप्रसंगात्तथापिनाट्यरसेविशेषंवक्तुमित्यभिहितं॥सर्वेरसाअनुपदंनिरूपि
ताअष्टावपि॥आनंदरूपाःकाव्यइवानंदरूपाएव॥वैशेषिकाणांपदपस्काननुमानइवपरस्परंदृष्टांतदार्ष्टांतिकभावोपिसुसिद्धएव॥उभ
यत्रतथाविप्रतिपन्नस्यप्रतिपाद्यत्वेपिनकाचिदनोक्तिस्तेनविना॥अत्रक्वचित्पुस्तकेनाट्येवेतिपाठःसतुकुजरेव॥इवार्थकवशब्दस्यापिम
हाकविनिबद्धत्वात्॥काव्यात्मनउपमेयस्यप्रस्तुतत्वादेवलाभाच्च॥एतेनसकलरसाभिव्यंजकतयाकाव्यमेवोत्तममितितदेवप्रस्तुतमुप
मेयंयुज्यतेननाट्यमितिप्रजल्पन्समाहितइतिपुनरपव्याख्यानं॥परनिष्ठाएवेत्यस्यतथापाठेविरुद्धमतिकारकत्वापत्तेः॥रसाधिक्यसोत्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नास्त्येव शांतरसो नास्तीत्यत्रापि ग्रंथकृन्निर्भरेसाधकाभावाच्चेत्यत्र पदं व्यक्तीभविष्यति॥ ननु लोकसम्बादाविवृके च न दुःखरूपा अपीत्यवधारणार्थः॥ तच्चवितर्तीकृतमधस्तात्॥ अद्भुतास्त्वाः विस्मयाव्यभिचारिणः॥ परनिष्ठास्वनयातिरिक्तसामाजिकगता एव एवकारेण काव्ये तु कविषु सहृदयेष्वपि वर्ततइति सूचितं॥ नटस्यात्रकारित्वनियमात्॥ कवेः सहृदयांतःपातित्वावश्यंभावादिति हृदयं॥ नाट्यभिन्नेवक्त व्यशांतरसप्रतिहुंहितया मायारसं व्यवस्थापयितुं भूमिकामारचयति॥ उपादेयतामतिहेयतामतिश्चेत्यर्थः॥ प्रतिभातीति॥ वक्तुं युज्यत इत्यर्थः॥ अमंगलप्रायस्य निर्वेदस्य सर्वव्यभिचारिप्राथम्यसमाक्षिप्तवस्यमाणोद्देशपाठदृढीकृतमुनितात्पर्यकः शांतरसस्तन्मतानुसारिभिः संगीतरत्नाकरादौ व्यवस्थापितः॥ पूर्वं पूर्वाचार्यानुभवसंवाद्यनुभवस्य शरणीकरणीयत्वात्॥ मायारसस्तु न तथानुभवसि

चित्तवृत्तिर्द्वेधा प्रवृत्तिर्निवृत्तिश्च॥ निवृत्तौ यथा शांतरसस्तथा प्रवृत्तौ मायारस इति प्रतिभाति॥ एकत्र रसोत्पत्तिरपरत्रनेति वक्तुमशक्यत्वात्॥ न च सरतिरेव॥ तर्हि सकस्यास्तु व्यभिचारी॥ न शृंगारस्य॥ तद्वैरिणो बीभत्सस्यापि तत्र सत्त्वात्॥

द्धः॥ वस्यमाणमायारसोदाहरणे तु देवादिविषयकत्वाद्रतिर्भाव एव न रस इति मुनिवचो गौरवाद्वाच्यमित्यभिप्रेत्य प्रतिभातीत्युक्तं॥ तथा च युक्तिसाम्यादाधुनिकानुभवस्य विनिगंतुमशक्यत्वाद्द्वयोरधिकयोः प्रसक्तेपि भरततात्पर्यानुसारिभिः प्राचीनैः सर्वसंवाद्यनुभवाद्यतः शांतः स्वीकृतो न मायारसः॥ स्वातंत्र्यालंबनेबहूपप्लवापत्ते रिति भावः॥ व्यभिचारिण्यारसे वोपपत्तौ किमतिरिक्तरसकल्पनेनेत्याशंकते॥ रसांतरकल्पनां विना व्यभिचारितापि न संभवति रसव्यंजकत्वस्य तद्घटकत्वादित्याशयेनोत्तरयति॥ क्वचित्व्यभिचारित्वमपाकरोति॥ तत्र हेतुमाह॥ न च विरुद्धयोर्द्वयोरेकस्मिन्संस्थितिः॥ तथा च बीभत्ससंचारिनप्रबुद्धमिथ्याज्ञानवासनाभिव्यक्तिस्थले शृंगारस्यानास्वाद्यतया न तत्र शृंगारव्यभिचारि

82

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. अतएवस्वविरोधितावच्छेदकबीभत्ससामानाधिकरण्यतुल्यशृंगारसामानाधिकरण्यादेव॥एवमग्रेपि॥व्यभिचारिन्यायेनभुज्यमान नौका
८३ रत्यादीनामेवमायारसत्वंरसन्यायेनभुज्यमानानांतुतेषांशृंगारादित्वं॥अतएवमायारसइतिरससामान्याभिधाविशेषाभिधाशृंगारे
त्यादीत्याशंकते॥वाच्यमितिशेषः॥तथाचोक्तस्थलेबीभत्सस्यास्वाद्यत्वेनतत्संचारिणीजुगुप्सेवशृंगारादेरास्वाद्यत्वेतत्संचारीरत्यादिरेव
प्रबुद्धमिथ्याज्ञानवासनाभिव्यक्तिंगतार्थयतीतिभावः॥स्थापितयानुभूयमानप्रबुद्धमिथ्याज्ञानवासनायाविद्युद्द्योतप्रायत्वान्नरस

अतएवनबीभत्सस्यापि॥नहास्यस्य॥तद्वैरिणःकरुणस्यापितत्रसत्त्वात्॥अतएवनकरुणस्यापि॥नरौद्रस्य॥तद्वैरि
णोद्भुतस्यापितत्रसत्त्वात्॥अतएवनाद्भुतस्यापि॥नवीरस्य॥तद्वैरिणोभयानकस्यापितत्रसत्त्वात्॥अतएवनभयानकस्या
पिनापिशांतस्यतद्विरोधित्वात्॥नचसामान्यएवरसस्तद्विशेषाइतरेभवंतीति॥शांतरसस्यतद्विरसाभावत्वापत्तेः॥किंतु
विकृतएव॥रतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयास्तत्रोत्पद्यंतेविलीयंतेच॥तेनतत्रतेव्यभिचारिभावाइति॥ल
क्षणंचप्रबुद्धामिथ्याज्ञानवासनामायारसइति॥मिथ्याज्ञानमस्यस्थायिभावः॥

स्थायिभिरन्यथासिद्धोजगद्विषयहेयताबुद्धि
वासनायास्तथाविधायाअपितथाविधेनहर्षादिनान्यथासिद्धिःस्यात्तदिदमुक्तमेकत्ररसोत्पत्तिरपरत्रनेतिवक्तुमशक्यत्वादिति॥न
थाचशांतस्यरसविशेषतासर्वाभिमतत्वाविलीयंतेत्युत्तरयति॥तस्मान्मायारसोधिकएवरत्यादयस्तस्यव्यभिचारिणइत्युपसंहरति॥विकृ
तएव॥अतिरिक्तोविलक्षणएवरसइत्यर्थः॥विद्युतइवेतिपाठेनतुमायारसस्थलेरत्यादिप्रतीतेःकागतिरतआहेतिकिंलित्यवतार
णीयं॥तेनोत्पादविलयाभ्यांविद्युत्प्रायत्वेन॥तंलक्षयति॥प्रबुद्धाफलिता॥मिथ्याज्ञानमित्यस्यमिथ्याज्ञानवासनेत्यर्थोन्नलक्षणवाक्ये

॥रसतरंगिणी॥ रम: ८३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लाटीलाटदेशस्त्रीतस्याहृगेवांभोरुहंगंधवहप्रेरितत्वात्तरसरभसोवेगस्त्रांचल्यमितियावत्तस्यकर्त्रीफलप्रुष्यसम्हेरीदृशीवाटीवाटिका
तिष्ठतिकापिकांतामनोविश्रामहेतुःसरोजसारंगादिप्रतिपत्तेरीदृशीवापिकातिष्ठतितल्पंपर्यंकश्चंद्रानुकल्पंकामिनीप्रकटयतीति
योज्यंनैर्मल्यमार्दवादिसंपत्तेरेतेनोपभोगसाधनसंपत्तिकारकाहृष्टरूपोद्दीपनविभावउक्तः॥कामिनीकामनीतिंकामक्रीडांमिथःपरस्प
रंप्रकटयति॥एतावतापड्िंद्रियजन्यनिर्वृतिलक्षणःशृंगाररूपोव्यभिचारीसूचितः॥कामानुरूपंमनोभिलषितंरूपमाकृत्यादिकामि
नीप्रकटयतीत्यन्वयः॥एतेनकामिन्याव्यात्मबुद्धिरूपमिथ्याज्ञानवासनायाआलंबनविभावोदर्शितः॥अथोपादेयतामतिरूपमत्र

विभावाःसांसारिकभोगार्जकधर्माधर्माः॥अनुभावाःपुत्रकलत्रविजयसाम्राज्यादयः॥यथा॥वाटीलाटीदृगंभोरुहरभ
सकरीवापिकाकापिकांतातल्पंचंद्रानुकल्पंप्रकटयतिमिथःकामिनीकामनीतिं॥रूपंकामानुरूपंमणिमयभवनंबंध
रंबंधुरागोलोकेलोकेशकस्त्वमसिनभवनेसर्वदासर्वदाता॥ भावंदर्शयतिमणिमयभवनंबंधुरमुन्नतानतंसर्वर्तुसेवनीय
मितियावत्॥कुतमस्तीतिशेषः॥एतेनधनसंपत्तिरुक्ता॥बंधुरागोबंधुजनप्रीतिःस्वयंसंपादितास्तीतिशेषः॥एतेनाभिजनसंपत्तिरु
क्ता॥हेलोकेशत्वंकस्यपुंसोलोकेसर्वदाभवनेसर्वदातानासिपितुत्रैलोक्येविद्यमानानांसर्वेषामेवपुंसांयथाकालमनायासेनैवसर्वदद्दा
सीत्यर्थः॥अत्रयथोक्तविभावादिसंयोगादभिव्यज्यमानाकुच्युभितनायकगतामिथ्याज्ञानवासनामायारसइतिबोध्यं॥नन्वास्तुनहिप्रा
धान्येनाभिव्यज्यमानोभावोरसमपेक्षते॥तथासतिरसस्यैवप्राधान्यापत्त्याभावध्वनिविलोपप्रसंगात्॥तस्मात्सकस्येत्यादिविकल्पोन
वकाशाद्व्यभिचारिणीरतिर्मायारसंगतार्थयतीत्याहुः॥लक्ष्म॥विभावानुभावव्यक्तस्थायि चर्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पायाद्युवस्थातंत्र्येण तथाविधव्यभिचारित्वेणायाअपिनिरुक्तानंदांशावरणाज्ञाननिवर्तनसमर्थालौकिकव्यापारफलोपधायकत्वक
ल्पनेगौरवात्॥ शांतेरसाभिव्यक्तेरभ्युपगमेतुक्रमसामग्र्यैवनिर्वाहात्॥ परंतुपानकरसन्यायेनचर्व्यमाणत्वान्मनोभावचमत्कारप्र
कर्षोद्भावधनिव्यवहारः॥ रसस्तुतत्रव्यज्यमानोपिनतथाचमत्कारहेतुरितिनरसध्वनिरेषः॥ अतएववात्सल्यादीनांतेरसाः सं
चार्यतयाप्राग्दर्शिताः॥ रसेह्यानंदांशाविनाभावस्यधर्मिग्राहकमानसिद्धत्वाच्चमत्काररहितरसव्यक्तौमानाभावइतितुविवादग्रस्तमे
वप्राचां॥ कथमन्यथापरमसुखंरसमेतेनुमन्यंते॥ तथाहि॥ अलंकारेचरुचिरेचित्तविश्रांतिकारिणि॥ अलंकारस्यमुख्यत्वंगौणत्वंरसभाव
योरिति॥ तस्मात्प्राचामायंरसोनपदार्थएवेतिग्रंथकृदाशयः॥ नास्त्यभिन्नेपरमिति॥ आदिकाव्येतिहासादौस्थितस्यर्थः॥ नवमइति॥ नन्

नास्त्यभिन्नेपरंनिर्वेदस्यायिभावकः शांतोपिनवमोरसोभवति॥

शांतरसस्यातिरेकेकिंमानमितिचेत्॥ मुनिवचनं॥ तद्यथा॥ शृंगारःकरुणःशांतोरौद्रोवीरोद्भुतस्तथा॥ हास्योभयानकश्चैवबीभत्सश्चेति
तेनवेति॥ नटेशमाभावान्नाट्येगीतवाद्यादीनांविषयवैमुख्यात्मकशांतरसविरोधिनांसत्त्वाच्चनतत्रशांतरससंभवइत्याशयेनोक्तंना
ट्यभिन्नइति॥ तदुक्तं॥ शांतस्यशमसाध्यत्वान्नटेचतदसंभवात्॥ अष्टावेवरसानाट्येनशांतस्तत्रयुज्यतइति॥ नव्यास्तुनटेशमाभावा
दितिहेतुरसंगतः॥ नटेरसाभिव्यक्तेरस्वीकारात्॥ सामाजिकानांचशमवत्त्वेनतेषांरसोद्बोधेबाधकाभावात्॥ नचनटस्यशमाभावात्तद
भिनयप्रकाशकत्वानुपपत्तिरितिवाच्यं॥ तस्यभयक्रोधादेरप्यभावेनतदभिनयप्रकाशकतायाअप्यसंगत्यापत्तेः॥ यदिचनटस्यक्रोधादे
रभावेनवास्तवतत्कार्याणांवधबंधादीनामप्यसंभवेपिकृत्रिमतत्कार्याणांशिक्षाभ्यासादितउत्पत्त्यैनबाधकमस्तीतिसूक्ष्मदृशानिरी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यैतेन त्वाप्रकृतेपितुल्यवदिदं ज्योतिः कुतो हेतोस्तरालितमतिसूक्ष्मसाक्षिणोपि॥ नचनाट्ये गीतवाद्यादीनां विरोधिनां सत्वात्सामाजि
केष्वपिविषयवैमुख्याभ्रनः शांतस्यकथमुद्रेकइतिप्रागुक्तं शंक्यं॥ नाट्ये शांतरसमभ्युपगच्छद्भिः फलबलाद्गीतवाद्यादेस्तस्मिन्विरो
धितायाअकल्पनात्॥ विषयचिंतासामान्यस्यतत्रविरोधित्वस्वीकारेतुतदीयालंबनस्यसंसारानित्यत्वस्यतदुद्दीपनस्यपुराणश्रव
णादेरपिविषयत्वेनविरोधितापत्तेः॥ अतएवसंगीतरत्नाकरेचरमाध्याये॥ अष्टावेवरसानाट्येष्विति केचिदचूचुदन्॥ तदचारुय
तः कंचिन्नरसंस्वदतेनटइत्यादिनानाट्येपिशांतरसोस्तीतिव्यवस्थापितमित्यन्यत्रविस्तरइतिप्राहुः॥ यैरपिनाट्ये शांतरसोनास्तीत्य
भ्युपगम्यतेतैरपिबाधकाभावान्महाभारतादिप्रबंधानांशांतरसप्रधानतयासकललोकानुभवसिद्धत्वाच्चकाव्येसोवश्यमंगीकर्तव्यस्त

निर्वेदस्यपरिपोषः शांतोरसः॥ दोषप्रशमोवादोषाः कामक्रोधादयः ॥

त्सिद्धंनः समीहितमित्येतदभिप्रायकमेवनाट्यभिन्नेपरमित्यत्रकाव्ये शांतरसस्यनिर्विवादतासूचकं परंपदमुपात्तं॥ अतएवाष्टैनाट्ये
रसाः स्मृताइत्युपक्रम्यशांतोपिनवमोरसइतिमंमटभट्टाअप्युपसमहार्षुः॥ शांतंलक्षयति॥ नित्यानित्यवस्तुविचारजन्मनो विषयवि
रागाख्यस्यचित्तवृत्तिविशेषस्येत्यर्थः॥ असावेवालंप्रत्ययइत्युच्यते॥ अत्रैवविषयेष्वनित्यतामतिरूपंविषयदोषविचारंविभावंवक्ष्यति
॥ ननुनिरुक्तनिर्वेदस्यस्थायिभावत्वेशांतेनिखिलविषयपरिहारजन्यात्ममात्रविश्रामानंदप्रादुर्भावमयत्वानुभवविरोधः॥ उक्तंतु॥ यच्चका
मसुखंलोकेयच्चदिव्यंमहत्सुखं॥ तृष्णाक्षयसुखस्यैतेनार्हतः षोडशींकलामिति॥ अतएवसर्ववृत्तिविरामोस्यस्थायिभावइत्यपिनिरस्तं॥
अभावस्यस्थायित्वायोगाच्चेत्यभिप्रेत्याह॥ सर्वानुभवसाक्षिकः कामक्रोधादिरूपदोषापगमावस्थायामात्ममात्रविश्रामसंभूतानंदइत्य

र्थः॥ अत्रैवनिरीहात्मिकांविरक्तिंविभावंवक्ष्यति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. तस्मान्निर्वेदस्यनिरुक्तदोषप्रशमस्वावस्थायित्वमित्युक्तमतभेदेनैवोदाहरणाभेदोवसेयः॥इदंकुप्रसंपत्तिशालिहर्म्यंगृहंहेयमस्थि नौका
८५ रत्वादेतेनविषयदोषबुद्धिरूपआलंबनविभावउक्तः॥निकुंजभवनंश्रेयमाश्रयणीयमेतेनोदासीन्यरूपोनुभावउक्तः॥धनंप्रदेयं
रागद्वेषादिसाधनत्वेनानुपादेयत्वात्तीर्थपयःपेयमनायाससंपत्तेरेतेनहिताहितप्राप्तिपरिहारार्थक्रियाहानिरूपमनुभावांतरमुक्तं
॥भगवतःषड्विधैश्वर्यादिगुणशालिनः॥तदुक्तं॥ऐश्वर्यस्यसमग्रस्यवीर्यस्ययशसःश्रियः॥ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणेति॥
हरेर्विष्णोःपदांभोरुहंगेयमेतेनमतिरूपव्यभिचारिभावःसूचितः॥जन्मदर्भशयनेविरायनेयमेतेनतापसदर्शनमुद्दीपनमुक्तंमनोध

अस्यविषयदोषविचारविरक्त्यादयोविभावाअनुभावाआनंदाश्रुपुलकहर्षगद्गदवचनादयः॥यथा॥ हेयंहर्म्यमिदंनिकुंज
भवनंश्रेयंप्रदेयंधनंपेयंतीर्थपयोहरेर्भगवतोगेयंपदांभोरुहं॥नेयंजन्मविरायदर्भशयनेधर्मेनिधेयंमनःस्थेयंतत्रसिता
सितस्यसविधेध्येयंपुराणंमहः॥यथावा॥वेदस्याध्ययनंकृतंपरिचितंशास्त्रंपुराणंश्रुतंसर्वंव्यर्थमिदंपदंनकमलाकांतस्य
चेत्कीर्तितं॥

र्मेनिधेयमेतेनवेदांतश्रवणाद्युद्दीपनांतरमुक्तं॥तत्रसितासितस्यगंगायमुनयोःसंघातस्यसविधेप्रयागेस्थेयमेते
नतपोवनदर्शनाद्युद्दीपनांतरमुक्तं॥पुराणंमहआत्मचैतन्यंध्येयमेतेननासाग्रदृष्टिरूपोनुभावोध्वनितइति॥चेत्कमलाकांतस्यपदं
नकीर्तितंतर्हीदमध्ययनादिसर्वंव्यर्थंतज्जन्यफलस्यस्पृहायाविनाशादेतेननिरीहात्मिकाविरक्तिरालंबनविभावउक्तः॥आनंदस्य
निर्विषयत्वेपिनहिशेषणप्रशमेसविषयकेक्वाप्रतियोगिकत्वादेवालंबनत्वमत्राध्यवसितमितिबोध्यं॥वेदस्यस्वाध्यायस्याध्ययनंगुरु रामः
मुखोच्चारणानूच्चारणमेतेनवेदांतश्रवणाद्युद्दीपनमुक्तं॥शास्त्रंपरिचितमेतेनमननाद्युद्दीपनांतरमुक्तं॥पुराणंश्रुतमेतेनवैराग्यदार्ढ्यं ८५

प्रतिपादनायनियतकालिकत्वंफलविषयारुचिबीजमुपन्यस्तं॥तत्रदृष्टांतः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्खातं खनितं सदृशीकृतं समीकृतं भूयसांभसा सेको विरचितस्तत्सर्वं निष्फलं भवस्यालवालवलये यदि बीजं न क्षिप्तमेतेन मतिर्व्यभिचारिभावो ध्वनित इति॥ इति श्रीजडउपनामकगंगारामविरचितायां नौकाख्यायां रसतरंगिणीव्याख्यायां सप्तमस्तरंगः॥ दृष्टयस्त्रिविधाः स्थायिभावजा व्यभिचारिभावजा रसजाश्चेति संगीतकशास्त्रानुसारात्स्थायिभावभेदं नियतभेदां दृष्टीराह॥ ता उद्दिशति॥ व्यभिचारिभावजा दृष्टीर्विभजते॥ ता उद्दिशति॥ यद्यपि त्रयस्त्रिंशद्भेदा व्यभिचारिभावास्तेषां दृष्टयश्च विंशतिधेति यथायोगं विनियोगो न

उत्खातं सदृशीकृतं विरचितः सेकोंऽभसा भूयसा सर्वं निष्फलमालवालवलये क्षिप्तं न बीजं यदि॥ इति रसनिरूपणं नाम सप्तमस्तरंगः॥ स्थायिभावजा दृष्टिरष्टधा॥ स्निग्धा हृष्टा दीना क्रुद्धा दृप्ता भीता जुगुप्सिता विस्मिता चेति॥ व्यभिचारिभावजा दृष्टिर्विंशतिधा॥ शून्या मलिना श्रान्ता लज्जिता शंकिता मुकुला अर्द्धमुकुला ग्लाना जिह्माकुंचिता वितर्किता अभितप्ता विषण्णा ललिता केकरा विकोशा विभ्रान्ता विप्लुता त्रस्ता मदिरा चेति॥ रसभेदादष्टधा रसदृष्टिः॥ कान्ता हास्या करुणा रौद्री वीरा भयानका बीभत्सा अद्भुता चेति षट्त्रिंशद्भेदा दृष्टयः॥ कूणिता विकसिता अर्द्धविकसिता चकिता सुप्ता घूर्णिता लसा विवर्तिता पर्यस्ता शून्या स्तिमिता चेत्यादयो दृष्टिभेदा ऊहनीयाः॥

ढुं विवर्तिता

भवति तथापि यथा तासां तेषु विनियोगस्तथा संगीतकशास्त्रे प्रतिपादितं तच्च नातीवोपयुज्यत इति दिङ्मात्रेणेहोच्यते॥ यथा ग्लाना दृष्टिर्ग्लानावपस्मारे च॥ यथा वा विकोशा मनोगर्वे स्मृता उग्रतायां च॥ यथा वा विप्लुतोन्मादे दैन्ये चेत्यन्यत्र विस्तरः॥ रसभेदनियतभेदां दृष्टीराह॥ ता उद्दिशति॥ मतान्तरमाश्रित्याह॥ एवं स्त्रीपुरुषयोः प्रकृत्यवस्थाभेदेनापि दृष्टिभेदोऽस्त्येव परं त्वेवंविधभेदस्य स्वस्वानुभवमात्रवेद्यस्य सर्वसंवादाभावादानन्त्याच्च नासाविह टंकितः॥ तदुक्तं॥ इत्युक्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. षट्त्रिंशत्किलनंताः सुरताराभ्युदकर्मणा॥ संदर्भाद् दृष्टाण्येताः प्रत्येकं वक्तुमक्षमाइति॥ संगीतकप्रसिद्धदृष्टिविशेषलक्षणानुसारे नौका
८६ णदृष्टिविशेषाउदाहरणीयाइतिविस्तरभियादिङ्मात्रमावेदयितुमशोकवनिकान्यायेनललितामुदाहरति॥ तल्लक्षणंतु सभ्रूक्षेपस्मि
तापांगाकुंचितामधुरोन्मुखी॥ ललितालल्नेप्रोक्तादृष्टिर्मन्मथतारकेति॥ हे शशिमुखिकामदेवोवाभूषणंवास्वयंधृतमदोवाभवनंवायौव
नंवा------वयंवेत्यखिलमपि॥ अत्रप्रत्येकंकातार्थ्यद्योतकप्राधान्यप्रतिपादनायसर्वत्रवाशब्दप्रयोगः॥ तेलोचनेनकृतार्थंभ
वतिसकलनिरुक्तवस्त्वभिलषितार्थसंपत्तेः॥ कथंभूतेनलोचनेनवीचीति॥ वीचीनांविक्षेपःसंघट्टनंतेनखेलच्चंचलंयत्कमलंत

तत्रललितायथा॥ मनसिजनृपतिर्वामंडनंवामदोवाशशिमुखिभवनंवायौवनंवावयंवा॥ अखिलमपिकृतार्थंवीचि
विक्षेपखेलत्कमलविजयलीलाशालिनालोचनेन॥ ग्लानायथा॥ पर्यस्तालकरोचिषःश्रमजुषःप्रस्यंदगंडस्थलपःशुभो
श्रीकरशीतलेनशशिनाव्यातंसमातन्वति॥ जीयास्तामचलाधिराजदुहितुर्निस्पंदनीलोत्पलच्छायानिद्रितचंचरीकमि
थुनस्पर्द्धासमृद्धेदृशौ॥ स्यविजयफलिकायालीलाशोभाविशेषस्तेनशालतेतच्छीलेनेत्येवंविधविशिष्टोपमानेननिरुक्तलक्ष गीतगोविंदटीका
णलक्षितत्वमावेदितं॥ तथैवग्लानामुदाहरति॥ तल्लक्षणंतुविनियोगपुरःसरमुक्तंसंगीतके॥ अंतर्निविष्टतारायामलिनामंदचारि
णी॥ विश्लथभ्रूपक्ष्मपुटाग्लानाग्लानौनियोजयेदिति॥ तत्रप्रथमांतयच्छब्देनक्रियान्वयसाकांक्षस्यद्वितीयांतस्यतदोध्याहारादन्व
यःसंपद्यते॥ अचलानांपर्वतानामचलेषुवाधिराजःश्रेष्ठोहिमालयस्तस्यदुहितुःकन्यायादृशोभ्युदाक्लिन्नकनीनिकेजीयास्तांसर्वोत्कृ राम:
ष्टेभूयास्तां किंभूतेदृशौनिस्पंदेति॥ निश्चलस्यनीलोत्पलस्यच्छायायांनिद्रितस्यभ्रमरयुगलस्यस्पर्द्धयासमृद्धे॥ एतेनलक्षणवाक्यघटकपू ८६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्तरार्द्धार्थंसंगमयतिसस्यंतं॥शंभौशिवेसीकरैर्जलकणैः कृत्वाशीतलेनशिशिरीकृतेनस्वतःशीतलस्यापिनश्रमापनोदकत्वंश्रमबाहुल्या
दित्यभिप्रायकमिदंविशेषणं॥शशिनाचंद्रेण॥शेखरशीतलेनेतिपाठेचंद्रवच्छीतलेनेत्यर्थः॥शशिनेत्यस्यचंद्राकारव्यंजनेनेत्यर्थः॥वस्तु
तस्तुशेखरेणोत्तंसेनातएवस्वसमीपवर्तिनातएवचानुभूतश्रमहरणस्वभावेनगंगाजलेनेतिनिर्गलितोर्थः॥वातंसमातन्वतिसति॥
किंभूतायाअचलाधिराजदुहितुः पर्यस्तेति॥पर्यस्ताविकीर्णाअलकानांरोचिर्नामदीप्तिर्यस्यास्तस्याः पुनः कीदृश्यास्तस्याः श्रमेति॥विप
रीतरतगर्भादिप्रयुक्तश्रमभाजः॥पुनःकीदृश्यास्तस्याःप्रस्यंदेति॥अतिशयितकंपशालिनीगल्लशोभायस्यास्तस्याइत्यर्थः॥दिक्प्रदर्शन

एवमन्याअप्युदाहरणीयाः॥अथरसानांजन्यजनकभावः॥तत्रभरतः॥शृंगाराद्धिभवेद्धास्योरौद्राच्चकरुणोमतः॥वीराच्चा
दद्भुतोत्पत्तिर्बीभत्साच्चभयानकः॥अयमुत्सर्गःपरेषामपिरसानांकार्यकारणभावदर्शनात्॥पूर्वग्रंथकारसंमतिरपि॥क
थासंग्रहयोगाच्चविवक्षावशतःकवेः॥अन्योन्यंजन्यजनकारसभावाभवंत्यमी॥

मात्रमेतदित्याह॥तद्यथाममा॥मृगयावेषबा
धप्रधावितमृगीविलक्षदृष्टिरिव॥घनपटलंपश्यंत्यास्तस्यादृष्टिर्मयादृष्टा॥तत्रेयंशंकितादृष्टिः॥तल्लक्षणंतुयथामूढेवायतातिर्यङ्मुहु
श्चकिततारका॥नातिस्थिरानिवृत्ताद्वैवीक्षणाबहिरुन्मुखी॥शंकायांशंकितादृष्टिर्नात्यविद्भिरुदाहृतेतिबोध्यं॥प्रसंगादाह॥रसा
नांस्थायिभावानां॥रसानामखंडानंदमयत्वेनजन्यजनकभावासंभवात्॥शृंगारादितिरत्तेरित्यादिबोध्यं॥इतरपरिशेषमसहमानआ
ह॥तत्रसंमतिमाह॥कथायांवर्णनीयस्येत्यादिः॥संग्रहःसंदर्भविशेषस्तस्ययोगोघटनातस्मादित्यर्थः॥एतेनकार्यकारणभावस्यस्वतः
संभवित्वंदर्शितं॥कविप्रौढोक्तिनिष्पन्नत्वंदर्शयति॥कवेरिति॥विवक्षावशतश्चेतियोजना॥रसभावाइति॥रसाभावाश्चेत्यर्थः॥व्याख्या

ततत्वमेतत्॥यद्वारसानांभावाःस्थायिभावाइ
त्येवार्थः॥तत्राद्यमुदाहरति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मातुरेणुकायाउदारांप्रगुणीभूतांदृशावेवांभोरुहयुगलंजलप्रभवलात्तस्माद्गलंतींस्रवंतींलसदितिपाठेतत्रलसंतींभासमानां नौका
वाष्पधारांदृष्ट्वातातस्यजमदग्नेर्वक्षःस्थलसंबंधिरुधिरंचयंशोणितकूटंचप्रेक्ष्यक्रुध्यताक्रोधभाजाभार्गवेणपरशुरामेणसहस्रार्जु
नस्यदमनसमारंभेणादलनोद्योगेनगंभीरंयद्वीर्यंतेनस्फूर्जंतीयादोर्वल्लिस्तत्संबंधियद्भल्लीसकंनृत्यंतस्यसकलकलायाःकौशलस्य
सूत्रधारःप्रवर्तकाचार्यःकुठारोहस्तेन्यस्तइत्यर्थः॥द्वितीयमुदाहरति॥हेसुभगतवारिभटःप्रतिपक्षयोद्धाविपरीतेरतविधावधि

यथा॥मातुर्दृष्ट्वादृगंभोरुहयुगलगलद्वाष्पधारामुदारांतातस्यप्रेक्ष्यवक्षःस्थलरुधिरचयंक्रुध्यताभार्गवेण॥हस्तेन्यस्तः
सहस्रार्जुनदमनसमारंभगंभीरवीर्यस्फूर्जद्दोर्वल्लिहल्लीसकसकलकलासूत्रधारःकुठारः॥अत्रवीरंप्रतिकरुणबीभत्स
योःकारणता॥यथावातातचरणानां॥कुरंगास्यावेणींसुभगविपरीतेरतविधावधिस्कंधंदृष्ट्वाकिमपिनिपतंतीमरिभटः
॥अधिग्रीवंयुष्मत्स्वचलकरवालव्यतिकरंस्मरन्नेवस्तब्धोविरमतिपरीरंभणरसात्॥अत्रभयानकंप्रतिशृंगारस्यकारण
ता॥यथावा॥युधिक्रुपितकृतांतस्यंदनस्येवनादंदिशिदिशिदशकंठस्यक्तवान्वारिदास्त्रं॥तडितिजनकपुत्र्याःसाम्यमालो
कमानस्त्यजतिनपवनास्त्रंराघवःस्विन्नपाणिः॥ स्कंधमंसेकिमपिकिंचिद्देशेननिपतंतींकुरंगास्याहरिणलोचनायावेणींकुंतलजूटींदृ
ष्ट्वाधिग्रीवंग्रीवायांयुष्मत्स्वचलकरवालव्यतिकरंभवदीयस्यप्रकंपनशालिनःकरवालस्यखड्गस्यव्यतिकरंसंबंधंस्मरन्नेवस्मरणसमका
लमेवस्तब्धःसन्परीरंभणरसादालिंगनावेशाद्विरमतिनिवर्तइत्यर्थः॥कविविवक्षावैचित्र्यंदर्शयितुंप्रकारांतरेणोदाहरणांतरमाह॥द रामः
शकंठोरावणोयुधिसंग्रामेकुपितेतिक्रुद्धकालरथ्यचक्रघोषाधिकध्वनिवारिदास्त्रंदिशिदिशित्यक्तवांस्तडितिवारिदप्रादुर्भूतसौदामि ८७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यांजनकपुत्र्याःसीतायाःसाम्यंसादृश्यमालोकमानःसाक्षात्कुर्वाणोराघवःखिन्नपाणिःसन्नवंनास्त्रंवापस्त्रंनत्यजतीत्यर्थः॥एतेषांनिरू
पितरसानां॥अंगांगिभावापन्नानामविरुद्धानामेकत्रसमावेशइतियावत्॥रससंकरइति॥बहुविधालंकारसंपातेप्रभाविशेषेणेवा
नेकरससमेलनेचमत्कारातिशयेनविभिन्नव्यवहारविषयत्वसौचित्यादितिभावः॥तथाचांगत्वप्रकारेणभासमानस्वस्थायीतरस्यापि
कत्वंतत्वंबोध्यं॥लोकालपंतीति॥व्यक्तीभविष्यतिचैतदुपरिष्टात्।रससंकरव्यवहारवदूमशवलव्यवहारस्यापिविषयंदर्शयितुंभूमि
कामारचयति॥विरोधइति॥द्विविधोविरोधइत्यर्थः॥द्वैविध्यंचतदधिकरणानुवृत्तित्वतज्ज्ञानप्रतिबद्धज्ञानकत्वभेदेनबोध्यं॥नन्वयंविरोधः

अत्रशृंगारंप्रतिवीरस्यकारणता॥एतेषामंगांगिभावापन्नानांरससंकरइतिनामलोकालपंति॥रसानांमिथोविरोधो
पि॥तत्रभरतः॥शृंगारबीभत्सरसौतथावीरभयानकौ॥रौद्राद्भुतौतथाहास्यकरुणौवैरिणौमिथः॥वैरिरसइववैरिर
सस्यविभावानुभावव्यभिचारिभावाअपिरसहानिकराइतितानपिवारयेत्॥

किंसर्वेषामेवाहोस्वित्केषांचिदेव॥नाद्यः॥दर्शित
रससंकरव्यवहारस्यनिर्विषयत्वापत्तेरविरोधसमुच्चायकापिशब्दानर्थक्यापत्तेश्च॥नांत्यः॥यतस्तेकइत्याकांक्षायामुक्तकार्यकारणभावा
पन्नव्यतिरिक्तादितिपरिशेषाद्वाच्यं।तच्चनयुज्यते।तथाभूतयोरपिशृंगाराद्भुतयोरविरोधात्।तस्मात्केषामसौभवतीतिपर्यवसिताशंका
यांययोर्ययोर्विरोधस्तान्विशिष्यदर्शयति॥यद्यपिपंचमषष्ठयोर्लघुगुरुत्वस्यासौसोऽत्रदृश्यतेनतथापिगुरोर्लघुप्रयत्नोच्चारणेलघुत्वमेवमन्य
स्यान्यथोच्चारणेऽन्यथात्वमित्यभिप्रायान्नासंगतिः॥हास्यकरुणाविति॥कार्यीभूतहास्यविरोधिनःकरुणस्यकारणीभूतशृंगारविरोधो
पुक्तप्रायएवेतिनपृथगुक्तिरितिमंतव्यं॥अतएवकरुणविप्रलंभाख्यंरसांतरमामनंति॥विरोधप्रदर्शनस्यफलंदर्शयन्नन्यदपिप्रसंगादाह

विभावानुभावव्यभिचारिभावाइति॥प्रत्येकमि
निशेषः॥

CC-0. Mumukshu Bhawan Varanasi Collection: Digitized by eGangotri

र॰त॰ ८८

एवमग्रेपि॥तत्रफलीभूताकथने॥ब्रूयादिति॥असाधारणैर्विशेषणैर्नब्रूयादित्यर्थः॥नितांतंयौवनोन्मत्ता गाढरक्तामहाहवे॥वसुंधरां समालिंग्य शेरतेवीरतेरयइत्यादौसाधारणविशेषणमहिम्नाविरुद्धयोः शृंगारबीभत्सरसयोरभिव्यक्तावपितयाकथनस्यदोषत्वाभावे नयथाश्रुतासंगतेः॥अत्रासहायत्वतात्पर्यकत्वार्थकनविभावकमितिकनानञ्जात्पर्याच्यव्यत्वानांविरोधित्वउक्तेसमस्तविरोधाप्यो विस्यायातइतिस्फुटयितुंवैरिरसइवेतिदृष्टांतीकृतमधस्तात्॥किंतर्हिसर्वथावैरिणएकत्रनिबंधोनकर्तव्यएवेत्याशंक्यकर्तव्यःपरं तुविरोधंपरिहृत्येतिवक्तुमुपक्रमते॥अंगत्वात्रुपपत्त्यांगभावमापन्नस्यांगांतरेणांगिभावमापन्नस्यत्वंगेनविरोधएवनेतिविवक्षितमर्थं सूचयितुमंगांगिभावानापन्नयोरित्युक्तं॥एकदेशेसतीति॥विरोधभंजकावच्छेदकैक्यसतीत्यर्थः॥देशपदेनकालस्याप्युपलक्षणात्॥क

तत्रप्राचीनसंमतिः॥नचवैरिरसंब्रूयाद्वैरिणोनविभावकं॥नानुभावंनसंचारिभावंचापिकदाचनेति॥किंत्वंगांगिभावा नापन्नयोरेकदेशेसतिवैरंदेशभेदेसतिनवैरं॥वृक्षेकपिसंयोगतदभावयोरिव॥समयभेदेसत्यपिनवैरंभूतलेघटतदभा वयोरिव॥ चिदेकदेत्यपिपाठः नचैवंकालभेदेनविरोधपरिहारस्यानुदाहृतत्वादनोक्तिरितिवाच्यं॥वक्ष्यमाणदेशभेदोदाहरणए वनानारसाःपाणयइत्यत्रनानाधयोनेहसइत्यूहितपाठेतात्पर्यान्नानार्थेषाधीयंतेनियम्यंतइत्यादिस्वतदर्थोवहितैःकरणैरयइतिदि क्॥देशभेदेसतिदेशभेदेपिसति॥अपिनाधिकरणभेदपरिग्रहः॥नवैरमिति॥नाद्योविरोधइत्यर्थः॥समयभेदेसत्यपीति॥उदासीन चर्वणाव्यवहितचर्वणाकत्वेपिसतीतियावत्॥इत्थंचप्रतिबंधकाभावःसंपद्यतइतिफलितार्थः॥नवैरमिति॥नहितीयोविरोधइत्यर्थः ॥चिरंतनवासनारूपस्यापिनामधुनाव्यापृत्तितयाधुनिकविभिन्नकालावच्छेद्यत्वाभावेनयथाश्रुतासंगतेः॥नचोद्बोधविशिष्टस्यापिनआ

नौका

रामः ८८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सेवसर्वदालौकिकस्यशृंगारस्यवीभत्सस्यवानुद्बोधादितिवाच्यं॥यत्रोदाहरणेतथाविधविभिन्नकालावच्छेद्यत्वप्रतीतिरास्तांतस्मिंस्त
था॥तदभिप्रेत्यैवदेशपदार्थौविरोधभंजकावच्छेदकत्वेनानुगतीकृत्यदर्शितोस्माभिः॥प्रकृतेतुतथाविधविभिन्नकालावच्छेद्यत्वाप्रती
त्यावक्ष्यमाणसमयभेदोदाहरणासंगत्यापत्तेर्दुर्वारत्वात्॥उक्तसमयभेदोदाहरणस्योहनीयत्वेवक्ष्यमाणोदाहरणस्योपलक्षितज्ञान
विरोधोदाहरणपरत्वेचसंदर्भासंगतेः॥नचैवंघटतदभावयोरितिदृष्टांतवैषम्यमितिवाच्यं॥अनायत्याप्रतीत्योरित्यस्यपूरणेनसामंज
स्यात्॥वर्तमानकालकर्तृकचकरजदेशैक्यादुभयरूपोपिविरोधोयथेत्यर्थः॥असावन्वयमुखःश्लोकःस्पष्टार्थएव॥इत्थमन्यूनबलप्रति

वैरं यथा॥प्रियेणालिंग्यमानायाःप्रियायाःकुचकुंभयोः॥करजक्षतनिर्मुक्तंरुधिरंकुंकुमायते॥देशभेदेसतिविरोधाभा
वोयथा॥एकःसिंधुभुवःकरेविलुलितश्चक्रेद्वितीयःस्थितःकामध्वंसिनिकालकूटकवलक्लिष्टेतृतीयोधृतः॥भूयःक्षीरनि
धेर्घनप्रमथनेसक्तश्चतुर्थस्तथापायासुःकमलापतेर्भगवतोनानारसाःपाणयः॥ कूलरसांगानांनिबंधोनकर्तव्योयतःप्रति

कूलांगंप्रकृतपुष्टिंबाधेतसुंदोपसुंदन्यायेनवोभयोःप्रहतिःस्यादितिप्रघट्टकार्थः॥वस्तुगत्याधिकरणभेदाभावेपिनिरुक्तदेशभेदविव
क्षामात्रेणापिविरोधपरिहारोभवतीतिदर्शयन्नाद्यविरोधपरिहारमुदाहरति॥कमलापतेर्लक्ष्मीकांतस्यभगवतोनारायणस्यनानारसाः
विभिन्नावच्छेदकावच्छिन्नतत्तत्स्थायिज्ञापकविभिन्नचेष्टाभाजःपाणयःपायासुरेकोन्यतमःसिंधुभुवोलक्ष्म्याःकरेविलुलितःकंपमा
नोनिहितोद्वितीयस्तदन्यःकश्चिच्चक्रेस्थितस्तृतीयोद्वाभ्यांविलक्षणःकश्चित्कालकूटकवलक्लिष्टक्ष्वेडग्रासविह्वलेकामध्वंसिनिशिवे
धृतश्चतुर्थोनशिष्टस्तुभूयःपदंलोकानुकृतिंप्रकटयद्वाक्यालंकारकमेवक्षीरनिधेःसमुद्रस्यघनप्रमथनेइतरप्रयत्नानिष्पाद्येतस्यप्रकृष्ट
मथनेनतथाकरुणयैवसक्त इत्यर्थः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. नानाप्राणिरूपावच्छेदकभेदादेकाधिकरणकत्वेनप्रसक्तस्याप्यविरोधस्याप्यभावइत्यर्थः॥कामरिपोर्महादेवस्यधनुर्भग्नंराज्यंपरि नौका
८८ हृतंत्यक्तंकानने स्थितंत्रिशिरा निर्भिन्नःखरस्यापिशितंस्पृष्टंकपिर्लालितोलंकेशोदलितोलंकावधूनांरुदितंचिरायबहुकालंकृतंवि
देहभूःसद्मनीताप्रापितातद्रामस्याखिलंकर्मलोकोत्तरमित्यर्थः॥विरुद्धयोरव्यवहितचर्वणाकत्वेनतथैवप्रसक्तस्यहितापविरोधस्या
प्यभावइतिभावः॥नचकरुणशृंगारयोरव्यवहितचर्वणाकत्वाद्विरोधस्वेतिशंक्यं॥तयोरधिकरणभेदात्॥नास्त्येवानयोर्विरोधइतिद्वय

अत्रशृंगाररौद्रकरुणाद्भुतरसानांविरोधाभावः॥समयभेदेनयथा॥भग्नंकामरिपोर्धनुःपरिहृतंराज्यंस्थितंकानने निर्भिन्न
स्त्रिशिराःखरस्यपिशितंस्पृष्टंकपिर्लालितः॥लंकेशोदलितश्चिरायरुदितंलंकावधूनांश्रुतंनीतासद्मविदेहभूस्तदखिलंरा
मस्यलोकोत्तरं॥अत्राद्भुतशांतभयानकरौद्रबीभत्सहास्यवीरकरुणशृंगाराणांविरोधाभावः॥अंगांगिभावानापन्नानांरसा
नांनिवेशोयत्रसरसशबलइतिवेदितव्यं॥तस्याप्येतदेवोदाहरणं॥अंगयोर्वैरेपिनरसहानिर्भटयोर्वैरेप्रभोरिव॥यथा
॥सीतांसंस्मरयंश्चिरचलकुवलयस्पर्द्धिचक्षुःक्षिपंतींसेनांसंवीक्ष्यरस्सःशरदलितवपुःशोणितासारसिक्तां ॥ ॥

स्याद्भुतसूत्रानुरोधिनः॥अंगांगिभावानापन्नानामिति॥विरुद्धानामितियावत्॥एतदेव॥भग्नमित्याद्येव॥कालभेदेसतिपूर्वपूर्वोप
मर्दस्यापिसद्भावादितिभावः॥तथाचविरोधप्रकारेणाभासमानस्वस्यायीतरस्यायिकत्वंतत्त्वंबोध्यं॥प्रकारांतरेणापिविरोधपरिहारंद
र्शयति॥नरसहानिरिति॥द्वयोःसमत्वेस्यप्रधानरसांगत्वादुपपत्तेरितिभावः॥रामेणचिरप्रचलकुवलयस्पर्द्धिचंचलंचक्षुःक्षिपंतींसीतां रामः
संस्मरयरस्सांशरैर्दलितानांविदारितानांवपुषांशोणितानामासारैर्धारासंपातैःसिक्तांसेनांसंवीक्ष्यक्रोधेनतत्कार्योविवेकादिनाहृष्यतोगवि ८८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्ट्यद्दशमुखस्य निपततां मुण्डानां लाभात्प्रमोदेन हर्षेण क्रीडंत्याः काल्याः करालाया भ्रुकुट्याः सहचरी कौटिल्यान्निधननिदानत्वाच्च
चापयष्टिः संदधे इत्यर्थः॥ अत्र कार्यशेषप्रतिपत्तये काऽयानंतरभाव्युपमानतोक्ता॥ तुल्यायुक्त्याङ्गाङ्गिभावोऽपि विरोधभंजक इत्याह॥ विरो
धिनोरिति॥ एतेनान्योन्यांगांगिभावापन्नयोर्नेत्वन्यान्यांगांगिभावापन्नयोरित्युक्तं॥ अविरोधिनोरिति पाठे तु एवेत्यादिः॥ नरसहानिरिति
।प्रधानरसंप्रतिगुणीभूतरसस्यांगत्वानुपपत्तेरिति भावः॥ दशकंधरेण भौजंगमं वा गिरिमयं वा जलदात्मकं वा यदेव शस्त्रं मुमुचे विदेह
तनया विरहाकुलेन रामेण तत्सर्वं वह्निमयशस्त्रमिव व्यलोकि दृष्टमित्यर्थः॥ अत्र भयानके वीरस्यांगत्वादविरोधः॥ नन्वसौ द्विविधः

रामेण क्रोधदृप्यद्दशमुखनिपतन्मुंडलाभप्रमोदक्रीडत्कालीकरालभ्रुकुटिसहचरी संदधे चापयष्टिः॥ अत्र शृंगारबीभ
त्सयोर्विरोधेऽपि न रसहानिः॥ एवमंगांगिभावापन्नयोर्विरोधिनोरेकत्रभावेऽपि न रसहानिः॥ यथा॥ भौजंगमं गिरिमयं जल
दात्मकं वा शस्त्रं यदेव मुमुचे दशकंधरेण॥ सर्वं विदेहतनयाविरहाकुलेन रामेण वह्निमयशस्त्रमिव व्यलोकि॥ नन्वबीभत्स
शृंगारयोः सहजवैरं कृतो मधु निपीय निष्ठीवतः संभोगदर्शनादिति चेत्॥ सत्यं॥ बीभत्सस्य जुगुप्सा स्थायिभावः॥ स्वनिष्ठः परनि

ष्ठश्चेत्युक्तं तत्र स्वयं मधु निपीय निष्ठीवतः स्त्रीपुंसयोर्द्वयोरपि संभोगदर्शनात्कथं शृंगारबीभत्सयोर्विरोध इत्याशंकते॥ किमत्र तटस्थस्य
बीभत्सेन विरोधः शृंगारिणोरेव वा तेन सहासावभिमतः॥ नाद्यो धिकरणभेदाद्विरोधप्रसरस्यैवाभावात्॥ नांत्यः॥ रागोत्कर्षे नान्यतरस्या
पि जुगुप्साया अभावादित्याशयेनोत्तरयति॥ तटस्थस्येति॥ एतेन रतिक्रोधोत्साहभयशोकविस्मयनिर्वेदेषु प्रागुदाहृतेषु यथालंबनाश्रय
योः पृथक् प्रसपोन तथा हासे जुगुप्सायां च सर्वत्र क्वचिदालंबनस्यैव प्रतीतेः॥ मध्यश्रोतुश्च रसास्वादाधिकरणत्वेन लौकिकहासजुगुप्साश्रय

र.त. तथाचतत्रविभावयोरालंबनाश्रयरूपयोःसम्यगप्रतीत्याकथंरसोद्बोधःस्यादितिपरास्तं॥तत्रापितटस्थस्यतथाविधस्याक्षेप्य नौका
१० त्वात्॥तस्यानाक्षेपेपिश्रोतुःस्वकीयकांतावर्णनपद्यादिवरसोद्बोधेबाधकाभावाच्चेत्यपिद्रष्टव्यं॥देशभेदाद्यभावेपिद्वयोरेककाल
तास्त्येवेतिपुनःशंकते॥तथाप्यधिकरणभेदादिनानिरुक्तस्थलेविरोधवारणायेत्यर्थः॥बीभत्सइतिसतीतिशेषः॥नेवतथादृष्टमि
तिविप्रतिपन्नंप्रत्याह॥यदपिशिवस्यहृदिविशालामुंडमालावर्ततेपाणिर्नरकपालंनत्यजतिचेलंरौरवंचर्मभवतितदपिगिरिसुता

साचतद्दर्शनेनतटस्थस्यभवतिनतुतयोरागोल्कस्यादिति॥ननुतथापिबीभत्सेशृंगारोदृश्यते॥तथाहि॥यदपिहृदिवि
शालामुंडमालानपाणिस्त्यजतिनरकपालंरौरवंचर्मचेलं॥तदपिगिरिसुतायाःपक्षपातःपुरारौसमुदयतिविचित्रःकामि
नोःप्रेमबंधइत्यादावितिचेत्॥सत्यं॥निजभर्तुरधमेपिभूषणेभक्त्यतिशयेनपत्न्यास्तत्रजुगुप्सैवनावतरतिजुगुप्सितत्वे
नप्रतीयमानमेवहिजुगुप्सोत्पादकंभवति॥किंचप्रियसंबंधोपाधिकमधिकंतत्रप्रेमैवोत्पद्यते॥तस्मात्स्थायिभावाभावाद्बी
भत्सस्तत्रनजायतइति॥

याःपार्वत्याःपुरारौशिवेपक्षपातःप्रेमातिशयःसमुदयत्यतएवकामिनोःप्रेमबंधोविचित्रोबाधकेना
प्यनपनोद्यइतिप्रतीमइत्यर्थः॥नायकेरागोल्कस्यादिवनायकभूषणेपिभक्त्यतिशयान्नजुगुप्सेत्युत्तरितप्रायमेवेत्यभिप्रेत्याह॥
अधमेपिवस्तुतोजुगुप्सितत्वेसत्यपि॥तत्रभर्तरि॥जुगुप्सितत्वेनदोषदूषितत्वेन॥जुगुप्साहेतुभूतस्यभूषणेजुगुप्सितत्वावगमस्य
प्रतिबंधकस्यभक्त्यतिशयस्यसत्तामुपपाद्यजुगुप्साविरोधिशृंगारसामग्रीसत्ताकैमुतिकन्यायेनोपपादयति॥तत्रभूषणे॥तस्मादिति रामः
॥भर्तृभक्त्यतिशयेनभूषणेजुगुप्सितत्वावगमस्यहेतोरभावादित्यर्थः॥स्थायिभावाभावाद्भूतेभूषणेजुगुप्साव्यंजकत्वाभावात् ॥ १०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यद्यप्यत्र प्रकरणे रसशब्देन स्थायिभावमात्रं गृह्यते। खंडानंदमयस्य विरोधासंभवादित्युक्तप्रायमेव तथाप्येकतरबाधेनैकतरस्त
त्र को नु मंतव्य इति जिज्ञासुं प्रत्येतदुत्तरमित्यवधेयं॥ वीरभयानकयो रौद्राद्भुतयोश्च विरोधे शंकते॥ एकस्य संभृतसामग्रीकत्वेनादित
रस्याधीनभवत्येवेति समाधत्ते॥ रसावेशाद्वा गौणत्वं स्यात्॥ द्वयोरनयोः स्थायिभावयोरेकाधिकरणे समुपलंभेप्यधिकरणभेद इव
विषयभेदोपि विरोधभंजको भवतीति प्रतिपादयति॥ विषयभेदमेवाह॥ रौद्राद्भुतयोर्विषयभेदमुपपादयति॥ वैरिरसं वारयेदिति
प्रागुक्तं॥ उदाहृतं चांगयोरंगांगिनोर्वा वैरं तत्कथमेतदित्याशंक्य नत्त्रप्रबलैर्विरोधिनो रससंयोगैर्यथा विद्यमानेष्वपि संयोगेषु प्रकृतरसाभि

ननु वीरस्य युधि गच्छतः सर्पस्पर्शे चकितत्वादृश्यते॥ रौद्रे चाकस्मिकोत्पातातिपाते विस्मय इति चेत्॥ चकितता विस्मयश्च
तत्र रसावेशात्त्वभवत्येव॥ सति वा विषयभेदः॥ वीरस्य न प्रतिभटाद्भयं किंतु भुजंगमात्॥ रौद्रे च न प्रतिबलबलाधिक्याद्विस्म
यः॥ किं तूत्पाते॥ रसवैरस्योत्पादकमखिलमवधेयं॥ व्यक्तेः प्रतिबंधो वापकर्षो वा स्यात्तथा वचनं न कार्यमित्येवाभिप्रेतं न तु सर्वथै
व विरोधिरसप्रतिपादकं न वाच्यमिति नियमः॥ वैरिविजयकृतवर्ण्यशोभाधायकस्य बाध्यत्वेन विरोधिरसनिबंधनस्य प्रकृतं रसं परिपो
ष्टकत्वेनात्यंतोपादेयत्वादित्याह॥ केचित्तु विरुद्धो रसो येषां ते विरसास्तेषां भावो वैरस्यं विरुद्धो रस इति फलितोर्थः॥ तथा च प्रकृतर
सविरुद्धरसव्यंजकं निरसनीयमित्याहुः॥ तन्न॥ वैरिरस इवेत्यादिना पौनरुक्त्यापत्तेः॥ पूर्ववदित्यर्थकतथेत्युक्त्वान्यार्थकान्यत्वेति च सं
दर्भासंगतेश्च॥ अन्ये तु वैरस्यं नाम पानकपाने सिकतापातेनेवारुंतुदत्वमिति तद्धेतुर्वचनादिर्वर्ज्य इत्याहुः॥ तदपि न॥ वक्ष्यमाणानौचित्येन ग
तार्थत्वात्॥ किंतु रसस्य वैरं प्रतिबंधो वापकर्षो वा तस्येति व्युत्पत्त्योपदर्शितार्थकमेव॥ अखिलं न तूक्तमात्रं॥ अवधेयं विरुद्धरसवन्निरसनी

यत्वेन द्रष्टव्यं॥ अखिलपदार्थं विवेचयितुं तत्र संमतिमाह॥

90

र.त. अन्यच्च वैरिरसमित्युक्तान्यत्॥ वैरस्योत्पादकमपकर्षहेतुः॥ वचनमिति॥ सामान्यतो विशेषतश्च प्रकृतरसप्रतिपादकं रसशृंगारादि नौका
९१ शब्दस्वरूपमित्यर्थः॥ यथेत्थमविरोधसंपादनेन निबध्यमानोपि रसो रसशब्देन शृंगारादिशब्दैर्वा नाभिधातुमुचितो नास्वाद्यतापत्तेस्त
दास्वादे व्यंजनामात्रनिष्पाद्यत्वस्य सर्वसंमतत्वात्॥ न च पदवाच्यत्वेपि व्यंजनायां न दोष इति वाच्यं॥ व्यंग्यस्य प्रतीतौ पुनर्वाच्योक
रणे सामान्यतो वमनाख्यदोषात्॥ अन्यथास्वाद्यतावच्छेदकरूपेण प्रतीतिजनकव्यंजनोपासनाया आवश्यकत्वे रसस्य लेपदवा
च्यत्वस्य कापेयकल्पत्वेन विशेषदोषाच्च॥ तयास्थायिनां व्यभिचारिणां वा पदवाच्यत्वं दोषो निरसनीयः कविनेति दर्शयति॥ उपल
क्षणमित्यस्य प्रकृतरसस्थायिव्यभिचारिणोः सामान्यतो विशेषतश्च प्रतिपादकस्य वचनस्येत्यादिः॥ उक्तन्यायमन्यत्रातिदिशति॥

तत्र पूर्वाचार्याः॥ अन्यच्च रसवैरस्योत्पादकं वचनं तथा॥ न वाच्यं रसभावज्ञैर्नाट्यशास्त्रविशारदैः॥ वचनमित्युपलक्षणं
॥ एवं विभावानुभावेष्वपि द्रष्टव्यं॥ यथा॥ क्वाहं क्व त्वं क्व मधुसमयः कुत्र वा दूतिकासौ मेघच्छायाप्रतिचलमिदं प्रेमवाक्कुत्र यूनोः॥

प्रकृतरसस्य विभावतावच्छेदकरूपेणानुभावतावच्छेदकरूपेण वा प्रतीत्यजनकं विलंबितप्रतीतिजनकं वा वचनमप्यपकर्षहेतुर्न वा
च्यमित्यर्थः॥ वस्तुतस्त्वखिलरसानां स्थायिनां व्यभिचारिणां वा सामान्यतो विशेषतश्च प्रतिपादकं वचनं॥ उपलक्ष्यमेवाहैवमिति॥ वि
भावानुभावविषयोप्यपकर्षहेतुर्वचनं न वाच्यमित्यर्थः शेषं पूर्ववदिति ऋजुव्याख्या॥ बुद्ध्यारोहाय निषेधप्रतियोगिभूतं विरुद्धांगसम
बलमुदाहृत्याधिकबलमप्युदाहरन्नेव स्थायिनः पदवाच्यत्वमपि तथाभूतमुदाहरति॥ मानवतीप्रसाधनस्य दूत्यादिद्वारा कर्तुमशक्य रामः
तामन्वानस्योक्तिरियं॥ अहं क्व त्वं क्वात्र द्वौ क्व शब्दो महदंतरं बोधयतस्तेनावयोः समागमः काकतालसमागमसदृश इति भावः॥ मधुसमयो ९१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

असौ संघटनकालोचितवाक्यपटुर्दूतिका वा कुत्रेत्यनेन त्वया समारोप्यमाणोप्यपराधोस्मत्तो संभावित एवेति व्यज्यते॥ मेघच्छायाप्र
तिचलमित्यनेन यत्किंचिद्वश्यंभावितया सदागतिसमशीलमावयोर्विघटनकारणमप्यनिवारणीयमेवेति सूचितं॥ इदं स्वाभावि
कं तेन कालांतरे स्वयमेवास्योद्रेके पश्चात्तप्ता भविष्यसीति सूचितं॥ यूनोर्युवा च युवतिश्चेति द्वयोः प्रेम वा कुत्रेत्यनेनाकस्मिकतोक्ता
॥ स्वकीयप्रार्थनाया अपि वैफल्यमाशंकमानो बलात्प्रवर्तयितुं बलवत्तरानिष्टं प्रतिपादयति॥ आयुरिति॥ तत्र वायुप्रचलनलिनीवारि
बिंदूपमानमित्यनेन स्वभावतो नश्वरस्य नाशसाधनसंपत्तिरनायासिनैवेति सूचितं॥ हे मुग्धे स्वनोनुष्ठेयाननुष्ठेयविवेकरहिते मानं वि
सृज हितोपदेशादिति भावः॥ स्वार्थपरायणस्य तवक्तो हितत्वमिति त्वमाशंकिष्ठा इत्यभिप्रायेणाह॥ सकलमिति जगत्तुच्छमेव स्वार्थसा

आयुर्वायुप्रचलनलिनीवारिबिंदूपमानं मानं मुग्धे विसृज सकलं तुच्छमेव प्रतीमः॥ अत्र निर्वेदप्रतिपादकमखिलं त
च्छृंगारविरोधि॥ अनौचित्यं च सर्वथावधेयं॥

धनविकलमेव निर्वेदात्स्वतीमोवगच्छाम इत्यर्थः॥ बलात्प्रवृत्तावपि कषा
यपानप्रवृत्तिवद्दरुंतुदतास्त्येव न परं सितोपलावलेहनप्रवृत्तानिविकरसतेति हीनबलः शृंगारः प्रबलेन निर्वेदांगेन तुच्छताप्रत्य
येन बाध्यते वेति प्रघट्टकार्थोप्यबाधित एवेति भावः॥ रसं निरूप्य रसाभासं निरूपयितुमुपक्रमते॥ रसप्रतिकूलमित्यादि॥ ब्रह्म
न्नध्ययनस्य नैष समयस्तूष्णीं बहिः स्थीयतां स्वल्पं जल्प बृहस्पते जडमते नैषा सभा वज्रिणः॥ वीणां संहर नारद स्तुतिकथाल
पैरलं तुंबुरो सीतारल्लकभल्लभग्नहृदयः स्वस्थो न लंकेश्वर इति कस्यचिन्नाटकस्य पद्ये विप्रलंभशृंगारांगीभूतवीररसाक्षेपकप्र
भैष्वर्यपोषकतया स्थितस्य दौवारिकवचनस्य ब्रह्माद्यधिक्षेपपरस्यानौचित्यदोषत्वाभावेन यथाश्रुतासंगतेरित्यन्यत्र विस्तरः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. अनौचित्यस्यस्वसाक्षाद्देवरसदोषत्वान्नपरंपरकीयविभावादिवत्स्वरमुखनिरासकृतयेत्याविष्कर्तुंसर्वथेति॥अवश्यमेवनतुय नौका
९२ त्किंचिदेवप्रकारविशेषविशिष्टमेवेत्यर्थः॥तेनव्यभिचारिणांपदवाच्यत्वंनसर्वदोषः॥यत्रेतरव्यावृत्तोनानुभावस्तत्रतस्यादो
षत्वादित्यपिसूचितं॥तदुक्तं॥नदोषःस्वपदेनोक्तावपिसंचारिणःक्वचिदिति॥तत्ररसप्रातिकूल्यमन्वयव्यतिरेकाभ्यांप्राचीनग्रंथ
कृदुक्ताभ्यांदृढयितुमाह॥कुतोनौचित्यंपरिहरणीयमित्याशंक्याह॥यतःपानकेसिकतासंपातइवारुंतुदतासंपादकमित्यर्थः॥अनौ
चित्यंमौचित्यविपर्ययस्तत्रकिमौचित्यं॥धर्मशास्त्रनिषिद्धत्वस्यतथात्वेत्वन्यविवाहितायाःशृंगारेप्यनौचित्यापत्तेः॥नचेष्टापत्ति
॥तत्रचितदुत्कर्षस्यैवसकलसहृदयसंमतत्वादतएववक्ष्यति॥द्वयोर्यूनोरिति॥अत्रेष्टापत्तिंचेदमस्यतर्हिदंपत्योरित्येवोप

तत्रप्राचीनग्रंथकृतः॥अनौचित्यादृतेनान्यद्रसभंगस्यकारणं॥प्रसिद्धौचित्यबंधस्तुरसस्योपनिषत्परेति॥उद्वेगकर
मनौचित्यं॥लोकयात्राप्रसिद्धिसिद्धत्वमौचित्यं॥तस्माद्द्वयोर्यूनोर्यत्रमिथोरतिस्तत्रैवरसः॥ समहरिष्यदतस्तदाह॥लो

कयात्रेति॥लोकव्यवहारेत्यर्थः॥प्रसिद्धिर्ज्ञानं॥सिद्धत्वंविषयता॥तथाचसार्वजनीनतादृशव्यवहारजन्यज्ञानविशेष्यत्वंतदिति
फलितं॥लोकमात्रप्रसिद्धेतिक्वचित्पाठः॥तत्रमात्रपदंकृत्स्नार्थकमितिप्रसिद्धिपर्यंतेनप्रमापर्यंतविवक्षणात्तत्प्रमाविशेष्यत्वंत
दितिफलितंबोध्यं॥स्त्रीपुंसयोःपरस्परानुरागवर्णनेब्राह्मणस्याध्ययनादिवर्णनेराज्ञोमृगयावर्णनेपिचौचित्यंतद्विपर्ययश्चानौचित्य
मित्यादिरीत्याबहुविधंतदित्याविष्कुर्वन्विवक्षितार्थमाह॥यूनोरितिपुमान्स्त्रियेत्येकशेषेतात्पर्यंग्राहयितुंद्वयोरितिमिथुनीभूत रामः
योरित्यर्थः॥जरास्वपिमान्मथोविकारोनुचितएवेतिध्वनयितुंयूनोरित्युक्तम्॥तत्रैवेत्येवकारव्यवच्छेद्यमाह ॥ ७ ॥ ८ ॥ ९२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

युक्तितोत्यादाह॥ अत्रोभयत्रापि स्वविषयावृत्तिस्वाश्रयविषयकरतिकत्वं कैवल्यं षष्ठीसमभिव्याहृतैवकारार्थः॥ तेन॥ यांचिंतया
मि सततं मयि सा विरक्ता साचान्यमिच्छति जनं सजनोन्यसक्तः॥ अस्मत्कृते च परितुष्यति काचिदन्या धिक्तां च तं च मदनं च इमां च
मां चेत्यादौ स्वविषये स्वाश्रयान्यविषयरतिमत्वेपि रसाभासतानिष्प्रत्यूहैवेति ध्येयं॥ रसाभास एव न तु रस इत्युभयत्रापि प्रथमासम
भिव्याहृतैवकारार्थः॥ एतेन दूषकताबीजस्यैकरूपस्यैव निरुक्तकैवल्यस्य संभवादुदाहरणभेदप्रयोजकवैचित्र्यांतरगवेषणपरि
श्रमो न कर्तव्य इति सूचितं॥ क्रमो तिशयितत्वाद्ग्रामो वा तदेकप्रयोजनत्वात्सीतेत्यादि सीतासमागमस्यायोग्यतासिद्ध्यर्थं बंधुरंन

एकस्यैव रतिश्चेद्रसाभास एव॥ एकस्या एव रतिश्चेद्रसाभास एव॥ क्रमेणोदाहरणं॥ सीतासमागमस्त्वा घाबंधुरं दश
कंधरं॥ प्रहर्तुं क्षमते कामो रामो वा निशितैः शरैः॥ निधुवनवनप्रांतेयांतं चलैर्नयनांचलैः किमिति वलितग्रीवं मुग्धे मुहु
र्मुहुरीक्षसे॥ विफलमखिलं यूनो नो चेद्ददेति परस्परं रतिरथ मनोजन्मा देवः स एव निषेव्यतां॥ बंविनीतमितियावद्द

शकंधरं निशितैरुद्दीपनातिशययुक्तैस्तीक्ष्णैश्च शरैः पुष्पैर्बाणैश्च प्रहर्तुं मारयितुं क्षमते समर्थो भवतीत्यर्थः॥ हे मुग्धे संभूतवि
नष्टानुरागानुभिज्ञे निधुवनेत्यादि॥ सुरतप्रधानवनसमीपे यांतं॥ युवानमित्यर्थादिति केचित्॥ तन्न॥ तथा सति बहुविषयरति
प्रतीत्या प्रकृतोदाहरणासंगतेः॥ किंतु मामेनमित्याद्येकतरमर्थात्त्वं लैर्लज्जालोलैर्नयनांचलैः पक्ष्मभिर्वलितग्रीवं तिर्यग्विवर्तित
कंठं यथा स्यात्तथा किमिति किमुद्दिश्य मुहुर्मुहुरीक्षसे यूनोः परस्परं रतिश्चेन्नोदेति तर्ह्यखिलमीक्षणादि विफलं भवति॥ अथेति प
क्षांतर इत्यर्थः॥ द्वयोरप्यनुराग इति यावत् स ईक्षणादरूहेश्या मनोजन्मा देवः काम एव निषेव्यतां तस्मात्र सिद्धार्थानुष्ठान सेवनत्तेवारू

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. तथा च तस्यानुरागे सत्त एव प्रवृत्तत्वादीक्षणावसर एव न॥ अनुरागाभावे त्वीक्षणवैयर्थ्यमुक्तमेव॥ न चास्मदीक्षणेनैवानुरागउ नौका
९३ ज्जीविष्यतीत्याशंसनीयं॥ प्रशमेन वासनाया एवात्यंतोच्छेदादिति भावः॥ यद्वा वासनाया अत्यंतोच्छेदमेव दर्शयति॥ अथेति॥ चिरे
व्याचीर्णे सति सोनादिप्रवाहो मनोजन्मा मनोधाम्न स्थिति देव उद्दिष्टकर्मफलप्रसूर्निषेव्यतामेव विषयसिद्धिस्तु दूरापास्तैव॥ प्रस्तु
त विरक्तक्लेशनिर्विण्णायास्तवापि वासनाक्षणक्षीणा सर्वस्वामवगच्छामइत्याशयः॥ आशंसावचनविभक्तिसमभिव्याहारात्॥ प्रा
ग्भावणस्यैवानुरागोनसीतायाइति प्रकाश एव प्रकृते नायको विरक्तो नायिका चात्र रक्तेति तु विचारगम्यमिति तद्विवेचयति॥ निरु

अत्र नायिकाया एव रतिर्न तु नायकस्य॥ एवमेकस्यानेकविषयारतौ रसाभास एव॥ परं त्वेष विशेषः॥ यत्र व्यवस्थि
ता बह्व्यो नायिका भवंति तत्र न रसाभासस्तथा सति कृत्स्नस्य सकलोत्तमनायकस्य बहुकामिनीविषया या रतेराभासता
पत्तेः॥ तस्मादव्यवस्थितबहुकामिनीक वैशिकनायकपरमेतत्॥ क्वकैवल्याभावेप्यन्यतरस्यानेकालंबनरतिमत्त्वेपि रसा
भास एवेत्याह॥ आलंबनस्याव्यवस्थितत्वं विशेषणं दातुमुपक्रमते॥ अनौचित्याभावेनेष्टापत्तिर्न संभवतीति भावः॥ वैशिकेति॥ वे
श्योपभोगरसिके इत्यर्थः॥ यद्यपि सुप्रसिद्धतया वेश्यानां रसाभासः प्रथमं दर्शयितुमुचितस्तथापि यद्देवरतेर्बहुविषयकत्वेनाभासत्वं
बुद्ध्यानारूढं तद्देवानेकपत्नीविषयकरतेराभासताप्रसंगोपि व्यवस्थितानेकविषयत्वेनाभासत्वे परिकरणी ये स्त्रीणामनेकविषया
रतिराभासो न पुरुषाणामिति विप्रतिपन्नस्य वैशिकरत्वेति प्रसंगशंकापरिजिहीर्षुणा तद्व्यलक्ष्यत्वाभावमुत्पादनाय सर एव प्रथ रा.भ.
मं लक्ष्यत्वेनापि प्रदर्शितः॥ अत एवोत्सर्गिकी रीतिमनुरुंधानः प्रसिद्धिक्रमेणोदाजहारेति विदुषां परामर्शः॥ ७॥ ७॥ ९३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नायकेप्यव्यवस्थितत्वं विशेषणमावश्यकमन्यथा पांचाल्याः पंचविषयकशृंगारादिवर्णनेप्याभासतायाः कस्याप्यनभिमतायाः समा
पत्तेरिति स्फुटयन्निरुक्तार्थे प्राचीनसंमतिमाह॥ वैशिकानामित्यनेन नायिकायामव्यवस्थितत्वं दृढीकृतं॥ वेश्यानामित्यनेन नाय
केप्यव्यवस्थितत्वं दृढीकृतं॥ हे सखि यत्सुरो यदग्रे नेत्रताराकनीनकातरलिता साभिलाषवलिता तस्य कस्य संपत्ताराभवति॥ यद्वा संप
द्विषयसंपत्ताराऽरूपतया परिणमते फलितेति यावद्यदभिमुखगतारत्नकांचीवेपते हर्षोद्गमात्तेन केनाप्यकांचीपुरीदृष्टादर्शनाविनाभूत
फलसंपत्तेः॥ यदनुगमे यन्निमित्तं कश्चिद्धिशिष्यानिर्वचनीयउग्रातिशयितो तएवाभितापऔत्सुक्यात्तस्य कस्याचोग्रः सदाशिवस्तुष्टे

अत एव वैशिकानां वेश्यानां च रसाभास इति प्राचीनमतं॥ एकस्या अनेकविषया रतिर्यथा॥ संपत्कस्याप्यताराभवति
तरलिता यत्सुरो नेत्रतारा दृष्टा केनाप्य कांची यदभिमुखगता वेपते रत्नकांची॥ उग्रः कस्याप्यतुष्टः सखि यदनुगमे कश्चि
दुग्रोभितापः स्यात्तं केनाप्यवेणी पयसि विलुलिता यत्कृते कापि वेणी॥ अत्र किंमो बाहुल्येन वेश्यात्वं॥ एकस्यानेकविषयार
तिर्यथा॥ पंचेषुक्षितिपप्रतापलहरी प्रीतिस्तदीया पुनः क्वासां नस्तनकांचनाचलतदे काश्मीरपंकायते॥ यत्कृते यदर्थे कापि वे

णी विलुलिता कंपात्तेन केनाप्यवेणी पयसि स्नातमित्यर्थः॥ संपत्तुष्टादिपदसाकांक्षषष्ठ्यंतकिमः स्यात्तदृष्टादिपदनिराकांक्षत्वेन षष्ठी
तृतीयाभेदभिन्नकिमद्वयावश्यकत्वेपि षष्ठ्यंतद्वयं तृतीयांतद्वयमिति किम्बहुलोपादानं कश्चुभितवक्तृजिज्ञासाद्वयं विनानुपपन्नं
तस्यानेकत्वं गमयतीत्युदाहरणसंगतिरित्याह॥ प्रियाभिलषितार्थपरायणात एव सखेः प्रतार्य पंचेषोः पंचभ्यो यस्य कस्यापि भूतपंचक
तादात्म्यप्रतिपत्तये मरणायेति यावदिषवो बाणा यस्य तस्यात एव क्षितिपस्य राज्ञः कामस्य प्रतापस्य पौरुषस्य लहरी उज्जृंभणा रूपा तदीया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. ९४ प्रकृतपुंसः प्रीतिः पुनस्त्वर्थे कासां स्त्रीणां स्तनात्मनः कांचनाचलस्य सुमेरोर्गौरत्वादत्युन्नतत्वाच्च तटे प्रावारेण काश्मीरपंकायते य नौका.
त्कर्दमात्मना परिणमते यक्षकर्दमश्च कर्पूरागरुकस्तूरीकंकोलैर्यक्षकर्दम इति कोशोक्तेः॥ कासां वा नीरजदृशां मूर्धनि नैव
सिंदूरलेखायते तदात्मना परिणमते॥ कासां वा कर्णयोर्न च माणिक्यभूषायते माणिक्यघटितभूषणात्मना परिणमते॥ अपि तु स
र्वास्वेव तैस्तैः प्रीतिकार्यैस्त्वदीया प्रीतिर्व्यक्तैवेति नायकनर्मसचिवं नायिकालोभयितारं प्रत्युक्तिरियं॥ सौलभ्यार्थकैश्चकारोपसंद
र्शनेन किमो हि त्वेनापीत्यर्थः सूचितः॥ अत्रेदं बोध्यं॥ कलहशीलकुपुत्राद्यालंबनतया वीतरागादिनिष्ठतया च वर्ण्यमानः शोको ब्रह्म
विद्यानधिकारिचांडालादिगतत्वेन च निर्वेदः कदर्यकातरादिगतत्वेन क्रोधः पित्राद्यालंबनकत्वेनोत्साहश्चैंद्रजालिकाद्यालंबनत्वेन

कासां मूर्धनि नैव पंकजदृशां सिंदूरलेखायते कासां वा न च कर्णयोः प्रियसखे माणिक्यभूषायते॥ अत्रापि वैशिकताप्रा
ग्वदेव॥ यत्र रसा बहवः स रसशबलः॥ यत्र भावा बहवः स भावशबलः॥

च विस्मयः गुर्वाद्यालंबनतया च हासो महावीरग
तत्वेन वर्ण्यमानं भयं यज्ञीयपशुवसासृङ्मांसाद्यालंबनतया वर्ण्यमाना जुगुप्सा च रसाभासः॥ भावाभासेष्वप्येषैव रीतिरनुसर्तव्येति
दिक्॥ रसशबलदृष्टांतेन भावशबलत्वं च रसशबलमनुवदति॥ भावशबलं लक्षयति॥ सन्नस्याकाव्यजन्मचमत्कृतिजनकैकत्वा
नगोचरत्वं लभ्यते॥ तथा च तत्तत्संत्यनेकभावत्वं तल्लक्षणं बोध्यं॥ न च विरुद्धांगेन प्रतिबंधात्कथं विरुद्धभावाभिव्यक्तिरन्यथा रस
शबलस्य दुर्वचत्वादिति वाच्यं॥ आनुभाविकरसानभिव्यक्त्याऽलौकिकाभिव्यक्तिं प्रत्येव तद्विरोधित्वात्॥ स्वाभिव्यंजकचर्वणान्यवहि रामः
तचर्वणाकत्वान्न प्रतिबंधसंभावनेत्यपि वदंति॥ अत्र निर्वेदादयस्त्रयस्त्रिंशद्गुर्वादिविषया रतिश्च भावपदार्थः॥ बहव इति ॥ ९४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्रपूर्वेपूर्वोपमर्देननिबध्यंतइतिशेषइतिकेचित्तन्न॥पश्येत्कश्चिच्चलचपलरेकात्वराहंकुमारीहस्तालंबंवितरहहहाव्युत्क्रमः
क्वासियासि॥इत्थंपृथ्वीपरिवृढभवद्विद्विषोरण्यवृत्तेःकन्याकाचित्फलकिसलयान्याददानाभिधत्तइत्यत्रशंकासूयाधृतिस्मृति
श्रमदैन्यमत्यौत्सुक्यानामुपमर्दलेशशून्यत्वेपिशबलतायाराजस्तुतिगुणत्वेनपंचमोल्लासेसमंमटभट्टैरभिधानात्॥एतेनपरस्परसामा
नाधिकरण्येनचर्व्यमाणाभावत्वंशबलतेत्येवंविधःपरसंदर्भसोदसमपरिष्कारोपिपरास्तः॥एकस्यामनेकेषांप्रतीतावप्येकस्याश्रये
परस्याश्रितत्वरूपस्यापिपरस्परसामानाधिकरण्यस्यप्रकृतेऽप्रतीतेः॥यदिचतत्रस्थापनार्थंपश्येत्कश्चिदितिब्रुवाणाकाचित्कन्या
चलचपलरेइत्यभिधत्तेइतिशेषपूरणेनव्याचिख्यासातर्हिविरोधद्वारापूर्वेपूर्वोपमर्दद्योतकापिशब्दसमुच्चितशेषपूरणंकिमितिन
रोचयेः॥तस्मान्नारिकेलजलक्षीरसिताकदलमिश्रणे॥विलक्षणोयथास्वादोभावानांसंहतौतथेत्यवधेयं॥रसशबलत्वदृष्टांतस्यानुस
रणमपिसाकूतमेव॥तद्यथा॥यएतेभावशांत्युदयसंधिशबलताध्वनयःसर्वैरुदाहृताविस्तरभियासमाख्यामात्रसमधिगतवि
शेषवत्तयाचास्माभिर्नप्रदर्शिताःपरंतुतेप्यस्मत्प्रदर्शितभावध्वनिपदरूढानकंचनविशेषमितरमावहंति॥यतोविद्यमानतयाचर्व्य
माणेष्विवोत्पत्स्यत्त्वच्छिन्नत्वविनश्यदवस्थत्वस्वफलोपधायकसामग्रीसमवहितत्वरूपसंधीयमानत्वैकसत्तापर्यवसितपरस्परस
मानाधिकरणत्वैःप्रकारैश्चर्व्यमाणेष्वपिभावेष्वेवप्राधान्यस्यावस्थानात्तेष्वेवचमत्कृतिविश्रांतेः॥यद्यप्युत्पत्तिविनाशसंधिशबलता
नांतत्संबंधिनांचभावानांचर्वणाविषयतावैलक्षण्याभावान्नप्राधान्यंकाचिद्विनिगमनातथास्थितौभावेष्वेवप्राधान्यस्यक्लृप्ततयाभा
वशांत्यादिष्वपितेष्वेवशांतिप्रतियोगिकत्वैरभिव्यक्तेष्वतस्याःकल्पयितुमुचितत्वात्॥किंचयदिभावशांत्यादौभावोनप्रधानंकिंतुतदुप
सर्जनकशांत्यादिरेवेत्यभ्युपेयतेतदाव्यज्यमानभावेष्वभिहिततत्प्रशमादिष्वकाम्येष्वभावप्रशमादिध्वनित्वंनस्यात्॥तथाहि॥तत्रभावे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र॰ग॰ दयध्वनौ व्यज्यमानभावप्रतियोगिकस्योदयस्य वाच्यत्वे भावोदयध्वनित्वं न स्यात्॥ यथा॥ उषसि प्रतिपक्षनायिकासदनादंतिकमं नौका
९५ चति प्रिये॥ सुदृशो नयनाब्जकोणयोरुदियाय त्वरयारुणद्युतिः॥ अत्रोत्पूर्वकेणेतिना भावोदयस्य वाच्यतयैव प्रत्यायनात्॥ उदय
स्य वाच्यत्वेऽपि भावस्यावाच्यत्वाद्ध्वनित्वं सुस्थमिति चेत्॥ प्रधानस्य व्यपदेशानौपयिकत्वे प्रधानकृतव्यपदेशानुपपत्तेः॥ अस्म
न्मते तूत्पत्तेर्वाच्यत्वेप्युत्पत्त्यवच्छिन्नस्यामर्षस्यावाच्यत्वाद्युक्त एव भावोदयध्वनिव्यपदेशः॥ एवं भावशांतिध्वनौ व्यज्यमानभा
वप्रतियोगिकस्य प्रशमस्य वाच्यत्वे भावशांतिध्वनित्वं न स्यात्॥ यथा॥ क्षमापणैकपदयोः पदयोः पतति प्रिये॥ शेमुः सरोजनयना
नयनारुणकांतयः॥ ननु शब्दवाच्यानां प्रशमादीनामरुणकांत्यैवान्वयादरुणकांतिप्रशमादेरेव वाच्यत्वं पर्यवसितं न तु तादृशप्रश
मादिव्यंग्यस्य रोषप्रशमादेर्व्यंग्यव्यंजकभेदस्यावश्यकत्वात्॥ न चारुण्यव्यंग्यरोषस्यैव वाच्यीभूतप्रशमाद्यन्वय इति वाच्यं॥ वाच्यव्यं
ग्यप्रतीत्योरानुपूर्व्येण सिद्धतया वाच्यान्वयबोधवेलायां वाच्यैः सह व्यंग्यान्वयानुपपत्तेः॥ अन्यथा सुदृशो नयनाब्जकोणयोरित्यस्या
न्वयो न स्यात्॥ मैवं॥ एवमपि॥ निर्वासयंतीं धृतिमंगनानां शोभां हरेरेणदृशो धयंत्याः॥ चिरापराधस्मृतिमांसलोपि रोषः क्षणप्राघुणि
कोबभूवेत्यादावपि भावप्रशमध्वनित्वापत्तेः॥ भावस्य वाच्यत्वेपि प्रधानस्य तत्प्रशमस्य व्यंग्यत्वात्॥ उभयोरप्यवाच्यत्वमपेक्षितमि
ति चेत्॥ प्रागुक्तपद्यद्वये शमत्वोदयत्वाभ्यां शमोदययोर्वाच्यत्वादनुदाहरणतापत्तेः॥ इष्टापत्तिस्तु सहृदयानां नौचितीमावहति॥ त
स्माद्भावप्रशमादिष्वपि प्राधान्येन भावानामेव चमत्कारित्वं प्रशमादेस्तूपसर्जनत्वमतो न तस्य वाच्यत्वं दोषः॥ इदं पुनर्भावध्वनिभ्यो
भावशांत्यादिध्वनीनां चमत्कारवैलक्षण्ये निदानं॥ यदेकत्र चर्वणायां भावेषु वस्तुगत्या चर्वणीयनायकगतामर्षादिगतस्थित्यवच्छिन्ना रामः
मर्षादित्वममर्षादित्वमेव वा प्रकारोऽन्यत्र तु प्रशमावस्थत्वादिरपीति॥ रसस्य तु सामाजिकगतचिरंतनवासनारूपस्थायिमूलकत्वा ९५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वशमादेरसंभवः॥रावणादिविमर्शसंभावितः सामाजिकगतोपिद्वेषादिरभिनवोदितोपिसंभाव्यतां॥परंतुनासौचर्व्यमाणो
प्यलौकिकचर्वणाविषयः॥किंतुलौकिकचर्वणाविषयस्तत्कुतश्चमत्कारइतिनासौविचारार्हइत्यादौत्यन्यत्रविस्तरः॥रसशवलो
दाहरणमनुसंदधानस्योदाहरणन्यूनत्वाशंकामपाकर्तुंस्मारयति॥अत्रानयोर्भेदयोर्मध्यदूरस्यर्थः॥दर्शितइति॥तस्याप्येतदेवोदा
हरणमितेनेत्यादिः॥अत्रप्रव्रज्यैवशुभंभविष्यतीतिनिर्वेदः॥तस्याराधायावचोममश्रुतिपथंजायेतेत्यौत्सुक्यं॥ममचक्षाग्रेस्मरःकु
इत्याधिक्षेपेणामर्षः॥त्रिजगतीराधयाविनाशून्येतिभ्रमः॥मनस्तापानिर्मुक्तैवेतिमतिः॥मृगदृशोलावण्यमन्यादृशमप्रतिममिति

अत्ररसशवलोदर्शितः॥भावशवलोयथा॥प्रव्रज्यैवशुभंममश्रुतिपथंजायेततस्यावचश्चक्षाग्रेममकःस्मरस्त्रिजगती
शून्याविनाराधया॥निर्मुक्तैवमनस्तापामृगदृशोलावण्यमन्यादृशंधिग्जन्मकगतासिकिंविलपितैःक्वासिप्रसन्नाभव
॥निर्वेदौत्सुक्यामर्षभ्रममतिस्मृतिविषाददैन्यानांभावानांसांकर्यादेषभावशवलइति॥ स्मृतिः॥लंकानिर्धारितदेशगता

सितत एवममजन्माधिगितितदलाभेविषादः॥विलपितैरतः परंप्राणान्नधारयिष्यामीत्यपार्थकवाक्यैः किमसांमुख्यात्क्वासिप्रसन्नाभ
वयत्रस्यास्ततआगत्यप्रसादयेतिदैन्यंचसूच्यतइत्याह॥एतावताप्रबंधेनह्यसंलक्ष्यक्रमस्यविषयोदर्शितः॥झटितिप्रतीतेषुविभा
वानुभावव्यभिचारिभावेषुसहृदयतमेनप्रमात्रासूक्ष्मेणैवसमयेनप्रतीयमानानांसर्वेषामेवरसाभिव्यंजकचर्वणाकालसंनिकृ
ष्टकालव्यक्तिकानामपिपरमार्थसद्धेतुहेतुमत्पौर्वापर्यवित्तिवेद्यत्वाभावात्॥संप्रतितुयत्रकाव्येविभावादयोनसम्यक्प्रतीयंतेप्र
करणंवाविचारवेद्यंतत्रसामग्रीविलंबाधीनंचमत्कृतिमांथर्यमेवेतिसंलक्ष्यक्रमोप्येषभवतीतिवक्तुमवसरः ॥ ५ ॥ ५ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.गं. ननुयद्ययंरसादिःसंलक्ष्यक्रमस्यविषयःस्यात्तदानुरणनभेदगणनप्रस्तावेर्थशक्तिमूलस्यद्वादशभेदाइत्याचार्याभिनवगुप्तपादानामुक्ति नौका
९६ स्तथातेनायंद्वादशात्मकइतिमंमटभट्टानामुक्तिश्चविरुध्येत॥वस्त्वलंकारात्मनाद्विविधेनवाच्येनस्वतःसंभविकविप्रौढोक्तिनिष्पन्न
त्वकविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नत्वैस्त्रिभिरुपाधिभिस्त्रैविध्यमापन्नेनातएवषडात्मनावस्त्वलंकारयोरिवरसादेरप्यभिव्यंजनादष्टादशत्व
प्रसंगादितिचेन्न॥तद्ग्रंथस्यदिङ्मात्रदर्शनमात्रपरत्वात्॥अन्यथाकविनिबद्धवक्तृभितवक्तृप्रौढोक्तिनिष्पन्नत्वप्रयुक्तभेदानामगणनेनन्यूनता
पत्तेर्दुर्वारत्वात्॥अस्यकविप्रौढोक्तिनिष्पन्नत्वेनक्रोडीकरणेकविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नस्यापितथात्वापत्तेरित्यलमनल्पजल्पेन॥ननुप्रामा
णिकनिबंधात्संलक्ष्यक्रमव्यंग्यस्यवस्तुत्वमेवनरसादित्वमित्येवकल्पयितुमुचितमितिचेत्॥अश्रद्दधानोसि॥नह्युपलक्षणतास्माभिःकृ
ष्यते॥किंतुरसभावादिरर्थोध्वन्यमानएवनवाच्यस्तथापिनसर्वोप्यलक्ष्यक्रमस्यविषयइत्यभिनवगुप्तपादाचार्यैरेवोक्तत्वात्॥अत्ररसपदे
नरतिमात्रंविवक्षितमितिचेत्॥कःसंलक्ष्यक्रमतायांविद्वेषोबलवान्॥नखलुधर्मिग्राहकमानसिद्धंरत्यादिध्वनेरसंलक्ष्यक्रमव्यंग्यत्वं॥येन
त्वद्वचसिश्रद्दधीमहि॥इत्थंचयदुक्तं॥एवंवादिनिदेवर्षौपार्श्वेपितुरधोमुखी॥लीलाकमलपत्राणिगणयामासपार्वतीत्यलक्कमारीत्वाभाव्या
दधोमुखत्वविशिष्टस्यलीलाकमलपत्रगणनस्योपपन्नत्वान्मनागविलंबेननारदांगिरःप्रभृत्युपक्रांतविवाहादिप्रसंगेबुद्ध्युपारूढेव्रीडायाअ
पिचमत्करणात्संलक्ष्यक्रमोयंध्वनिरित्यानंदवर्द्धनाचार्यैस्तत्राप्यसौवस्तुध्वनिरेवनभावध्वनिरित्याग्रहस्यकव्यः॥तथाप्राधान्यएवैषांरसा
दित्वमन्यथातुरत्यादित्वमेवेत्यप्याग्रहोनकर्तव्यः॥किंतुरसादित्वमनुमंतव्यमेव॥भावालंकारादिप्रधानकाव्येषुरसध्वनिव्यपदेशानकस्या
पिसंमतइतिचेत्॥अनुक्तोपालंभएवासौ॥यतोनवयंतत्काव्यस्यरसध्वनित्वंमन्महे॥किंतुतत्काव्यव्यंग्यस्यरत्यादेरसादित्वमात्रं॥नहिवेदपा राम:
रायणासमर्थंब्राह्मणापत्यंब्राह्मण्यहीनमितिवक्तुंशक्यं॥प्राधान्यस्यप्रयोगोपाधित्वांगीकारादेवानतिप्रसंगात्॥तस्मात्संलक्ष्यक्रमव्यंग्यःसंल ९६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यक्रमव्यंग्योगुणीभावितात्माचेतिसिद्धंरसत्रैविध्यमित्यादिबहुतरमनुसंदधानआह॥सामान्यतोधर्मिण्यवगतेविशेषजिज्ञासा
वशास्त्रकारांतरेणतस्मिन्विभज्यमानेरसभावालंकाराणांपरस्परगुणप्रधानभावमापन्नानामभिव्यक्तिर्मनोविश्रामधामताप्युक्त
प्रायेत्याशयः॥उच्यतइतिशेषः॥भावालंकारयोरभिव्यक्तिंदर्शयितुंरसंविभजते॥अभिमुखंलक्षयति॥विमुखंलक्षयति॥भावाल
काराभिव्यक्त्योर्विवेचनायतृतीयंविभजते॥यद्यपिवस्तुमुखोपितृतीयोवक्तुमुचितःयथामम·अलकेफणिशावकग्रहान्ननुनासा
श्रितवान्निरखाचलः॥रदनेकिमुदाडिमभ्रमान्मुखमुत्कंठमनेननामितमित्यत्रनासाभरणसौंदर्यातिशयोमुख्योमनोविश्रामहेतुत्वा

अथरसभावालंकाराणामभिव्यक्तिः॥रसस्त्रिविधोभिमुखोविमुखःपरमुखश्चेति॥व्यक्तैर्भावविभावानुभावैर्यस्याभिव्य
क्तिःसोभिमुखः॥भावविभावानुभावानामनुक्तत्वात्कष्टावगमोविमुखः॥परमुखोपिद्विविधः॥अलंकारमुखोभावमुखश्च
॥अलंकारमुखेलंकारोमुख्योमनोविश्रामहेतुत्वाद्रसोगौणः॥भावमुखेभावोमुख्योमनोविश्रामहेतुत्वाद्रसोगौणः॥अत्रप्रा
चीनसंमतिः॥अलंकारेचरुचिरेमनोविश्रांतिकारिणि॥अलंकारस्यमुख्यत्वंगौणत्वंरसभावयोरिति॥अभिमुखाःस्वस्वप्र
करणेउदाहृताएव॥

द्रसोगौणइत्यस्यापिवक्तुंशक्यत्वात्तथापिभावालंकारयोरिवभावालंकारत्वाद्यनापन्नवस्तुमात्रस्यव्यक्तेःकथ
नस्यप्रतिज्ञायाःपूर्वमकृतत्वात्तद्भेदस्योक्तरीत्यावाच्यवदेवपरिस्फुरणाच्चतदप्रदर्शनेपिनन्यूनतेतिसभेदोनोक्तः॥अलंकारस्यध्वनिप
दप्रवृत्तिनिमित्ततांदर्शयति॥भावस्यध्वनिपदप्रवृत्तिनिमित्ततांदर्शयति॥तत्रसंमतिमाह॥तदिदंव्याख्यातमधस्तात्॥उदाहरणन्यूनता
माशंकमानंनिरवधानंप्रत्याह॥श्लोकार्थःस्पष्टएव॥अत्रययावितिपाठंप्रकल्प्यवाक्यभेदकल्पनाद्बहुलरसानुगुण्येन॥ग्रंथकृदपिचैतत्स

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र.त. एतादृशप्रयोगानुरोधेनैव च पदव्युत्पत्तिमार्मिकास्ता किंकाअप्याख्यातैकवचनस्य शक्तिमेकत्वे विवदमाना एवाख्यातद्विवचनबहु नौका
९७ वचनयोर्द्वित्वबहुत्वयोः शक्तिमेकवाक्यतयांगीचक्रुः॥ नन्वेवमाख्यातबहुवचनोपस्थापितबहुत्वस्य मैथिल्यादिष्वन्वये मैथिली
पदप्रयोज्यमैथिलीनिष्ठविशेष्यतायाबहुत्वप्रकारताद्वारा निरूप्या लक्ष्मणादिविशेष्यतास्वेवेति तेषां समासापत्तिः॥ एकपदप्रयो
ज्यविषयतायाः साक्षात्परंपरयावा निरूप्या या विषयतातत्प्रयोजकत्वरूपसामर्थ्यस्यैव समासनियामकत्वात्॥ न चात्र समूहालंब
नस्यैव बोधस्योत्पत्त्या बहुत्वप्रकारताभेदान्नोक्तंसामर्थ्यमिति वाच्यं॥ तथासत्येकैकमैथिल्यादितात्पर्येण प्रकृतप्रयोगानुपपत्तेः॥

विमुखोयथा॥ मैथिलीलक्ष्मणोरामः सुग्रीवः पवनात्मजः॥ लंकापुरं परित्यज्यपारं वारिनिधेर्ययुः॥ अत्रसंकटम
स्विलंसमुत्तीर्यैतेसमागतादृत्यद्भुतोरसः कष्टादवगम्यते॥ अलंकारमुखोयथा॥ एषानलेखाभ्रमतामलीनांभाति
प्रभातेनवकैरविण्याः॥ आलिंगतः किंतुतुषारभानोः कांतिः कलंकस्यवपुर्विलग्ना॥ यत्रनानाधर्मावच्छिन्नविशेष्यता

निरूपितैकाबहुत्वप्रकारतातत्रैवसमवायस्यान्वितत्वसंसर्गत्वात्॥ यत्रतुतादृशविशेष्यतानिरूपिताबहुत्वप्रकारताभिन्नातत्रोद्दे धानधातुलाभावात्॥
श्यतावच्छेदकव्याप्यपर्याप्तेरेवसंसर्गतयामैथिल्यादिबहुत्वएवतथाप्रयोगसाधुतावसरात्॥ कथमन्यथादिशोनेहसोगगनानी
तिप्रयोगस्यासाधुत्वमितिचेन्नैवं॥ प्रकृतेनिरुक्तसामर्थ्यसत्वेपिसमासविधेर्विभाषाधिकारीयत्वादसमासइतिसमासः॥ प्रभातेन
वकैरविण्याःसंकुचत्कुड्मलायाःकुमुदिन्याःप्रांतेभ्रमतामलीनांलेखापंक्तिर्न॥ किंतुआलिंगतःवर्तमानसामीप्येवर्तमानवद्वालिंगि रामः
ततवतः॥ अतएवाह॥ विलग्नेति॥ अन्यथालगंतीत्येववक्तुंयुक्तंयत्तुधातुसंबंधेप्रत्ययाइतिव्याचख्यौ॥ तन्मंदं॥ विलग्नेत्यस्यसकृदंतत्वेनप्र ९७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तुषारभानोर्हिमरश्मेः कलंकस्य वपुर्विलग्नाकैरविणी संबुद्धा कांतिर्भवतीत्यर्थः॥ यथा वा मम॥ दानैः पिच्छिलिताः कचैर्दुरधिगाः संवीक्षिताहस्तिनः स्वभ्यस्ताद्दृढपक्षपातसुलभा नम्राः फलैः शाखिनः॥ प्रातर्यांतिमधुव्रते विकसति स्वार्थोपपन्नोदरान्निर्यांतेमलिने मत्तेनु नलिने सौजन्यजन्यं यशः॥ अत्राप्रस्तुतप्रशंसालंकारो मुख्यो दानवीररसो गौण इति विशेषः॥ सप्तसंख्याकसमुद्रा बालमकहारकसमुदायरूपालंकारवतीं मेदिनीं पृथ्वीं विप्रकुलाय कृप्रभूसुरेभ्यो बहुभ्यो दातुं संकल्पसूचकवाक्योपक्रमं योजितवतः कृतवतो भार्गवस्य किमप्यतिशयितं व्रीडास्मितमत्रोक्तप्रतिज्ञानिर्वाह प्रकृतार्थिकामप्रपूरणयोर्विरोधादित्यपर्याख्याने॥ हस्तप्रसारणमात्रेण संप्रदा

अत्रापन्हुतेरलंकारस्य मुख्यता॥ भावमुख्यो यथा॥ सप्तांभोनिधिनीरहारपटलालंकारिणीं मेदिनीं दातुं विप्रकुलाय योजितवतः संकल्पवाक्योद्यमं॥ नाभीनीररुहात्सरोरुहभुवा तत्कालमाविष्कृते हस्तांभोरुहि भार्गवस्य किमपि व्रीडास्मितं पातु वः॥ अत्राद्भुतभावस्य मुख्यता दानवीररसो गौणः॥ विहद्धारिधराः स्नेहं तथा वर्षंत संततं॥ लभते विपुलां वृद्धिं यथा रसतरंगिणी॥

नांतरवर्जनाप्रतीतेः॥ कुलपदस्य कुलीनपरतया ग्रुपपद्यते वैहुला प्रस्या युक्तत्वाच्च॥ किं त्वविंत्यपितामहाद्यालंबनकत्वप्रसक्त्यालोकापवादेन व्रीडाव्यंजकं स्मितमिति व्याख्येयं॥ तरेतदुक्तं पित्राद्यालंबनतया वर्ण्यमान उत्साह आभास इत्यधस्तात्॥ वः पातु कस्मिन्सति सरोरुहभुवा ब्रह्मणा नाभीनीररुहान्नारायणावतारभूतस्वकीयनाभीसंबंधिकलाद्धस्तांभोरुहि पात्रहस्तरूपे भांरुह्य भासिस्यागजलानि रोहंतिबीजभूतान्यं ततः फलसंसृष्टानि भवंतीयस्मात्तादृशे तत्कालं झटित्या विष्कृते प्रसारिते सतीत्यर्थः॥ सिकीर्यंज्ञवृत्तेर्विहूस्परिशीलनं विनादुर्यंदत्वेमन्वानस्तान्प्रार्थयते॥ विहद्धारिधरा इति॥ हे पण्डिताहे वागमृतप्रयोक्तार इत्यर्थः॥ स्वग्रंथोदाहरणे परकीयत्वाशंकावारयन्देवताप्रसाद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नौका

र०त० दिव्यं।।निमज्जनोन्मज्जनक्रीडाहेतुंगूढागूढमंगपामितिपावनं।।स्वकीयंचतुरत्नयेऽस्यग्रंथस्यरचनायनीनिबध्नन्त्वयशःप्रथयित्री

९८ मेनामाशास्ते।।क्वापि।।काचघटीवरसाद्भुता।।मेभानोरिति।।एतेनेरसतरंगिणीपदप्रवृत्तिनिमित्तमुक्तमितिविरम्यते।।श्रीरस्तु।।

प्राचाश्लाघ्याशिरस्साजन्होरिवमंमटस्यकुस्सिगता।।अधिधरणिमयानीतातरंगिणीयंभगीरथेनेव।।१।।गंगायमुनाभ्यंतःसरस्वती

सर्वसंमताजयति।।आस्तिकसंवादिन्यपिनास्तिकेनोपहस्यतेजगति ।।२।। नानार्थनादहृतकलोभूसुरराजोपियत्रसंक्लिष्टः

।।सूर्यसुनुद्रितपद्मेपतंतुतत्राधुनामधुपाः।।३।।दूरेपुस्तकसंपदोनिजमनोगौरीकलत्रालयेभावोद्भूरसप्रधानसरणिःसेषात

रंगिण्यपि।।तावस्यामपिकार्यसंकटततोनौकासमाप्तिस्तुयास्वस्तिश्रीयमदेवपंडितविभोरस्माहतांसेवसा।।४।।पयास्वगंसुखा

अवगाहस्ववाग्देविदिव्यांरसतरंगिणीं।।अस्मत्पद्येनपद्येनरचयश्रुतिभूषणं।।२।।यावद्गानोःसुताकापिकालिंदी

अविवर्तते।।तावत्तिष्ठतुमेभानोरेषारसतरंगिणी।।३।।इतिप्रकीर्णकंनामाष्टमस्तरंगः।। समाप्तश्चायंग्रंथः ।।

भिमुख्यपदवींयातंसमुत्कंठयायस्यस्वात्मनिराधयादिनकरोजीवात्तुरालक्षितः।।आस्माकीनकृतिद्विदर्विविगलत्काव्यामृता

प्यायितंपंचामस्तसुतेनसोस्यफलितंशार्दूलविक्रीडितं।।५।।गंगाधरस्यगंगेवविस्रोविस्रुपदीववा।।नौकाबुधाविनाभूःस्ताद्दृष्टी

वीर्गीर्वाणगौरवी।।६।।ग्रहांकनगपृथ्व्यंके १७९९ नौकांगिरसिवत्सरे।।एकद्वित्रिचतुःश्लोका ४३२१ गंगारामेणपूरिता

।।७।। ।। इतिश्रीजन्हुपनामकगंगारामविरचितायांनौकाख्यायांरससरंगिणीव्याख्यायामष्टमस्तरंगः।। समाप्तश्चायंग्रंथः।। रामः ९८

वाराणसीप्रसादस्यनियोगेनतुयत्नतः।।काशीसंस्कृतमुद्रायामंकितोयंशिलासरैः।।१।।श्रीकाशीजीमेंमहल्लेहोदकटोराश्रीबाबूवाराणसीप्रसादजीकेमकानमेंकाशी

संस्कृतयंत्रमुद्रायंत्रमेंछपाजिनकोलेनाहोयउनकोश्रीबाबूवाराणसीप्रसादजीकेपासपाकचौरीगलीमेंभाईप्रतापसिंहजीकेदुकानपरमिलेगी संवत् १९४२ ।। ।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति नौकाटीकासहितारसतरंगिणीसमाप्ता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारिका
प्रश्ना

२२५३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri